आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १२७

श्रीरामर्षिप्रणीतविवृतिनामकटीकोपेतं

श्रीमद्भर्तृहरिप्रणीतं

# शतकत्रयम् ।

मूल्यं—द्वादशरूप्यकाः । ( रु. १२—०० )

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः १२७

श्रीरामार्षप्रणीतविवृतिनामकटीकोपेतं

श्रीभर्तृहरिप्रणीतं

# शतकत्रयम् ।

---

तदिदं

कृष्णमूर्तिशास्त्र्युपाह्वरामकृष्णशर्मणा, कोसंबीकुलोत्पन्नेन

धर्मानन्दसूनुना दामोदरशर्मणा च, संशोधितम् ।

तच्च

श्रीमान् गणपतराव यादवराव नातू एम्. ए.

इत्येतैः

कार्यकारीविश्वस्तैः आनंदाश्रमे मुद्रयित्वा प्रकाशितम् ।

द्वितीयेयमङ्कनावृत्तिः,

शकाब्दाः १८९९

खिस्ताब्दाः १९७७

( अस्य सर्वेऽधिकाराः राजशासनानुसारेण स्वायत्तीकृताः ।

मूल्यं—द्वादशरूप्यकाः । ( रु. १२—०० )

## ॥ काचिद्विज्ञप्तिः ।

अनवद्यसंस्कृतविद्यासुधारसास्वादनरसिकानां भारतीयानां वैदेशिकानां च संख्यावतां सुविज्ञातमेवेदं यत्सहृदयहृदयरञ्जककाव्यनिर्माणचातुरीधुरीणेषु यशःकायेनाद्यापि जीवत्सु कवितल्लजेषु शतकत्रयप्रबन्धा भर्तृहरियोगीन्द्रोऽप्यन्यतमो भवतीति । यद्यप्यस्य कवेः कालाभिज्ञनादिनिर्णयोद्यमात्पराजयन्त एव चरित्रविमर्शकोविदा अपि पर्याप्तं विनिगमकप्रमाणमपश्यन्तस्तथापि तत्प्रणीतनीतिशृङ्गारवैराग्यप्रकरणानि समस्तविदग्धजनचेतोहारीण्यावालवृद्धमधीयानानां नवं नवं हर्षप्रकर्षमुपजनयन्तीति तु निश्चयपदम् । तत्रापि तदीयं वैराग्यप्रकरणमत्युत्तमं पठनानुपदमेवानिर्वचनीयमनःपरीपाकमुत्पादयतीत्यप्यनुभवैकवेद्यं तत्त्वम् । परं प्रबन्धरत्नमिदमर्वाचीनकविदग्धैरनेकैः कृतकपद्यैर्मन्थरं तत्र प्रवेशितैः स्वरूपवैकल्यमापादितमित्यभियुक्ता अपि बहवोऽभिप्रयन्तीति यावल्लब्धहस्तलिखितप्राचीनकोशान्सूक्ष्मेक्षिकया परीक्ष्य तत्प्रकाशने प्रवृत्तिनैः समुदजनि । प्रसङ्गे चास्मिंस्तदौपयिकप्राचीनमातृकागवेषणप्रसक्तैरस्माभिरेका शतकत्रयस्य मातृका श्रीरामर्षिकृतविवृतिसनाथिता समवापि । श्लोकानामानुपूर्वीविषये मनागिव विभिन्नप्रस्थानानुरोधिन्यपीयं, टीकायाः सरलमधुरां शैलीं विवेचनसौष्ठवं च साधु निर्वर्णयतो नस्तन्मुद्रणप्रकाशनकर्मण्युदसाहयत् । सदृक्षमस्या मातृकान्तरं उण्डनगरे ' ब्रिटिष म्यूझियं ' इत्यत्रैव वर्तते नान्यत्रेति विज्ञायापि जगत्प्रक्षोभकप्रकृतसंगराहम्बरपरिभूते समयेऽस्मिन्न कथंचिदपि तदुपलम्भः सुकर इति अस्या एकस्याः सटीकायास्तथैतदानुपूर्वीकाया मूलमात्रघटिताया अन्यस्याश्च मातृकायाः साहाय्येनैतन्मुद्रणकर्मण्यभिनिविष्टा अभूम ।तत्र कोशयोः—

( १ ) अ. संज्ञितः मूलमात्रकः । श्लोकानुपूर्व्या द्वितीयकोशमेवानुरुन्धानेऽत्र क्वचित्क्वचिद्दृश्यमानपाठभेदाः श्लोकाधोभाग एव कुण्डलमध्ये निरदिक्षन्त। इयं मातृका संवत् १८५३ वत्सरे लिखिता । ७२ । १८७१–७२ संख्यया निर्दिष्टा च । पत्राणि १७ ॥

( २ ) रा० संज्ञितः । रामर्षिकृतविवृतिसहितः । ईदृश एवान्यः कोशः ( वेण्डाल सूचीपत्रे २५५ संख्ययाङ्कितः ) लण्डनेऽस्तीति प्रागवोचाम । कोशोऽयं पूर्वं मुम्बई नगरे १८९३ वत्सरे नीतिवैराग्यशतके प्रकाशितवता सुप्रसिद्धयशसा श्रीकाशीनाथ त्र्यम्बक तेलङ्ग महोदयेन सुपरीक्षित इत्येवमः । लेखनकालो न निर्दिष्टः । ७३ । १८७१–७२ संख्ययाङ्कितः । पत्राणि ५१ ।

अस्यां मातृकायां स-श, ख-प, प-फ, ठ-ठ, व-व, च-व, थ-घ, द्व-ध्व, त्थ-च्छ, इति प्रतियुग्मं वर्णयोरभेदः संदृश्यते । विसासि (विशसि), मूर्ण (मूर्ख), मेपला ( मेखला ), पुष्फ ( पुष्प ), निविष्ठ (निविष्ट), बृहस्पतिः (बृहस्पतिः),

इत्यादीनि दिङ्मात्रेण कानिचिदुदाहरणानि । अथापि मुद्रणाय शुद्धवर्णा एव स्वीकृताः । मातृकालेखकेन प्रदर्शितं रेफात्परव्यञ्जनद्वित्वं मुद्रणे नात्यन्तोपयोगीति पर्यहारि । ' कन्थामाला ' इति शब्दे ' ला ' इति वर्णः ' ली ' वद्दृश्यते । उत्तङ्ग ( उत्तुङ्ग ), वार्द्धक्य ( वार्धक्य ) इत्याद्यपभ्रंशानुदास्महे । मतुबन्तेषु 'प्रकाशमान्, शरीरमान्' इत्यपि क्वचित् । तथात्र कोशे तत्र तत्र केचिद्देशभाषाशब्दा अपि व्यारूयात्रा निर्दिष्टाः सन्ति । जमानः (७३पुटे), गर्गरी (७८पुटे), सगीना (११९पुटे), खिङ्ग (५८पुटे) इत्यादयः । तत्र 'विट' पर्यायः ' षिड्ग ' शब्दो मेदिनीकोशे दृश्यते । स एव ख-पयोरुच्चारणवैषम्येण ' ङ्ग ' योर्बिन्दुमात्रविशिष्टयोर्लेखनस्खालित्येन च ' खिङ्ग ' इति विकृतिमुपलेभे इति सुस्पष्टमभियुक्तानाम् । अत्र लेखनप्रमादोत्पन्नानुस्वारविसर्गदोषानादृत्य यथायोग्यं संशोधने, वाक्यावसानपदर्शकदण्डचिह्ननिवेशने च स्वातन्त्र्यमुरीकृतम् । अत्र कोशे प्रान्तेषु संयोजितानि शोधनान्येवाविष्कुर्वन्ति सावधानमस्य कोशस्य केनचित्पण्डितेन परीक्षणम् । प्रतिश्लोकावसानं ' छ ' इति चिह्नं नास्माकमुपयुज्यते । संध्यादिविषये यावच्छक्यं मातृकैवानुसृता । इत्यलमतिविस्तरेण ।

मातृके इमे द्वे अपि ' गुर्जर ' देशसंबन्धिन्यौ पुण्यपुरस्थभाण्डारकरप्राच्यविद्यासंशोधनमन्दिरस्थराजकीयकोशागारतः उपलब्धे । तत्रापि द्वितीयमातृका ' राजस्थान ' प्रदेशादुपलब्धेति जानीमः ॥

विवृतिकृतो रामर्षेरपि देशकालौ न जानीमः । तथापि मातृकायां दृश्यमानपृष्ठमात्रादिचिह्नानि, लेखनवैजात्यं च नः पर्याप्तं प्रमाणं रामर्षेरयं कैस्तपोऽशताब्द्याः सर्वथा नार्वाचीन इत्यध्यवसितुम् । अस्य नूलार्थविवरणशैली परिमितसंस्कृतज्ञानानामपि उत्साहजननी ललिततरमधुरपदघटिता आरुरुक्षूणामप्यत्यन्तोपकारिणीति प्रकाशनेऽस्याः मावृताम ॥

अन्ते च मातृकाद्वयमिदं सादरं कोशागारतो गवेषयित्वा यावदावश्यकमस्मदधीनतया स्थापितवतां प्राच्यविद्यासंशोधन मन्दिरस्थ राजकीय कोशागारसंरक्षकाणां श्रीपरशुराम कृष्ण गोडे महोदयानां, मुद्रणकार्यं सादरमोमित्युररीकृत्य यथावसरं निर्वर्तितवतां आनन्दाश्रमनिर्वाहकसमितिसदस्यानां, तथा मुद्रणमातृकासज्जीकरणव्ययमङ्गीकृत्य वसुप्रदानेन बहूपकृतवतां जे. आर. डी. टाटा. ट्रस्ट प्रमुखानां च सविधे तत्तदुपकृतिभरान्स्मरन्तो धन्यवादान्समर्प्य एतद्ग्रन्थप्रकाशनपरिश्रमसाफल्यं संतनुमाशास्महे ॥ इति ।

सहृदयवशंवदौ संपादकौ ।

# रामार्षेकृतविवृतिसहिते भर्तृहरिकृत-शतकत्रये

## नीतिशतकम् ।

चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभास्वरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयं-
श्चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

[ १ अ. °भास्करो । २ अ. °उत्सेदयन् । ३ अ. योगिनो ]

हरः विजयते । श्रीशिवः सर्वोत्कर्षेण वर्तते । किंलक्षणो हरः । ज्ञानप्रदीपः प्रदीप इव ज्ञानं यस्य सः ज्ञानप्रदीपः । ज्ञानरूप इत्यर्थः । क्व विजयते । योगिनां चेतःसद्मनि । चेतः मानसं तदेव सद्म गृहं तस्मिन् । समाधिमतां चित्तगृहे । अन्योऽपि दीपः गृहे ज्वलति । पुनः किंलक्षणः हरः । चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभास्वरः । चूडायां मुकुटे उत्तंसिता आभरणीकृता या चारु मनोज्ञा चन्द्रकलिका चन्द्रलेखा सा एव चञ्चन्ती देदीप्यमाना शिखा ज्वाला तया भास्वरः शोभमानः । दीपोऽपि शिखया भास्वरो भवति । पुनः किंलक्षणः । लीलादग्धविलोलकामशलभः । लीलया हेलया दग्धो भस्मीकृतो विलोलश्चपलः कामः कन्दर्प एव शलभः पतंगो येन स तथा । दीपोऽपि विलोलपतंगान्दहति । पुनः किंवि० हरः । श्रेयोदशाग्रे । श्रेयः सुकृतं तदेव दशा धर्तिः । अथ वा पुण्यवती अवस्था तस्याः अग्र उपरि । वर्तमानः कालः । तस्मिन् स्फुरन् प्रकाशमानः । दीपोऽपि दशाग्रे वर्त्यग्रे स्फुरति । पुनः किंवि० हरः । अन्तर्मनसि स्फूर्जदपारमोहतिमिरप्राग्भारम् । स्फूर्जत् प्रवृद्धं प्राप्नुवत् यत् मोहतिमिरं अज्ञानान्धकारं तस्य यः प्राग्भारः अतिशयस्तं । उच्छेदयन् नाशयन् । प्रदीपोऽपि तिमिरप्राग्भारमुच्छेदयति । हरति नाशयति कर्ममूलानि पापानीति हरः । अनेनाभीष्टदेवतास्मरणेन मङ्गलाचरणमुक्तम् । यतः ज्ञानार्थी कश्चिः ' ईश्वरज्ज्ञानमिच्छेन्मोक्षमिच्छेज्जनार्दनात् ' इत्यादि शास्त्रमाश्रित्य श्रीशिवं स्तौतीत्यलमतिविस्तरेण ॥ १ ॥

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ २ ॥

न जानातीत्यज्ञः मूर्खः पुमान् । सुखं यथा स्यात्तथा आराध्यः सुखेन आराधनीयः । तथा विशेषेण जानातीति विशेषज्ञः । विद्वानित्यर्थः । सुखतरं

अतिसुखेन आराध्यते ज्ञेयते । परं तु ज्ञानलवदुर्विदग्धं ज्ञानस्य शास्त्रस्य लवः छेशः तेन दुर्विदग्धः दुरुच्चुरः । अर्धज्वलित इत्यर्थः । तं पुरुषं ब्रह्मापि चतुराननोऽपि न रञ्जयति न प्रमोदयति । अथ वा ज्ञानलवेनापि दुर्विदग्धः परिव्रः तम् ॥ २ ॥

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्राङ्कुरा-
त्समुद्रमपि संतरेत्प्रचलदूर्मिमालाकुलम् ।
भुजंगमपि कोपितं शिरसि पुष्पवद्धारये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ३ ॥

[ १ अ. प्रसरद्भूं ]

कदाचित्पुमान् प्रसह्य हठेन । मकरवक्त्रदंष्ट्राङ्कुरात् । जलग्राहवदनदंष्ट्राग्रात् । मणिं रत्नं उद्धरेत गृह्णीयात् । तथा समुद्रमपि सागरमपि संतरेत् तीर्त्वा परं पारं गच्छेत् । किंलक्षणं समुद्रम् । प्रचलदूर्मिमालाकुलम् । प्रचलन्त्यः उच्छलन्त्यो याः ऊर्मयः कल्लोलास्तासां मालाः श्रेणयस्ताभिः आकुलः व्याप्तस्तम् । तथा कदाचित्कोपितं क्रुद्धं भुजंगमपि सर्पमपि शिरसि मस्तके पुष्पवत् कुसुमेन तुल्यं धारयेत् बिभृयात् । तु पुनः । प्रतिनिविष्टमूर्खजनचित्तं, प्रतिनिविष्टः सन्मुखं स्थितः यः मूर्खजनस्तस्य चित्तं अन्तःकरणम् । अथ वा प्रतिनिविष्टं हृताग्रहं यत् मूर्खजनचित्तं तत् न आराधयेत न संतोषयेत् ॥ ३ ॥

लभेत सिकतासु तैलमपि यत्नतः पीडय-
न्पिबेच्च मृगतृष्णिकाजलमथं पिपासार्दितः ।
कदाचिदपि पर्यटञ्शशविषाणमासादये-
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ॥ ४ ॥

[ १ अ. °सुसलिलं ]

अयं पुमान् । कदाचिदपि सिकतासु वालुकासु तैलमपि स्नेहमपि लभेत प्राप्नुयात् । किं कुर्वन् । यत्नतः प्रयत्नमासाद्य पीडयन् संमर्दयन् सन् । च पुनः । मृगतृष्णिकाजलं मृगतृष्णिका मरुमरीचिका तस्यां जलं पानीयं पिबेत पिबेत् । किंलक्षणः पिपासार्दितः । पिपासया तृषया अर्दितः पीडितः । कदाचिदयं पुमान् शशविषाणं शशकस्य विषाणं शृङ्गं आसादयेत् प्राप्नुयात् । तु पुनः । प्रतिनिविष्टमूर्खजनचित्तं न आराधयेत् । देवयोगात्कदाचिदेतानि वस्तूनि सुकराणि परं तु न कदाचिदपि मूर्खजनचित्तानुकूल्यं सुकरमित्यर्थः ॥ ४ ॥

शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे ॥ ५ ॥

एतानि सप्त वस्तूनि मम मनसि । शल्यानि शल्यवत् व्यथकानि भवन्ति । तानि कानीत्याह । एकः शशी चन्द्रमाः मम मनसि शल्यमिव व्यथको भवति । किंलक्षणः शशी । दिवसधूसरः । दिवसेन-वासरेण निमित्तेन धूसरः ईषत्पाण्डुरः । निस्तेजा इत्यर्थः । तथा कामिनी नारी अपरं शल्यम् । किंलक्षणा । गलितयौवना । गलितं गतं यौवनं तारुण्यदर्पं रूपदर्पसंपत्तिर्यस्याः सा तथा । तथा सरः तडागमेकं शल्यं भवति । किंलक्षणम् । विगतवारिजम् । विगतानि नष्टानि वारिजानि कमलानि यस्मात्तत्तथा गतकमलमित्यर्थः । तथा स्वाकृतेः सु शोभना आकृतिराकारो यस्य स तथा । तस्य शोभनाकारसंपन्नस्य पुंसः मुखं वदनमेकं शल्यं भवति । किंलक्षणं मुखम् । अनक्षरं न अक्षरं शास्त्रं यस्मिंस्तत्तथा । तथा प्रभुः सेव्यः स्वामी एकं शल्यम् । किंलक्षणः । धनपरायणः धनसंग्रहतत्परः । राज्ञा ह्युदारेण भवितव्यम् । तथा सज्जनः संश्चासौ जनश्च सज्जनः साधुर्जनः एकं शल्यं भवति । किंलक्षणः सज्जनः । सततदुर्गतः । सततं निरन्तरं दुर्गतः दरिद्रः धनवस्त्रान्नादिविहीनः । एतानि वस्तूनि रमणीयाकृतीनि पूर्वावस्थात्यागेन शोच्यानि भवन्तीत्यर्थः । तथा खलो दुर्जनः एकं शल्यं भवति । किंलक्षणः । नृपाङ्गणगतः । नृपस्य राज्ञोंऽगणेऽभ्यन्तराजिरे गतः । खलस्तथागतश्चेत्तर्हि सर्वप्राणिनां मूलान्यपि निकृन्तति । तस्य महापापरूपत्वादित्यर्थः ॥ ५ ॥

मणिः शाणोल्लीढः समरविजयी हेतिनिहतो
मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः ।
कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता-
स्तनिम्ना शोभन्ते गलितविभवाश्चार्थिषु जनाः ॥ ६ ॥

[ १ रा. 'लेश' इति मूले. ]

एते पदार्थाः । तनिम्ना । तनोः कृशस्य भावः तनिमा । तया ( तेन ) तनिम्ना कृशत्वेन । शोभन्ते विराजन्ते । एते के । मणिः रत्नम् । किंलक्षणः । शाणोल्लीढः । शाणेन घर्षणलोहेन उल्लीढः घर्षितः । हीरको हि घर्षितः समीचीनो महार्घो रूपवांश्च भवति । तथा समरविजयी संग्रामे विजयवान् पुमान्

तनिम्ना राजते । किंभूतः समरविजयी । हेतिनिहतः । हेतिभिरायुधैर्निहतः क्षतः क्षतः सन् विजयीत्यर्थः । तथा नागः हस्ती तनिम्ना शोभते । किंभूतो नागः । मदक्षीणः । मदेन दानभ्र( भ्र )वणेन क्षीणः । तथा सरितो नद्यः तनिम्ना शोभन्ते ङ । शरदि । घनागम ऋतौ । किंभूताः सरितः । श्यानपुलिनाः । श्यानानि घृष्टानि पुलिनानि तटानि यासां ताः । तथा चन्द्रः तनिम्ना शोभते । किंभूतः । कलाशेषः कला षोडशो भागः शेषो यस्यासौ तथा । तथा बालवनिताः कोमलाङ्गनाः । अथ वा अप्रौढवध्वः । तनिम्ना शोभन्ते । किंभूताः । सुरतमृदिताः । सुरते संभोगे मृदिता मर्दिताः । च पुनः जना लोकास्तनिम्ना शोभन्ते । किंभूताः । अर्थिषु याचकेषु विषये गलितविभवाः गलितः क्षीणो विभवो धनं येषां ते तथा ॥ ६ ॥

परिक्षीणः कश्चित्स्पृहयति यवानां प्रसृतये
स पश्चात्संपूर्णो गणयति धरित्रीं तृणसमाम् ।
अतश्चानैकान्त्याद्गुरुलघुतयार्थेषु धनिना-
मवस्था वस्तूनि प्रथयति च संकोचयति च ॥ ७ ॥

कश्चित्पुरुषः परिक्षीणः । गतविभवः सन् । यवानां शूकधान्यानाम् । प्रसृतये संहताञ्जलये । स्पृहयति वाञ्छति । यवानां प्रसृतिं वाञ्छतीत्यर्थः । स पुरुषः पश्चात् दरिद्रानुभवनानन्तरं संपूर्णः । प्राप्तधनः सन् । धरित्रीं तृणसमां तृणमिव गणयति मन्यते । अतश्च । एतस्मात्कारणादनुमीयते । अनैकान्त्यात् । न एकान्तस्य भावः अनैकान्त्यं तस्मात् । अनेकप्रकारात् । गुरुलघुतया । गुरुश्चासौ लघुश्च गुरुलघुस्तस्य भावस्तत्ता तया बहुत्वात्वेन धनिनां धनवतां अर्थेषु पदार्थेषु । अवस्था निष्ठा वस्तूनि पदार्थान् प्रथयति पृथूनि करोति । चान्यत्संकोचयति स्वल्पयति । एतेन यस्य यादृक् विभवः तस्य वस्तुषु तादृश्येवानास्थेत्यर्थः ॥ ७ ॥

शास्त्रोपस्कृतशब्दसुन्दरगिरः शिष्यप्रदेयागमा
विख्याताः कवयो वसन्ति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियो ह्यर्थं विनापीश्वराः
कुत्स्याः स्युः कुपरीक्षका न मणयो यैरर्थतः पातिताः ॥ ८ ॥

[ १ रा. थ. घ अनयोः सादृश्यं दृश्यते ]

यस्य प्रभोः राज्ञः विषये राष्ट्रे विख्याताः सर्वलोकेषु प्रसिद्धाः कवयो विद्वांसः निर्धनाः धनविनाकृताः सन्तः वसन्ति वर्तन्ते । किंलक्षणाः । शास्त्रेण व्याकर-

णादिना उपस्कृता अलंकृता ये शब्दा वचनानि तैः सुन्दराः शोभना गिरो वाण्यो येषां ते तथा । पुनः किं० । शिष्यप्रदेयागमाः । शिष्येभ्योऽन्तेवासिभ्यः प्रदेया दातुं योग्या आगमा वेदा येषां ते तथा । शिष्यान्पाठयन्त इत्यर्थः । तद् पण्डितानां निर्धनत्वेन वसनं वसुधाधिपस्य भूपतेः जाड्यम् । जडस्य भावः मौर्ख्यम् । पुनः हि यस्मात्ते सुधियः शोभनबुद्धयः । पण्डिताः अर्थं विनापि धनं विनापि ईश्वराः प्रभवः जगन्मान्या इत्यर्थः । यतः ते कुपरीक्षकाः कुपरीक्षितारः कुत्स्याः स्युर्निन्या भवेयुः न मणयः न हीरका निन्याः स्युः । यैः कुपरीक्षकैस्ते मणयः अर्थतः मूल्यतः पातिताः । कुपरीक्षकान धिगस्तु । मणीनां को दोष इति भावः ॥ ८ ॥

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ९ ॥

[ १ अ. °रतिं ]

हि । इति निश्चितम् । इदं महात्मनां प्रकृतिसिद्धम् । महानुभावानां पुंसां प्रकृत्या स्वभावेन सिद्धं निष्पन्नं अस्ति । इदं किम् । यत् विपदि कष्टप्राप्तौ धैर्यं धीरत्वं स्यात् । अथ पश्चात् विपदनन्तरं अभ्युदये उदयसमये क्षमा क्षान्तिः । तथा सदसि सभायाम् । वाक्पटुता वाचि वाण्यां पटुः वाक्पटुः । तस्य भावस्तत्ता वाग्मित्वम् । पक्षपातरहितेन वादित्वमित्यर्थः । तथा युधि संग्रामे विक्रमः पराक्रमः अपलायनमित्यर्थः । च पुनः यशसि कीर्तौ अभिरुचिः प्रीतिः । अपकीर्तिभीतिमत्त्वमित्यर्थः । तथा श्रुतौ वेदशास्त्रार्थश्रवणे व्यसनं आसक्तिः ॥ ९ ॥

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ॥ १० ॥

धियं बुद्धिं ईरयन्ति विचारेण सर्वतः प्रवर्तयन्ति ते धीराः । धीमन्तः पुरुषाः । न्याय्यात् न्यायावनपेतो न्याय्यः तस्मात् । युक्ताद्वित्यर्थः । पथः मार्गात् । पदं पदन्यासमपि ईषदित्यर्थः । न प्रविचलन्ति न स्खलन्ति । यदि

येषु । नीतिनिपुणाः न्यायकुशलाः पुमांसः निन्दन्तु । न्याय्यकर्मणि क्रियमाणे धिक्कुर्वन्तु । वा अथ वा स्तुवन्तु साधु वर्णयन्तु । अथ लक्ष्मीः संपत् । समाविशतु आगच्छतु । वा अथ वा यथेष्टं स्वेच्छया गच्छतु । तत्र तेषां नाग्रह इत्यर्थः । वा अथवा । अथैव इदानीमेव मरणं प्राणत्यागोऽस्तु भवतु । वा युगान्तरे आगामिनि युगे अस्तु ॥ १० ॥

हर्तुर्याति न गोचरं किमपि शं पुष्णाति यत्सर्वदा
ह्यर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं पराम् ।
कल्पान्तेष्वपि न प्रयाति निधनं विद्याख्यमन्तर्धनं
येषां तान्प्रति मानमुज्झत नृपाः कस्तैः सह स्पर्धते ॥ ११ ॥

हे नृपाः राजानः । तान्प्रति मानं अहंकारं उज्झत त्यजत । यतः तैः सह कः स्पर्धते कः स्पर्धां कुर्यात् । तैः कैः । येषां विद्याख्यं विद्यारूपं अन्तर्धनं विद्यते । यत् विद्याख्यं धनं हर्तुः । हरतीति हर्ता । तस्य चौरस्य गोचरं दृष्टिविषयं न याति न प्राप्नोति । अन्यद्धनं चौरस्य दृष्टिविषयं याति । इदं तु न । पुनः यद्धनं विद्याख्यं सर्वदा सर्वकालं किमपि अनिर्वचनीयं शं सुखं पुष्णाति । इदं तु राजादिभयान्न । पुनः यत् विद्याधनं अनिशं निरन्तरं अर्थिभ्यः विद्यार्थिभ्यः प्रतिपाद्यमानं दीयमानं सत् परां उत्कृष्टां वृद्धिं वर्धनं प्राप्नोति । अन्यद्धनं तु दीयमानं क्षीयते । यच्च धनं कल्पान्तेष्वपि जन्मान्तरेष्वपि निधनं नाशं न प्रयाति । विद्यायाः आसप्तजन्मसहगामित्वात् । अतस्तैर्विद्वद्भिः सह कः स्पर्धते ॥ ११ ॥

अधिगतपरमार्थान्पण्डितान्मावमंस्था-
स्तृणमिव लघुलक्ष्मीर्नैव तान्संरुणद्धि ।
अभिनवमदलेखाश्यामगण्डस्थलानां
न भवति विशतन्तुर्वारणं वारणानाम् ॥ १२ ॥

[१रा. टी० 'गल्ल' इत्यपि पाठः]

हे राजन् त्वं पण्डितान्विदुषः मावमंस्थाः । मा अवगणय । किंलक्षणान् । अधिगतपरमार्थान् । अधिगतः प्राप्तः परमार्थो भगवत्तत्त्वं संसारयाथात्म्यं वा यैस्ते तथा तान् । यतः कारणात् लघुलक्ष्मीः लघुश्चासौ लक्ष्मीश्च वराकी श्रीः तान्पण्डितान्नैव संरुणद्धि न वशीकरोति । ते लक्ष्म्यायत्ता न भवन्तीत्यर्थः । किमिव । तृणमिव । यथा तृणं यवसं कंचिदपि न संरुणद्धि । तत्र दृष्टान्तः । विशतन्तुः पद्मिनीतन्तुर्वारणानां गजेन्द्राणां वारणं बन्धनं न भवति । न हि विशेन गजा बध्यन्ते इत्यर्थः । किंलक्षणानां वारणानाम् । अभिनवमदलेखाश्यामगण्डस्थलानाम् । अभिनवा नूतना या मदलेखाः दानराजयः । ताभिः श्यामानि कृष्णानि मलिनानि गल्लस्थलानि कपोलभित्तयो येषां ते तथा । तेषाम् ॥ १२ ॥

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि कष्टां दशा-
मापन्नोऽपि विभिन्नदीधितिरपि प्राणेषु गच्छत्स्वपि ।
मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः
किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥१३॥

[१ रा. टी० विपन्नदीधितिरपि ]

केसरी सिंहः किं जीर्णं शीर्णं तृणं यवसं अत्ति भक्षयति । अपि तु न । किंलक्षणः । दैवात् क्षुत्क्षामोऽपि । क्षुधा बुभुक्षया क्षामः दुर्बलोऽपि । पुनः किं० । जराकृशोऽपि । जरसा वार्धक्येन कृशः दुर्बलोऽपि । पुनः किं० । शिथिलप्रायोऽपि । शिथिलो बलीव्याप्तः । तस्मादीषन्न्यूनः । बलीभिराक्रान्तः । पुनः किं० । कष्टां कष्टवतीं दशामवस्थां आपन्नः प्राप्तोऽपि । पुनः किं० । विपन्नदीधितिरपि । विपन्ना अस्तमिता दीधितयः तेजांसि यस्य स तथा । गतप्रभाव इत्यर्थः । केषु सत्सु । प्राणेषु पञ्चसु सूत्रेषु ( भूतेषु ? ) गच्छत्स्वपि शाम्यत्स्वपि । पुनः किंलक्षणः । मत्तेभेन्द्रविभिन्नकुम्भकवलग्रासैकबद्धस्पृहः । मत्ताश्च ये इभेन्द्राः गजेन्द्राः तेषां विभिन्ना मदं स्रवन्तो ये कुम्भाः शिरःपिण्डास्तेषां कवलः अदनमात्रा । तस्य ग्रासः ग्रसनं तत्र एका बद्धा धृता स्पृहा येन स तथा । पुनः किं० । मानमहतां मानेन अहंकारेण ये महान्तः अतिमौढास्तेषां अग्रेसरः मुख्यः । महाहंकारी इत्यर्थः ॥ १३ ॥

विपद्युच्चैः स्थेयं पदमनुविधेयं च महतां
प्रिया न्याय्या वृत्तिर्मलिनमसुभङ्गेऽप्यसुकरम् ।
असन्तो नाभ्यर्थ्याः सुहृदपि न याच्यः कृशधनः
सतां केनोद्दिष्टं विषममसिधाव्रतमिदम् ॥ १४ ॥

सतां सत्पुरुषाणाम् । इदं विषमं दुर्धरं असिधाराव्रतम् । 'असिधारा खड्गधारा तद्वद् दुःशक्यं व्रतं आचरणम् । केन उद्दिष्टं केन कथितम् । किं तद्व्रतम् । यद् विपदि आपदि सत्यां उच्चैः स्थेयं महत्त्वेन स्थातव्यम् । तथा महतां गरीयसां पदं व्यवसायः अनुविधेयं अनुसर्तव्यम् । तथा न्याय्या न्यायात् आगता प्राप्ता वृत्तिः वर्तनं प्रिया अभीष्टा । तथा मलिनं पापम् । असुभङ्गेऽपि प्राणहानावपि असुकरं न सुखेन क्रियते । असन्तः अज्ञातारः अधमा वा न अभ्यर्थ्याः न याचनीयाः । सुहृदपि मित्रमपि कृशधनः स्वल्पधनः सन् न याच्यो नाभ्यर्थ्य इति ॥ १४ ॥

मनसि वचसि काये पुण्यपीयूषपूर्णा-
त्रिभुवनमुपकारश्रेणिभिः प्रीणयन्तः ।
परगुणपरमाणून्पर्वतीकृत्य नित्यं
निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ॥ १५ ॥

[ १ रा. मूले 'पूरयन्ता' इत्यपि पाठः ]

जगति एवंविधाः कियन्तः कियत्परिमाणाः सन्तः सत्पुरुषाः सन्ति । किंलक्षणाः । मनसि मानसे । वचसि वाण्याम् । काये शरीरे । पुण्यं सुकृतमेव पीयूषममृतं तेन पूर्णाः संभृताः । एतेन मनसा वाचा कर्मणा च सर्वेषामुपकारवन्त इत्यर्थः । अतः पुनः किंवि० । उपकारश्रेणिभिः उपकाराः सर्वजीवानां हिताचरणानि तेषां श्रेणयः परम्पराः ताभिः त्रिभुवनं लोकत्रयं प्रीणयन्तः हर्षयन्तः । पुनः किं० । परगुणपरमाणून् । परेषां अन्येषां ये गुणाः शौर्यौदार्यकारुण्यादयः त एव परमाणवः अत्यल्पपरिमाणाः वैशेषिककल्पिताः जगत्कारणानि पदार्थाः । तदुक्तं 'जालान्तरगते भानौ यत्सूक्ष्मं दृश्यते रजः । तस्य त्रिंशत्तमो भागः परमाणुः स उच्यते ।' इति । तान्पर्वतीकृत्य अपर्वतान्पर्वतान् कृत्वेति पर्वतप्रायान् विधाय । निजहृदि स्वचेतसि । विकसन्तः प्रमोदं प्राप्नुवन्तः । संतुष्यमाणा इत्यर्थः ॥ १५ ॥

इतः स्वपिति केशवः कुलमितस्तदीयद्विषा-
मितश्च शरणार्थिनः शिखरिपक्षिणः शेरते ।
इतोऽपि वडवानलः सह समस्तसंवर्तकै-
रहो विततमूर्जितं भरसहं च सिन्धोर्वपुः ॥ १६ ॥

इतः । एकस्मिन्पक्षे । केशवः श्रीनारायणः । स्वपिति शेते । इतः । एकस्मिन्पार्श्वे । तदीयद्विषां श्रीविष्णुद्रुहां असुराणां कुलं समूहः वसति । च पुनः । इतः । एकस्मिन् पक्षे । शिखरिपक्षिणः शिखरिणः पर्वता एव पक्षिणः पक्षिणः शेरते स्वपन्ति । किंलक्षणाः । शिखरिणः । शरणार्थिनः शरणस्य त्राणस्यार्थिनः । च पुनः । इतः । एकस्मिन्पक्षे । समस्तसंवर्तकैः सकलजलचरजीवविशेषैः सह । अथ वा समस्तकल्पान्तकालाग्निभिः सह वडवानलः और्वाग्निः वसति । अहो इत्याश्चर्ये । विभवं मूर्छितं पाठान्तरे । विततं विस्तीर्णं ऊर्जितं उद्भटम् । च पुनः । भरसहं सिन्धोः समुद्रस्य वपुः शरीरं वर्तते ॥ १६ ॥

उदन्वच्छन्ना भूः स च निधिरपां योजनशतैः
सदा पान्थः पूषा गगनपरिमाणं कलयति ।
इति प्रायोभावाः स्फुरदवधिमुद्रामुकलिताः
सतां प्रज्ञोन्मेषः पुनरयमसीमा विजयते ॥ १७ ॥

[ १ अ. प्राज्ञो° ]

भूः पृथिवी । उदन्वच्छन्ना । समुद्रेण छन्ना छादिता । च पुनः । सः अपां निधिः समुद्रः योजनशतैर्मितो वर्तते । पुनः सदा पान्थः पथि वर्तमानः पुत्रा श्रीसूर्यः । गगनपरिमाणं आकाशस्येयत्तां कलयति जानाति । इति कृत्वा सर्वे भावाः पदार्थाः स्फुरदवधिमुद्रामुकुलिताः स्फुरन्प्रसरन् यः अवधिः मर्यादा तस्य मुद्रा स्फुटनं तेन मुकुलिताः क्रोडीकृताः । पुनः । अयं सतां साधुपुरुषाणां प्रज्ञोन्मेषः प्रज्ञाया बुद्धेरुन्मेषः । विकाशो विजयते उत्कर्षेण वर्तते । किंलक्षणः । असीमा । न सीमा इयती एतावती वेति सीमा मर्यादा यस्य स तथा ॥ १७ ॥

क्वचिद्भूमौ शय्या क्वचिदपि च पर्यङ्कशयनं
क्वचिच्छाकाहारः क्वचिदपि च शाल्योदनरुचिः ।
क्वचित्कन्थामाली क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी गणयति न दुःखं न च सुखम् ॥१८॥

[१ रा. क्वचित्कन्थामाला इति मूलपाठः । 'धारी' इति टीकायाम् ]

मनस्वी । प्रशस्तं मनो यस्य सः । अहंकारी पुरुषः । कार्यार्थी । कार्यस्यार्थः प्रयोजनं यस्य स तथा सन् दुःखं न गणयति । न मन्यते । च पुनः । सुखं न गणयति । न विचारयति । यतः कार्यवशात् क्वचिद्भूमौ शय्या शयनं भवति । क्वचित् कदाचित् पर्यङ्कशयनं पर्यङ्के तल्पे शयनं भवति । क्वचित् शाकाहारः । शाकैर्मूलपत्रफलादिभिः आहारो भोजनं भवति यस्य । च पुनः । क्वचिदपि कदाचिदपि शाल्योदनरुचिः । शालीनां तण्डुलानां (ओ)दने भक्ते रुचिः प्रीतिर्यस्य स तथा । क्वचित्कन्थाधारी । मार्गपतितशीर्णवसनखण्डैर्निर्मितं वस्त्रं कन्था । तां धारयति बिभर्ति इति तथा भवति । क्वचिदपि च दिव्याम्बरधरः । दिव्यवस्त्रपरिधानवान् भवति ॥ १८ ॥

ये संतोषसुखप्रमोदमुदितास्तेषां न भिन्ना मुदो
ये त्वन्ये धनलुब्धसंकुलधियस्तेषां न तृष्णा हता ।
इत्थं कस्य कृते कृतः स विधिना तादृक्पदं संपदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥ १९ ॥

ये पुरुषाः संतोषसुखप्रमोदमुदिताः । संतोष एव सुखं तेन प्रमोदो हर्षः तेन मुदिता आनन्दिताः । तेषां मुदो हर्षा न भिन्नाः न नष्टाः । ते सदैवानन्दिता इत्यर्थः । तु पुनर्येऽन्ये वर्तन्ते । किंभूताः । धनलुब्धसंकुलधियः । धने लुब्धा लोभवती । अत एव संकुला आकुला धीर्बुद्धिर्येषां ते तथा भवन्ति तेषां तृष्णा लोभातिशयो न हता नापनीता । इत्थमेवं सति विधिना दैवेन ब्रह्मणा वा

मेरुः सुवर्णपर्वतः ताहक्संपदां लक्ष्मीनां पदं स्थानं कस्य कृते कस्यार्थे कृतो विनिर्मितः । स मेरुः म मह्यं न रोचते नाभिलाषविषयो भवति । किं० मेरुः । स्वात्मन्येव स्वस्वरूपे एव समाप्तहेममहिमा । समाप्तः क्षयं नीतः हेममहिमा सुवर्णमाहात्म्यं यस्य स तथा ॥ १९ ॥

नमस्यामो देवाननु हतविधेस्तेऽपि वशगा
विधिर्वन्द्यः सोऽपि प्रतिनियतकर्मैकफलदः ।
फलं कर्मायत्तं यदि किममरैः किं च विधिना
नमस्तत्कर्मभ्यो विधिरपि न येभ्यः प्रभवति ॥ २० ॥

ननु निश्चितम् । देवान् नमस्यामो नमस्कुर्मः । तेऽपि देवा अपि । हतविधेः निन्द्यदैवस्य वशगाः वशवर्तिनः । तर्हि विधिर्वन्द्यः । दैवं नमस्करणीयम् । सोऽपि विधिरपि । प्रतिनियतकर्मैकफलदः । प्रतिनियतं नियमितं यत्कर्म तस्य एकं मुख्यं केवलं वा फलं ददातीति तथा । यदि चेत्फलं कर्मायत्तं कर्मणः आयत्तं अधीनं भवति तदा अमरैर्देवैः किम् । च । अन्यत् । विधिना दैवेन किं कोऽर्थः । न कश्चिदित्यर्थः । तत्तस्मात्कारणात् कर्मभ्यो नमः । नमस्कारोऽस्तु । यतो येभ्यः कर्मभ्यो विधिरपि न प्रभवति । प्रभुः समर्थो न भवति । यद् कर्मोपार्जितं सुखं दुखं वा अन्यथाकर्तुं न शक्नोतीत्यर्थः ॥ २० ॥

ब्रह्मा येन कुलालवन्नियमितो ब्रह्माण्डभाण्डोदरे
विष्णुर्येन दशावतारगहने क्षिप्तो महासंकटे ।
रुद्रो येन कपालपाणिपुटके भिक्षाटनं कारितः
सूर्यो भ्राम्यति नित्यमेव गगने तस्मै नमः कर्मणे ॥ २१ ॥

[ १ अ. सदा ]

कर्मणोऽवश्यं फलदातृत्वेन सर्वेभ्यः श्रेष्ठत्वमिति वक्तुं देवान् उपहसन्निव कर्म प्रस्तौति । तस्मै कर्मणे नमः । तस्मै कस्मै । येन कर्मणा ब्रह्मा जगत्स्रष्टा ब्रह्माण्डभाण्डोदरे । ब्रह्माण्डं स्पष्टं तदेव भाण्डमधिकरणमत्रं तस्योदरे मध्ये नियमितः नियमवान् कृतः । ब्रह्माण्डभाण्डानि विधातुं व्यापारित इत्यर्थः । किंत( व )त् कुलालवत् कुम्भकारवत् । यथा कुलालो भाण्डानि अमत्रनालिकादीनि विधातुं नियम्यते । तथा येन कर्मणा विष्णुः श्रीनारायणो नाम स्मरणमात्रेणावतारदुर्गतिनिरसनोऽपि महासंकटे अतिसंबाधरूपे दशावतारगहने । दश च ते अवताराश्च त एव गहनं विपिनं कष्टं वा तस्मिन् क्षिप्तः अस्तः । एतेन भगवान् स्वेच्छया विश्वपालनायावतरन्नपि अवतारवानिव भवतीति कर्मणो जनान् भाषयितुमिदमुक्तं भवतीति ज्ञातव्यम् । अन्यथा सच्चिदानन्दघनस्य जगदाधारस्य परब्रह्मणः कथमवतारसंकटमलमति-

विस्तरेण । तथा रुद्रः श्रीमहादेवो येन कर्मणा कपालपाणिपुटके कपालं तुम्बी-फलशकलं तदेव पाणिपुटकं हस्तपुटकं तस्मिन् भिक्षाटनं भिक्षायै याचनाया अटनं भ्रमणं प्रापितः । यो हि भगवानुमापतिर्महेश्वरो यत्करुणादृगञ्चलविलोकितो वराकोऽपि चक्रवर्तीन्द्रपदप्रभुः सर्वसंपदां भाजनं च भवति स पारमहंस्यं धर्मं अन्यान् शिक्षयितुं तथा प्रवर्तमानः सन् भिक्षामटतीति ज्ञातव्यम् । अन्यथा चराचरगुरोर्विश्वपालकस्य भगवतः कथमिदमनुचितं भिक्षाचरणमित्यलमतिविस्तरेण । तथा येन कर्मणा श्रीसूर्यः नित्यमेव सदैव गगने भ्राम्यति प्रचलति । श्रीसूर्य इत्युपलक्षणं चन्द्रादयो ग्रहा अपि भ्रमन्ति । इदमत्र तत्त्वम् । यो हि भगवान्कर्मसाक्षी अहोरात्रेण लोकयात्रां प्रवर्तयन् भ्रमति । अत्र भ्रमणेनोपचारात् कर्मनुन्न इव भवतीत्यलमतिविस्तरेण ॥ २१ ॥

दौर्मन्त्र्यान्नृपतिर्विनश्यति यतिः सङ्गात्सुतो लालना-
द्विप्रोऽनध्ययनात्कुलं कुतनयाच्छीलं खलोपासनात् ।
ह्रीर्मद्यादनवेक्षणादपि कृषिः स्नेहः प्रवासाश्रया-
न्मैत्री चाप्रणयात्समृद्धिरनयात्त्यागात्प्रमादाद्धनम् ॥२२॥

दौर्मन्त्र्यात् । दुः दुष्टो मन्त्री सचिवो यस्य स दुर्मन्त्री । तस्य भावो दौर्म-न्त्र्यं तस्मात् नृपतिः राजा विनश्यति विनाशं प्राप्नोति । तथा यतिः तपस्वी सङ्गात् जनसंगतेः विनश्यति । ब्रह्मचारी सङ्गाद्भ्रष्टा भवतीत्यर्थः । सुतः पुत्रः । लाल-नात् । अतिसंतोषणाद्विनश्यति । विप्रो ब्राह्मणः । अनध्ययनात् पठनेन विना विनश्यति । तथा कुलं अन्वयः । कुतनयात् कुपुत्रोत्पत्तेर्विनश्यति । तथा शीलं सुस्वभावः स्वाचरणं वा । खलोपासनात् दुर्जनसहचाराद्विनश्यति । ह्रीर्मद्याद्विन-श्यति । लज्जा मद्यपानाद्विनश्यति । तथा कृषिः कर्षणं क्षेत्रान्युप्तधान्यं अनवे-क्षणात् अनवलोकनाद्विनश्यति । तथा स्नेहः प्रीतिः प्रवासाश्रयात् परदेशवासाश्रयाद्वि-न( श्यति ) । च पुनः मैत्री मित्रत्वं अप्रणयात् अविनयाद्विनश्यति । तथा समृद्धिः संपत्तिः । अनयान्नीतिविरोधाद्विन( श्यति ) । तथा धनं द्रविणं त्यागात् दानात् पुनः प्रमादात् असावधा( न )तायाश्च विनश्यति ॥ २२० ॥

जाड्यं ह्रीमति गण्यते व्रतरुचौ दम्भः शुचौ कैतवं
शूरे निर्घृणतार्जवे विमतिता दैन्यं प्रियालापिनि ।
तेजस्विन्यवलिप्तता मुखरता वक्तर्यशक्तिः स्थिरे
तत्को नाम गुणो भवेत्स गुणिनां यो दुर्जनैर्नाङ्कितः॥२३॥

० [१ अ. पुस्तके २२–२३ श्लोकयोः पौर्वापर्यं व्यत्यस्तम् ]

तत् तर्हि । गुणिनां सद्गुणवतां पुरुषाणाम् । स कः गुणः लज्जाविनयादिर्भवेत् । यो दुर्जनैः खलैः न अङ्कितो न कलङ्कितः । नामेति निश्चये संबोधने वा । यत् ह्रीमति । ह्रीर्लज्जा विद्यते यस्य स ह्रीमान् । तस्मिन् । जाड्यं जडस्य भावो मौर्ख्यं गण्यते निर्णीयते । कथ्यत इत्यर्थः । व्रतरुचौ व्रतेषु सदाचारेषु रुचिः प्रीतिर्यस्य स व्रतरुचिस्तस्मिन् । व्रतशीले दम्भः । पाषण्डो गण्यते । तथा शुचौ पवित्रे पुरुषे । दुर्जनैरिति प्रतिक्रियं संबध्यते । कैतवं ( कि )तवस्य धूर्तस्य भावः गण्यते । कपटं ज्ञायत इत्यर्थः । तथा खलैः शूरे धीरे पुरुषे । निर्घृणता निर्दयत्वं निर्लज्जत्वं वा गण्यते । आर्जवे । ऋजोः सरलस्य भावो यस्य स आर्जवः । तस्मिन् । आर्जववति पुरुषे । विमतिता । विगता मतिः यस्मात् स विमतिः । तद्भावस्तत्ता । गतबुद्धित्वं गण्यते । तथा प्रियालापिनि । प्रियं मधुरमालपतीति तस्मिन् । मधुरभाषिणि पुरुषे । दैन्यं दीनस्य वराकस्य भावः गण्यते । तथा । तेजस्विनि । तेजः प्रभावो बलं दीप्तिर्विद्यते यस्य स तेजस्वी । तस्मिन् । तेजस्विनि पुंसि । अवलिप्तता । अवलिप्तस्य भावः समदत्वं गण्यते । तथा । वक्तरि भाषणशीले पुंसि मुखरता । मुखरस्य भावः वावदूकत्वं गण्यते । तथा । स्थिरे । स्थिरस्वभावे पुंसि । अशक्तिः अक्षमत्वं गण्यते ॥ २३ ॥

जातिर्यातु रसातलं गुणगणस्तस्मादधो गच्छता-
च्छीलं शैलतटात्पतत्वभिजनः संदह्यतां वह्निना ।
शौर्ये वैरिणि वज्रमाशु निपतत्वर्थोऽस्तु नः केवलं
येनैकेन विना गुणास्तृणलवप्रायाः समस्ता इमे ॥२४॥

जातिर्व्यक्तिर्वर्णः ब्राह्मणत्वादिः रसातलं पातालं यातु गच्छतु । गुणगणः गुणानां शौर्यौदार्यचातुर्यादीनां गणः समूहः । तस्मात् । पातालादधो नीचैर्गच्छतात् गच्छतु । तथा शीलं ब्रह्मचर्यम् । शैलतटात्पर्वतशृङ्गात् पततु भ्रस्यतु । भज्यतामित्यर्थः । तथा अभिजनः कुलम् । वह्निना वैश्वानरेण । दह्यतां भस्मीभवतु । तथा वैरिणि शत्रुभूते । अनुपकारिणीत्यर्थः । शौर्ये शूरत्वे । आशु शीघ्रम् । वज्रो निपततु । विद्युत्पातोऽस्तु । एतैरुक्तैरस्माकं प्रयोजनं नास्तीत्यर्थः । यतः । नोऽस्माकं केवलं एकः अर्थः धनमस्तु भवतु । यतो येन एकेन अर्थेन विना इमे समस्ताः सकलाः गुणाः जात्यादयः । तृणलवप्रायाः । तृणस्य लवश्छेदः । तस्मात् । ईषन्न्यूना भवन्ति । अकिंचित्कराः सन्तीत्यर्थः ॥ २४ ॥

भग्नाशस्य करण्डपिण्डिततनोर्म्लानेन्द्रियस्य क्षुधा
छित्वाखुर्विवरं स्वयं निपतितो नक्तं मुखे भोगिनः ।
तृप्तस्तत्पिशितेन सत्वरमसौ तेनैव यातः पथा
स्वस्थास्तिष्ठत दैवमेव हि नृणां वृद्धौ क्षये चाकुलम् ॥२५॥

[ १ अ. पीडित ' पिण्डिततनो इत्यपि पाठः ' इति प्रान्ते ]

हे पुरुषाः स्वस्थाः अनाकुलाः तिष्ठत वर्तध्वम् । हि यतः कारणान्नृणां पुरुषाणां दैवमेव । शुभाशुभोत्पन्नं भाग्यमेव । वृद्धौ । वृद्धिनिमित्तम् । क्षये च । क्षयनिमित्तम् । स्वयमाकुलमुत्सुकं शीघ्रतरमित्यर्थः । वर्तते । यतः आखुर्मूषकः । पर्यविघस्य भोगिनः । सर्पस्य मुखे स्वयमेव आत्मनैव विवरं छिद्रं कृत्वा निपतितः । किंलक्षणस्य भोगिनः । भग्नाशस्य भग्ना नष्टा आशा जीवितेच्छा यस्य स तथा तस्य । पुनः किंलक्षणस्य । करण्डपिण्डिततनोः । करण्डेन बांशिकभाण्डेन । पिण्डिता पिण्डवत्कृता तनुः शरीरं यस्य स तथा तस्य । पुनः किंलक्षणस्य । क्षुधा बुभुक्षया । ग्ला(म्ला)-नेन्द्रियस्य ग्ला( म्ला ? )नानि शुष्कानि( णि ? ) इन्द्रियाणि चक्षुरादीनि यस्य स तथा तस्य । असौ भोगी तत्पिशितेन तस्य मूषकस्य पिशितं मांसं तेन तृप्तः प्रीणितः सन् सत्वरं शीघ्रं यथा स्यात्तथा तेनैव पथा मूषककृतेनैव मार्गेण यातः गतः ॥ २५ ॥

पातितोऽपि कराघातैरुत्पतत्येव कन्दुकः ।
प्रायेण हि सुवृत्तानामस्थायिन्यो विपत्तयः ॥ २६ ॥

[१ रा. टीकायां ' साधुवृत्तानां ']

साधुवृत्तानां सदाचाराणां पुरुषाणाम् । विपत्तयः कष्टानि । अस्थायिन्यः । न तिष्ठन्तीत्येवंशीला भवन्ति । तत्र दृष्टान्तः । कन्दुकः सूत्रकृतः क्रीडनकीयगुच्छः । कराघातैः । करेणाघातास्तैः । पातितोऽपि उत्पतत्येव । ऊर्ध्वं गच्छत्येव । कन्दुकोऽपि साधुवृत्तः वर्तुलाकृतिर्भवति ॥ २६ ॥

प्रायः कन्दुकप्रातेनोत्पतत्यार्यः पतन्नपि ।
तथा त्वनार्यः पतति मृत्पिण्डपतनं यथा ॥ २७ ॥

[ १ रा. ' गुटिका ' इति मूले ]

आर्यः श्रेष्ठः पुमान् । प्रायो बाहुल्येन स्वभावेन वा । पतन्नपि विपदं प्राप्नुवन्नपि । उत्पतति ऊर्ध्वं गच्छति । संपदं प्राप्नोतीत्यर्थः । केन तुल्यम् । कन्दुकपातेन सह कन्दुकपातवत् । यथा कन्दुकः पतन्नुत्पतति । तु पुनः । अनार्यः खलस्तथा पतति भ्रस्यति तथा कथं यथा मृत्पिण्डपतनम् । मृदो मृत्तिकायाः पिण्डः साद्रेरजःसंघातः । तस्य पतनं यथा भवेति न तु कदाचिदुत्पतनं भवेत् ॥ २७ ॥

प्रीणाति यः सुचरितैः पितरं स पुत्रो
यद्भर्तुरेव हितमिच्छति तत्कलत्रम् ।
तन्मित्रमापदि सुखे च यदेकरूप-
मेतत्त्रयं जगति पुण्यकृतो लभन्ते ॥ २८ ॥

[ १ रा. टीकायां 'च समक्रियं यदेत°' ]

स पुत्रः कथ्यते । स कः । यः सुचरितैः शोभनचरित्रैः पितरं जनकं प्रीणाति तोषयति । नान्यः पुत्र इत्यर्थः । तत्कलत्रं भार्या कथ्यते । तत्किम् । यत् भर्तुः पत्युरेव हितं प्रियमिच्छति । न रूपादिमदित्यर्थः । तन्मित्रं सखा कथ्यते । तत्किम् । यत् आपदि कष्टकाले च पुनः सुखे समक्रियं समाना क्रिया स्वभावव्यापारो यस्य तत् । पुनः । एतत्त्रयमेतद्विधं त्रयं पुत्रकलत्रमित्ररूपं जगति विश्वस्मिन् । पुण्यकृतो धर्मवन्तो लभन्ते । नान्ये अधर्मिण इत्यर्थः ॥ २८ ॥

संपत्सु महतां चित्तं भवत्युत्पलकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम् ॥ २९ ॥

महतां विवेकिनां चित्तं मनः संपत्सु समृद्धिषु सतीषु । उत्पलकोमलं । उत्पलवत् कमलवत् कोमलं मृदु भवति । सर्वभूतेषु करुणार्द्रमित्यर्थः । च पुनः आपत्सु विपत्सु च सतीषु चित्तं महाशैलशिलासंघातकर्कशम् । महाशैलस्य महागिरेः शिलानां दृषदां संघातः समुच्चयः तद्वत् कर्कशं कठिनं भवति । विपत्सु महाधैर्यसंवर्मितं भवतीत्यर्थः ॥ २९ ॥

दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ ३० ॥

दुर्जनः खलः विद्यया भूषितोऽपि विद्वानपि परिहर्तव्यः त्यक्तव्यः । तत्र दृष्टान्तः । मणिना भूषितः सर्पः भवेत् । असौ किं न भयंकरः । अपि तु भयंकर एव ॥ ३० ॥

क्षीरेणात्मगतोदकाय सकला दत्ता निजा ये गुणाः
क्षीरे तापमवेक्ष्य तेन पयसा ह्यात्मा कृशानौ हुतः ।
गन्तुं पावकमुन्मनस्तदभवद्दृष्ट्वा तु मित्रापदं
युक्तं तेन जलेन शाम्यति सतां मैत्री पुनस्त्वीदृशी ॥३१॥

पुरा पूर्वं । हि स्फुटं । क्षीरेण दुग्धेन । आत्मगतोदकाय । आत्मगतं च तत् उदकं च तस्मै । स्वगतनीराय अखिलाः समग्राः ते गुणाः श्वेत्यमाधुर्यादयो दत्ताः । तेन पयसा ना ?मे । हि निश्चितं । क्षीरे दुग्धे तापं अग्नितप्तत्वं अवेक्ष्य आत्मा कृशानौ वह्नौ हुतः । [illegible]

पुनः । तत् दुग्धं पावकं वैश्वानरं गन्तुं उन्मन उत्सुकमभवत् । किं कृत्वा मित्रापदं मित्रस्य नीरस्य आपदं दाहलक्षणां दृष्ट्वा । तत् दुग्धं तेन जलेन युक्तं सहितं सत् शाम्यति शान्तं सत् तिष्ठति । अतः सतां सत्पुरुषाणां ईदृशी ईदृक् सहचाररूपा मैत्री मित्रत्वं भवति ॥ ३१ ॥

मृगमीनसज्जनानां तृणजलसंतोषविहितवृतीनाम् ।
लुब्धकधीवरपिशुना निष्कारणवैरिणो जगति ॥ ३२ ॥

मृगमीनसज्जनानाम् । मृगाश्च मीना मत्स्याश्च सज्जनाः साधवश्च तेषाम् । अनुक्रमेण लुब्धकधीवरपिशुनाः । लुब्धका व्याधाश्च धीवरा मत्स्यघातिनश्च पिशुनाः खलाश्च ते जगति विश्वस्मिन् निष्कारणवैरिणः कारणमन्तरेण शत्रवो भवन्ति । किंलक्षणानां मृगमीनसज्जनानां तृणजलसंतोषविहितवृत्तीनाम् । तृणानि च जलानि च संतोषश्च तैः विहिता वृत्तिर्जीविका यैस्तेषाम् ॥ ३२ ॥

संतप्तायसि संस्थितस्य पयसो नामापि न ज्ञायते
मुक्ताकारतया तदेव नलिनीपत्रस्थितं राजते ।
स्वातौ सागरशुक्तिसंपुटगतं तज्जायते मौक्तिकं
प्रायेणाधममध्यमोत्तमगुणाः संवासतो देहिनाम् ॥३३॥

प्रायेण बाहुल्येन । देहिनां प्राणिनां अधममध्यमोत्तमगुणाः नीचमध्यश्रेष्ठस्यभावाः । संवासतः संसर्गात् भवन्ति । तत्राधमगुणत्वमाह । यतः संतप्तायसि । संतप्तं च तत् अयश्च संतप्तायः तस्मिन् तप्तलोहे । संस्थितस्य आगतस्य । पयसः उदकस्य । नामापि । इदं पय इति नामापि न ज्ञायते । नश्यतीत्यर्थः । मध्यमाश्रयमाह । तदेव पयः नलिनीपत्रस्थितं सत् । पद्मिनीपत्रे पतितं सत् । मुक्ताकारतया मौक्तिकाकृतित्वेन राजते शोभते । पुनः तत्पयः स्वातौ नक्षत्रे सागरशुक्तिसंपुटगतं सत् । समुद्रे शुक्तिसंपुटे पतितं सत् । मौक्तिकं प्रशस्तं मुक्ताफलं जायते । इत्युत्तमाश्रयत्वम् ॥ ३३ ॥

या साधूंश्च खलान्करोति विदुषो मूर्खान्हितान्द्वेषिणः
प्रत्यक्षं कुरुते परोक्षममृतं हालाहलं तत्क्षणात् ।
तामाराधय चक्रिकां भगवतीं भोक्तुं फलं वाञ्छितं
हे साधो त्वमतो गुणेषु विपुलेष्वास्थां वृथा मा कृथाः॥३४॥

[ १ अ. °ष्वास्था ]

हे साधो जन त्वं । अतः अस्मात्कारणात् तां भगवतीं सकलगुणसंपूर्णां चक्रिकां चक्रेश्वरीं सरस्वतीं आराधय भज । किं कर्तुं वाञ्छितं अभिलषितं फलं राज्यादिकं भोगं भोक्तुं प्राप्तुम् । विपुलेषु महत्तरेषु गुणेषु शौर्यचातुर्यादिषु आस्थां आदरं वृथा निरर्थकं

मा कृथाः । मा कुरु । न किंचिद्गुणैः साध्यत इत्यर्थः । अथ वा चक्रिका लक्ष्मीभिः केचित् । तां कां या चक्रिका साधून् सतः खलान्दुर्जनान्करोति । लक्ष्म्या हि साधवः प्रायः खला भवन्ति । तथा विदुषः पण्डितान् मूर्खान् अज्ञान् करोति । तथा हि पण्डिता मूर्खा भवन्ति । तथा प्रत्यक्षं समक्षमपि पदार्थं परोक्षं अदृश्यं करोति । तथा या अमृतं पीयूषं तत्क्षणात् हालाहलं कालकूटं विषं करोति ॥ ३४ ॥

कृमिकुलचितं लालाक्लिन्नं विगन्धि जुगुप्सितं
निरुपमरसप्रीत्या स्वादन्नरास्थि निरामिषम् ।
सुरपतिमपि श्वा पार्श्वस्थं विलोक्य विशङ्कते
न हि गणयति क्षुद्रो मैत्रीपरिग्रहफल्गुताम् ॥ ३५ ॥

श्वा सारमेयः । पार्श्वस्थं निकटे वर्तमानं सुरपतिमपि देवेन्द्रमपि । विलोक्य दृष्ट्वा । विशङ्कते न विश्वासिति । एतद्ग्रहीष्यतीति मन्यत इत्यर्थः । अथ वा न शङ्कते इति पाठे । अस्मदीयोऽयमिति मन्यते । किं कुर्वन् । नरास्थि मनुष्यास्थिपंढं ( खण्डं ) निरुपमरसप्रीत्या । निरुपमः । असाधारणो यो रसः तस्य प्रीत्या कृत्वा । आस्वादन् लिहन् सन् । किंलक्षणं नरास्थि । कृमिकुलचितं कृमीणां कीटानां कुलैः चितं व्याप्तम् । पुनः किं० । लालाक्लिन्नम् । लालाभिः मुखप्रज्ञावैः क्लिन्नं आर्द्रम् । पुनः किं० । विगन्धि । विरुद्धः विप्रः गन्धो यस्य तत् । पुनः किं० नरास्थि । निरामिषम् । निर्गतं आमिषं मांसं यस्मात् तत् । अत एव जुगुप्सितं जुगुप्सा निन्दा जाता यस्य तत् । हि युक्तोऽयमर्थः । हि यस्मात् क्षुद्रो नीचः पुमान् । मैत्रीपरिग्रहफल्गुतां मैत्र्या मित्रत्वस्य परिग्रहः स्वीकारः तस्य फल्गुताम् । न गणयति न विचारयति ॥ ३५ ॥

स्वरूपं स्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न च तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥ ३६ ॥

श्वा कुक्कुरः । अस्थिकं अपि अस्थिशकलमपि । लब्ध्वा प्राप्य । परितोषं परि संतोषं प्राप्नोति । किंलक्षणं अस्थिकम् । स्वल्पं स्तोकम् । पुनः किं० । स्नायुवसावशेषमलिनं स्नायवः शि(शि)राश्च वसा मेदश्च ताः स्नायुवसाः अवशेषो यस्य तत् । एवंविधं च तत् मलिनं च स्नायुवसावशेषमलिनम् । पुनः किं० । निर्मांसं गतामिषं च पुनस्तत् अस्थिकं तस्य शुनः क्षुधाशान्तये न । बुभुक्षानिरासाय न भवति । सिंहः केसरी कृच्छ्रगतो व्यसनस्थानपि । जम्बुकं शृगालम् । अङ्कं समीपम् । आगतमपि प्राप्तमपि त्यक्त्वा द्विपं गजेन्द्रं निहन्ति । अन्यार्थान्तरन्यासः । सर्वो जनः कृच्छ्रगतोऽपि व्यसनस्थोऽपि सत्त्वानुरूपं सत्त्वस्य चित्तस्य अनुरूपं योग्यं फलं साध्यं भोगं वा वाञ्छति इच्छति ॥ ३६ ॥

पापान्निवारयति योजयते हिताय
गुह्यं च गूहति गुणान्प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ॥ ३७ ॥

[१ अ. पापं नि]

सन्तः श्रेष्ठपुरुषाः । इदं सन्मित्रलक्षणं प्रशस्यमित्रचिह्नं प्रवदन्ति । इदं किम् । यत् सन्मित्रं पापात् निन्द्यकर्मणः निवारयति । तथा हिताय श्रेष्ठाय योजयते प्रवर्तयति । च अन्यत् गुह्यं गोप्यं अकथ्यं गूहति गोपायते । तथा गुणान् स्वात्मानमपि प्रकटीकरोति प्रकाशयति । च अन्यत् । आपन्नतं आपद्दा व्याप्तं न जहाति न त्यजति । तथा काले अवसरे दानप्रस्तावे ददाति ॥ ३७ ॥

कुसुमस्तवकस्येव द्वयी वृत्तिर्मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वन एव वा ॥ ३८ ॥

[ १ अ. शीयते. ]

मनस्विनः उदारमनसः पुरुषस्य । द्वयी द्वौ अवयवौ यस्याः सा । तथा वृत्तिः वर्तनं वृत्तिः स्थितिः । कासावित्याह । यत् सर्वलोकस्य मूर्ध्नि उपरि वृत्तिः । सौभाग्येन सर्वेषामुपरि वर्तनमित्यर्थः । वा अथवा वने अरण्य एव शीर्यते । तपस्वी सन् विलीयते । कस्येव द्वयी वृत्तिः । कुसुमस्तवकस्येव । कुसुमानां स्तवकः गुच्छस्तस्येव । यथा पुष्पगुच्छस्य द्वयी वृत्तिः । कथमित्याह । सर्वलोकस्य मूर्ध्नि शिरसि । अथ वा वन एव शीर्यते । शीर्णो भवति ॥ ३८ ॥

लोभश्चेदगुणेन किं पिशुनता यद्यस्ति किं पातकैः
सत्यं चेत्तपसा च किं शुचि मनो यद्यस्ति तीर्थेन किम् ।
सौजन्यं यदि किं निजैः सुमहिमा यद्यस्ति किं मण्डनैः
सद्विद्या यदि किं धनैरपयशो यद्यस्ति किं मृत्युना॥३९॥

[१ अ. 'परयश इत्यपि पाठः' इति प्रान्ते ]

चेद्यदि लोभो धनादिष्वपरितोषः वर्तते । तर्हि अगुणेन गुणविरोधिना दुर्गुणेन किम् । यत्र लोभोऽस्ति तत्र सर्वेऽपि दुर्गुणाः सन्तीत्यर्थः । यदि चेत् पिशुनता । दुर्जनता अस्ति । तर्हि पातकैः पापैः किं कोऽर्थः । यत्र पिशुनता अस्ति सर्वाण्यपि पापानि तत्र सन्तीत्यर्थः । चेद्यदि सत्यं सत्यभाषणमस्ति तर्हि तपसा महोपवासादिव्रतेन किं कोऽर्थः । न कश्चिदपीत्यर्थः । यदि चेत् शुचि शुद्धं पातकरहितं मनोऽस्ति तर्हि तीर्थेन

वाराणस्यादिना किं क्रोऽर्थः । न कश्चिदपीत्यर्थः । यत्र मनसः शुचिः तत्रैव सर्वाण्यपि तीर्थानि सन्तीति भावः । यदि चेत्सौजन्यं अस्ति तर्हि निजैः आत्मीयैः जनैः किं क्रोऽर्थः । यस्य सौजन्यमस्ति तस्य सर्वेऽपि आत्मीया भवन्तीत्यर्थः । तथा चेत्सुमहिमा शोभनो महिमा अस्ति तर्हि मण्डनैः अलंकरणैः किं क्रोऽर्थः । यस्य सुमहिमा वर्तते स सर्वदा अलंकारवानित्यर्थः । यदि चेत् सद्विद्यः । सती चासौ विद्या च तथा । शोभना विद्या अस्ति तर्हि धनैः किं द्रविणैः क्रोऽर्थः । यस्य किल सद्विद्या अस्ति तस्य सर्वाण्यपि धनानि सन्तीत्यर्थः । तथा यदि चेत् अपयशः । अप निर्गतं यशः इत्यपयशः । अपकीर्तिः अस्ति । तर्हि मृत्युना मरणेन किं क्रोऽर्थः । यस्य किलापकीर्तिः गीयते स मृत इत्यर्थः ॥ ३९ ॥

**नम्रत्वेनोन्नमन्तः परगुणकथनैः स्वान्गुणान्ख्यापयन्तः**
**स्वार्थं संपादयन्तो विततपृथुतरारम्भयत्नाः परार्थे ।**
**क्षान्त्यैवोपेक्ष्य रूक्षाक्षरमुखरमुखान्दुर्मुखान्दूषयन्तः**
**सन्तः साश्चर्यचर्या जगति बहुमताः कस्य नाभ्यर्चनीयाः ॥४०॥**

[१ रा. मूले व्यापयन्तः]

जगति विश्वस्मिन् । बहुमताः अतिशयेन मानिताः । सन्तः साधुपुरुषाः कस्य जनस्य न अभ्यर्चनीयाः । न पूजनीयाः । किंलक्षणाः सन्तः । साश्चर्यचर्याः आश्चर्येणाद्भुतेन सह वर्तमानाः साश्चर्यचर्याः । एवंभूता चर्या आचरणं येषां ते तथा । स्वाश्चर्यचर्या इति पाठः । तत्पक्षे सुतरां अतिशयेन । आश्चर्यचर्या येषां ते तथा । किं कुर्वन्तः नम्रत्वेन प्रह्वतया उन्नमन्त उच्चैर्भवन्तः । ये किल नम्रा भवन्तः उन्नमन्ति । अत्राश्चर्यम् । पुनः किं कुर्वन्तः । परगुणकथनैः परेषां गुणकथनैः. स्वान् आत्मीयान् गुणान् ख्यापयन्तः कथयन्तः । परगुणकथनेनात्मगुणकथनमाश्चर्यम् । पुनः किं कुर्वन्तः । स्वार्थान् स्वप्रयोजनानि संपादयन्तः निष्पादयन्तः । किंभूताः । परार्थे परेषां अर्थः तस्मिन् परप्रयोजने निमित्ते । विततपृथुतरारम्भयत्नाः । विततः विस्तारितः । पृथुतरः अतिमहान् आरम्भयत्नो येषां ते तथा । परार्थे यत्नवन्तः स्वार्थं कुर्वन्तीत्याश्चर्यम् । पुनः किं कुर्वन्तः । क्षान्त्यैव क्षमयैव । रूक्षाक्षरमुखरमुखान् । रूक्षैः परुषैः अक्षरैः वर्णैः अकारादिभिः मुखराणि वाचालकानि मुखानि येषां ते तथा । तान् दूषयन्तः धिक्कुर्वन्तः । किं कृत्वा उपेक्ष्य अवगणयित्वा । उदासीना भूत्वेत्यर्थः । यदा तेऽवमतास्तदा ते दूषिता इत्यर्थः ॥४०॥

**मौनान्मूकः प्रवचनपटुर्वातकी जल्पको वा**
**धृष्टः पार्श्वे भवति च तथा दूरतश्चाप्रगल्भः ।**

क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ४१ ॥

[१ रा. मूलस्य प्रान्ते 'ह'। २ कोशद्वयेऽपि प्रायसो]

सेवाधर्मः। सेवाया धर्मः करणं परमगहनः अतिदुर्गमः ज्ञेयः योगिनामपि अगम्यः। अज्ञेयो भवति। यतः कारणात् पुमान्। मौनात् तूष्णींभावात्। मूकः मूर्खः कथ्यते। वा अथ वा पुमान् प्रवचनपटुः प्रवचने भाषणे पटुः वक्ता भवेत् तर्हि वातकी वातरोगी कथ्यते। वा जल्पकः मुखरः कथ्यते। यदि सदा पुमान् पार्श्वे समीपे वसति तिष्ठेत् तदा धृष्टः निर्लज्जो निन्द्यो वा कथ्यते। च पुनः। दूरतः दूरे वसति तर्हि अप्रगल्भः अज्ञानः कथ्यते। यदि चेत्। पुमान् न सहते न क्षमेत् तर्हि अभिजातः कुलीनः दक्षो वा न कथ्यते। अत एव सेवाधर्मस्य गहनत्वम् ॥ ४१ ॥

अम्भोजिनीवननिवासविलासमेव
हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां
वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ ४२ ॥

विधाता हंसस्य नितरामतिशयेन कुपितः सन्। अम्भोजिनीवननिवासविलासमेव। अम्भोजनीनां वनानि तेषु निवासः निवसनं तत्र विलासः क्रीडा तं हन्ति नाशयति। कदाचित् पद्मिनीवनानि नाशयतीत्यर्थः। तु पुनः। असौ विधाता अस्य हंसस्य दुग्धजलभेदविधौ क्षीरपानीययोः भेदविधौ पृथक्करणे प्रसिद्धां ख्यातां वैदग्ध्यकीर्तिं विदग्धस्य चतुरस्य भावः वैदग्ध्यं तस्य या कीर्तिः तां अपहर्तुं नाशयितुं न समर्थः। तस्य दुग्धजलपृथक्करणचातुर्यं न नाशयतीत्यर्थः ॥ ४२ ॥

स्खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके
वाञ्छन्देशमनातपं विधिवशाद्बिल्वस्य मूलं गतः।
तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः
प्रायो गच्छति यत्र भाग्यरहितस्तत्रापदां भाजनम् ॥४३॥

कश्चित्खल्वाटः स्खलतिः। दिवसेश्वरस्य सूर्यस्य। किरणैः गभस्तिभिः मस्तके शिरसि। संतापितः पश्चादनातपं न दृश्यते आतपो घर्मो यस्मिन् तं सच्छायं देशं वाञ्छन् इच्छन् सन्। विधिवशाद् दैवयोगात्। बिल्वस्य बिल्वद्रुमस्य। मूलं गतः अभवत्। तत्रापि तस्मिन् स्थाने अस्य बिल्वस्य महता फलेन पतता भ्रस्यता सता सशब्दं सभाट्कारं यथा भवति तथा शिरो भग्नं मस्तकं अभाजि। युक्तोऽयमर्थः। भाग्यरहितः भाग्येन विनाकृतः पुमान् प्रायो बाहुल्येन यत्र गच्छति तत्र आपदां दुःखानां भाजनं पात्रं आधार इत्यर्थः। भवति। तत्रैव यान्त्यापदः इति वा पाठे। स यत्र गच्छति तत्रैवापदः कष्टानि अग्रतः यान्तीति ॥ ४३ ॥

आकृतिः फलति नैव कुलं न शीलं
विद्या न वापि न च यत्नकृतापि सेवा ।
भाग्यानि पूर्वतपसा किल संचितानि
काले फलन्ति पुरुषस्य यथैव वृक्षाः ॥ ४४ ॥

पुरुषस्य आकृतिः रूपम् । न फलति सुखादि न ददाति । तथा कुलं सद्वंशः न फलति । तथा शीलं सुस्वभावः न फलति । च पुनः । विद्या न फलति । च पुनः । यत्नकृतापि सेवा । यत्नेन कृतापि राजादिसेवा न फलति । तर्हि किं पूर्वतपसा पूर्वजन्मोपार्जितधर्माचरणेन संचितानि स्थापितानि भाग्यानि अदृष्टानि । किलेति निश्चये । तथा काले प्रस्तावे फलन्ति फलदायीनि भवन्ति । तथा कथं यथैव येन प्रकारेण वृक्षाः काले फलावसरे वसन्तादौ फलन्ति । तपःपुण्यं विना कैरपि पदार्थैः किम् ॥ ४४ ॥

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः कुलस्य विनयो वित्तस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥ ४५ ॥

सुजनता सौजन्यं ऐश्वर्यस्य प्रभुत्वस्य विभूषणं आभरणं भवति । सुजनतया हि प्रभुत्वं शोभते । तथा वाक्संयमः वाग्वशित्वं शौर्यस्य शूरत्वस्य विभूषणम् । शूरो हि अकत्थन् शोभते । तथा ज्ञानस्य ज्ञातृत्वस्योपशमः शान्तिर्विभूषणं भवति । ज्ञानं हि शान्त्या शोभते । कुलस्य सद्वंशस्य विनयः विनीतता आभरणम् । विनयेन हि कुलं शोभते । तथा पात्रे व्ययः सत्पात्रे दानं वित्तस्य धनस्याभरणम् । तथा अक्रोधः क्रोधाभावः तपसः जितेन्द्रियत्वादेः आभरणम् । क्रोधराहित्येन हि तपः शोभते । तथा प्रभवितुः । प्रभवतीति प्रभविता । तस्य समर्थस्य पुरुषस्य क्षमा सहिष्णुता आभरणम् । तथा धर्मस्य शुभाचरणस्य निर्व्याजता निष्कपटत्वं आभरणम् । पुनः सर्वेषामपि ऐश्वर्यादिपदार्थानां शीलं सुस्वभावः जितेन्द्रियत्वादिः परं केवलं भूषणं अलंकरणम् । किंलक्षणं शीलं सर्वकारणं सर्वेषामैश्वर्यादीनां कारणं उत्पादकम् ॥ ४५ ॥

एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये तु घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥ ४६ ॥

ये पुरुषाः स्वार्थं आत्मीयमर्थं परित्यज्य परार्थघटकाः । परेषामन्येषां अर्थान् प्रयोजनानि घटयन्ति निष्पादयन्ति ते तथाभूता भवन्ति । एते सत्पुरुषाः । सन्तश्च ते पुरुषाश्च शोभनपुरुषा इत्यर्थः । तु पुनः । ते पुरुषाः सामान्या न सत्पुरुषाः, न च निकृष्टाः । ते के ये स्वार्थाविरोधेन स्वार्थस्य स्वप्रयोजनस्याविरोधेन अनुपघातेन स्वार्थं निष्पादयन्त इति यावत् । परार्थं परेषामर्थं प्रति उद्यमभृतः उद्यमधारिणः । स्वार्थं निष्पादयन्तः परार्थं कुर्वन्तीत्यर्थः । ते अमी पुरुषा मानुषराक्षसाः । मानुषरूपेण राक्षसाः । आकृतिपापिन इत्यर्थः । ते के । ये स्वार्थाय आत्मीयप्रयोजनाय । परहितं अन्येषाममीष्टं निघ्नन्ति नाशयन्ति ते के राक्षसाः ततोऽपि अधमा इति वितर्कयन्तोऽपि वयं न जानीमहे निर्णयं न लभामहे ते महापापा इत्यर्थः ( चतुर्थपादटीका असंपूर्णत्वान्न भाति ) ॥ ४६ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम् ॥ ४७ ॥

हे सखे कथय ब्रूहीति लोकोक्तिः । सत्संगतिः सतां संगतिः साधुसमागमः पुंसां किं न करोति । अपि तु सर्वं संपादयतीत्यर्थः । यतः धियो बुद्धेः जाड्यं जडत्वं हरति नाशयति । तथा वाचि वाण्यां सत्यं सत्यभाषित्वं सिञ्चति वर्धयति । सत्संगत्या हि सत्यभाषिता भवति । तथा मानोन्नतिं मानेन पूजया उन्नतिं महत्त्वं दिशति ददाति । सत्संगत्या हि पूजां लभते । तथा पापं पातकं अपाकरोति स्फोटयति । तथा पापं नश्यति । तथा चेतः चित्तं प्रसादयति निर्मलयति । तथा हि चित्तं प्रसन्नं भवति । तथा दिक्षु दशसु आशासु कीर्तिं यशः तनोति विस्तारयति । तथा हि कीर्तिर्भवति ॥ ४७ ॥

वाञ्छा सज्जनसंगमे परगुणे प्रीतिर्गुरौ नम्रता
विद्यायां व्यसनं स्वयोषिति रतिर्लोकापवादाद्भयम् ।
भक्तिः शूलिनि शक्तिरात्मदमने संसर्गमुक्तिः खले
एते येषु वसन्ति निर्मलगुणास्तेभ्यो नरेभ्यो नमः ॥४८॥

येषु पुरुषेषु एते श्लोकोक्ता निर्मलगुणा निष्पापा गुणा वसन्ति तिष्ठन्ति तेभ्यो नरेभ्यः नमः नमस्कारोऽस्तु । एते के । यत् सज्जनसंगमे सज्जनानां संगमे वाञ्छा इच्छा, न खलसंगमे । तथा परगुणे परेषां गुणे उच्चार्यमाणे प्रीतिः आनन्दः । न कालुष्यम् । तथा गुरौ पूज्ये नम्रता प्रह्वत्वं, नोद्धत्यम् । तथा विद्यायां आन्वीक्षिक्यादिकायां व्यसनं आसक्तिः, नतु द्यूतपरस्त्र्यादिषु । तथा स्वयोषिति स्वभार्यायां रतिः

प्रीतिः आसक्तिः, न तु परस्त्रीषु । तथा लोकापवादात् अपकीर्तेः भयं भीतिः, यतु राजपित्रादेः । तथा शूलिनि श्रीमहादेवे भक्तिः । तथा आत्मदमने । आत्मनः मनसः दमने शक्तिः सामर्थ्यं, न तु परदमने । तथा खले दुर्जने विषये संसर्गमुक्तिः संसर्गस्य मुक्तिः संसर्गत्यागः । न तु सज्जने ॥ ४८ ॥

दुर्ग्राह्यं हृदयं यथैव वदनं सहृर्षणान्तर्गतं
भावः पर्वतसूक्ष्ममार्गविषमः स्त्रीणां न विज्ञायते ।
चित्तं पुष्करपत्रतोयतरलं विद्वद्भिरीशंसितं
नारी नाम विषाङ्कुरैरिव लता दोषैः समं वर्धिता॥४९॥
[ १ अ. राशङ्कितं ]

स्त्रीणां एतत् हृदयं मनः तथैव तेन प्रकारेण दुर्ग्राह्यं दुःखेन ग्रहणीयं वर्तते । तथा कथं यथा सहर्षणान्तर्गतं सदादर्शप्रतिबिम्बितं वदनं मुखं यथा तत् वदनं दुर्ग्राह्यं भवति । तथा स्त्रीणां भावः चित्ताभिप्रायः पर्वतसूक्ष्ममार्गविषमः । पर्वतेषु ये सूक्ष्ममार्गाः एकपथः स्वल्पपदद्वयदृढकाः तद्वद्विषमः दुर्बोधः सन् न विज्ञायते । तथा विद्वद्भिः पण्डितैः स्त्रीणां चित्तं चेतः पुष्करपत्रतोयतरलं पुष्करस्य कमलस्य पत्रतोयतरलं पुष्करस्य कमलस्य पत्रे पर्णे तोयं पानीयं तद्वत् तरलं चञ्चलम् । आशंसितं कथितम् । एकत्र स्थितिं न प्राप्नोतीत्यर्थः । नामेति संबोधने । नारी स्त्री दोषैः अपगुणैः समं सह वर्धिता वृद्धिं गता । कैः केव विषाङ्कुरैः विषयस्याङ्कुरा उद्देवाः तैः सह यथा लता विषवल्ली वर्धिता वर्तते ॥ ४९ ॥

तृष्णां छिन्धि भज क्षमां जहि मदं पापे रतिं मा कृथाः
सत्यं ब्रूहनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय विद्विषोऽप्यनुनय प्रच्छादय स्वान्गुणा-
न्कीर्तिं पालय दुःखिते कुरु दयामेतत्सतां चेष्टितम्॥५०॥

सतां सत्पुरुषाणां एतत् चेष्टितं चेष्टा । इदमुपदेशवचनमित्यर्थः । एतत् किम् । हे जन त्वं तृष्णां छिन्धि लोभं नाशय । क्षमां भज शान्तिं सेवस्व । मदं गर्वं जहि त्यज । पापे पापकर्मणि रतिं प्रीतिं मा कृथा मा करिष्यसि । सत्यं ब्रूहि । तथ्यं वचनं वद । साधुपदवीं साधूनां सज्जनानां पदवीं मार्गं अनुयाहि अनुसर । येन मार्गेण सन्तो गताः तेन मार्गेण चल । तथा विद्वज्जनान् विद्वांसस्ते जनाश्च तान् । सेवस्व भज । तथा मान्यान् पूज्यान् मानय पूजय । विद्विषोऽपि शत्रूनपि अनुनय संतोषय । अपनयेति पाठे स्फेटय । स्वान्गुणान् आत्मीयानुत्कर्षान् प्रच्छादय आच्छादय । कीर्तिं स्वं यशः पालय रक्षय । मा नाशयेत्यर्थः । तथा दुःखिते संजातदुःखे प्राणिनि दयां कुरु करुणां विधेहीति ॥ ५० ॥

सगुणमपगुणं वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामा विपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥ ५१ ॥

पण्डितेन विदुषा जनेन सगुणं गुणवद्वा अथ वा अपगुणं अगुणवत् । कार्यजातं कार्यस्वरूपं कुर्वता विदधता सता यत्नतः । यत्नेन परिणतिः परिपाकः अवधार्या विचार्या भवति । यतः अतिरभसकृतानां अतिसंवेगकृतानां कर्मणां व्यापाराणां विपाकः फलं शल्यतुल्यः लोहाङ्कुरसमानो भवति । अतिदुःसह इत्यर्थः । किंलक्षणः विपाकः । आ विपत्तेः आ मरणं यावत् । हृदयदाही हृदयं दहतीति तथा । यथा लोहशल्यं हृदि स्थितं सत् दहति व्यथयति तथा स विपाकः मरणपर्यन्तं हृदयं दहतीत्यर्थः ॥ ५१ ॥

स्थाल्यां वैदूर्यमय्यां पचति तिलखलं चान्दनैरिन्धनोघैः
सौवर्णैर्लाङ्गलाग्रैर्विलिखति वसुधामर्कमूलस्य हेतोः ।
छित्त्वा कर्पूरखण्डान्वृतिमिह कुरुते कोद्रवाणां समन्ता-
त्प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः॥५२॥

[१ अ. वैदूर्य. २ रा. टीका. लाङ्गलाग्र्यै°. ३ अ. विलसति. ४ अ. °तूलस्य.]

यः पुमान् इमां कर्मभूमिं प्राप्य भरतखण्डे जन्म प्राप्य तपः धर्मं न चरति नाचरति । किंलक्षणः । मन्दभाग्यः । मन्दं हीनं भाग्यं अदृष्टं यस्य स तथा । यस्तपो न चरति स पुरुषः । वैदूर्यमय्यां विदूर्यमणिभिः निर्मितायां स्थाल्यां पात्र्यां तिलखलं तिलस्य खलः पिण्याकस्तं पचति रन्धयति । कैः चान्दनैः चन्दनस्य मलयजस्य इमे चान्दनाः तैः इन्धनो( नौ ? )घैः काष्ठसमूहैः कृत्वा । पुनः स पुरुषः सौवर्णैः कनकनिष्पादितैः लाङ्गलाग्र्यैः । लाङ्गलेषु अग्र्याणि श्रेष्ठानि तैः हलश्रेष्ठैः कृत्वा अर्कमूलस्य हेतोः । अर्कमूलानीमित्तं वसुधां भूमिं विलिखति कर्षति । तथा कर्पूरखण्डान् । घनसारखण्डान् । छित्त्वा । इह विश्वस्मिन् कौद्रवाणां तृणाणुधान्यानां समन्तात्परितः वृत्तिं वेष्टनं कुरुते ॥ ५२ ॥

वने रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतमस्तके वा ।
सुप्तं प्रमत्तं विषमस्थितं वा रक्षन्ति पुण्यानि पुराकृतानि ॥५३॥

वने अरण्ये । रणे संग्रामे । शत्रुजलाग्निमध्ये शत्रवः अरयश्च खलं च अग्निश्च तेषां शत्रुजलाग्नयस्तेषां मध्ये । तथा महार्णवे सागरे । तथा पर्वतमस्तके वा गिरिशिखरे सुप्तं शयितं प्रमत्तं मद्योन्मादादिना वा विषमस्थितं वातरोगादिना पीडितं नरं कर्म पुराकृतानि पूर्वजन्मोपार्जितानि पुण्यानि सुकृतानि कर्तॄणि रक्षन्ति पालयन्ति ॥ ५३ ॥

भीमं वनं भवति तस्य पुरं प्रधानं
सर्वो जनः स्वजनतामुपयाति तस्य ।
कृत्स्ना च भूर्भवति संनिधिरत्नपूर्णा
यस्यास्ति पूर्वसुकृतं विपुलं नरस्य ॥ ५४ ॥

यस्य पुरुषस्य पूर्वसुकृतं पूर्वजन्मोपार्जितं सुकृतं पुण्यं विपुलं बहु अस्ति विद्यते । तस्य पुरुषस्य भीमं रौद्रं वनं पुरं प्रधानं नगरं भवति । तथा सर्वो जनः । तस्य पुरुषस्य स्वजनतां आत्मीयजनत्वं उपयाति प्राप्नोति । च अन्यत् कृत्स्ना समग्रा भूः पृथिवी सन्निधिरत्नपूर्णा सन्निधौ समीपे रत्नैः उत्कृष्टवस्तुभिः गवाश्वान्नवस्त्रादिभिः मणिभिर्वा पूर्णा भृता भवति स्यात् ॥ ५४ ॥

यज्ञागा मदवारिभिन्नकरटास्तिष्ठन्ति निद्रालसा
द्वारे स्वर्णविभूषिताश्च तुरगा वल्गन्ति यद्वार्पिताः ।
वीणावेणुमृदङ्गशङ्खपणवैः सुप्तश्च यद्बोध्यते
तत्सर्वं सुरलोकसिद्धिसदृशं धर्मस्य विस्फूर्जितम् ॥ ५५ ॥

[१ रा. टीका. ऋद्धि]

तत्सर्वं सकलं धर्मस्य सुकृतस्य विस्फूर्जितं विलासः । किंलक्षणं सुरलोकऋद्धिसदृशं सुरलोकः स्वर्गः तस्य ऋद्धिः समृद्धिः तस्याः सदृशं तुल्यम् । तत्किं यत् द्वारि नागा गजेन्द्राः तिष्ठन्ति तिष्ठेयुः । किंलक्षणाः । मदवारिभिन्नकरटाः । मदवारिणा भिन्नाः छिन्नाः करटा गण्डा येषां तैः । पुनः किं तत् । द्वारि वर्पिताः सर्वालंतुरगा अश्वा यद्वल्गन्ति प्रचलन्ति । किंभूताः स्वर्णविभूषिताः स्वर्णेन कनकेन विभूषिताः शृङ्गारिताः । पुनः किं तत् । यत्पुमान् सुप्तः वीणावेणुमृदङ्गशङ्खपणवैः । वीणाश्च वेणवश्च मृदङ्गाश्च शङ्खाश्च पणवाः पटहाश्च तैः बोध्यते बोधं निद्राक्षयं नीयते ॥ ५५ ॥

मज्जत्वम्भसि यातु मेरुशिखरं शत्रूञ्जयत्वाहवे
वाणिज्यं कृषिसेवनादि सकला विद्याः कलाः शिक्षतु ।
आकाशं विपुलं प्रयातु खगवत्कृत्वा प्रयत्नं परं
नाभाव्यं भवतीह कर्मवशतो भाव्यस्य नाशः कुतः ॥ ५६ ॥

पुमान् अम्भसि पानीये मज्जतु मूढतु । तथा मेरुशिखरं यातु सुमेरुशृङ्गं गच्छतु । तथा आहवे संग्रामे शत्रूञ्जयतु वैरिणः वशीकरोतु । तथा वाणिज्यं वणिज्यां शिक्षतु जानातु । किंलक्षणं वाणिज्यं कृषिसेवनादि । कृषिः कर्षणं सेवनं सेवा च ते आदी यस्य तद्

कृषिसेवनादि । तथा सकला विद्याः पुराणाद्याः १४ शिक्षन्तु । सकला गीतनृत्याद्याः चतुःषष्टिकलाः शिक्षन्तु । तथा परं उत्कृष्टं प्रयत्नं कृत्वा खगवत् पक्षिवत् विपुलं विस्तीर्णं आकाशं प्रयातु गच्छतु । पुनः इह पृथिव्यां कर्मवशतः कर्मवशात् अभाव्यं अभविष्यत् न भवति । भाव्यस्य भविष्यतः वस्तुनः नाशः कुतः । नाशो न भवतीत्यर्थः ॥ ५६ ॥

वरं प्राणच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ संपातः पयसि पयसां पत्युरुचितः ॥ ५७ ॥

अह हेति खेदे । तुषाराद्रेः हिमालयस्य सूनोः पुत्रस्य मैनाकस्य । समदमघवन्मुक्तकुलिशप्रहारैः कृत्वा समदः प्रगर्वो यो मघवा देवेन्द्रः तेन मुक्तं यत्कुलिशं तस्य प्रहाराः क्षतयः तैः कृत्वा प्राणच्छेदः वरं श्रेष्ठं मनाक्प्रियम् । च अन्यत् पितरि हिमाचले क्लेशविवशे क्लेशेन कष्टेन विवशः आक्रान्तः तस्मिन् सति पयसां जलानां पत्युः आधारस्य सागरस्य पयसि जले असौ संपातः संपतनं न उचितः न योग्यः । किंलक्षणैः कुलिशप्रहारैः । उद्गच्छद्बहलदहनोद्गारगुरुभिः । उद्गच्छन्ति उद्यन्त उद्गुयन्तो ये बहलाः सान्द्रस्थूला ये दहनोद्गारा वैश्वानरस्फु( स्फु )लिङ्गास्तैः गुरवः अतिप्रौढाः तैः । दुःसह इत्यर्थः ॥ ५७ ॥

नेता यस्य बृहस्पतिः प्रहरणं वज्रं सुराः सैनिकाः
स्वर्गो दुर्गमनुग्रहः खलु हरेरैरावणो वारणः ।
इत्याश्चर्यबलान्वितोऽपि बलभिद्भग्नः परैः संगरे
तद्व्यक्तं ननु दैवमेव शरणं धिग्धिग्वृथा पौरुषम् ॥ ५८ ॥

यस्य बलभिदः देवेन्द्रस्य नेता शिक्षकः पालयितेत्यर्थः । बृहस्पतिः वाचस्पतिः । यस्य प्रहरणं आयुधं वज्रं कुलिशं यस्य सैनिकाः सुरा देवाः स्वर्गः नाकः यस्य दुर्गं वप्रः । यस्य देवेन्द्रस्य श्रीहरेः श्रीनारायणस्य अनुग्रहः कृपा यस्य वारणः गजः ऐरावणः ऐरावतः । खलु निश्चितम् । इत्यमुना प्रकारेण आश्चर्यबलान्वितोऽपि आश्चर्यकारिप्रभावयुक्तोऽपि । बलभित् देवेन्द्रः बलं दैत्यं हतवान् सोऽपि परैः शत्रुभिः संगरे संग्रामे भग्नः जितोऽभूत् । तत् तस्मात्कारणात् । ननु निश्चितं व्यक्तं प्रकटं दैवमेव अदृष्टमेव शरणं रक्षकं पौरुषं तु बलं तु धिक् धिक् अस्तु । यतः वृथा निरर्थकम् ॥ ५८ ॥

कर्मायत्तं फलं पुंसां बुद्धिः कर्मानुसारिणी ।
तथापि सुधिया भाव्यं सुविचार्यैव कुर्वता ॥ ५९ ॥

पुंसां पुरुषाणां फलं साध्यं भोगादि कर्मायत्तं कर्मणः आयत्तं अदृष्टाधीनं वर्तते । तथा बुद्धिः पुंसां कर्मानुसारिणी कर्म अदृष्टमनुसरतीति तथा । यादृक् कर्म तादृक् बुद्धिरित्यर्थः । न्यायश्चेवमस्ति । तथापि सुधिया शोभनबुद्धिना पुंसा सुविचार्यैव सुनिर्णीयैव कुर्वता कर्माणि विदधता भाव्यम् ॥ ५९ ॥

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥ ६० ॥

हि निश्चितम्। आलस्यं अनुद्यमता। मनुष्याणां पुरुषाणां शरीरस्थः देहस्थः महान् असाध्यः रिपुः शत्रुः वर्तते। उद्यमसमः उद्यमतुल्यः बन्धुः मित्रं न अस्ति। यं उद्यमं कृत्वा पुरुषः न अपसीदति न अवसादं दुःखं प्राप्नोति ॥ ६० ॥

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य।
यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥ ६१ ॥

[ अ. विनाश° ]

वित्तस्य धनस्य तिस्रो गतयः। त्रिसंख्याका गतयः गमनप्रकारा भवन्ति। तिस्रः काः। दानं वितरणं भोगः उपभोगः नाशः उपद्रवादिना अदृश्यत्वं च। यः पुरुषः न ददाति अर्थिभ्यो न वितरति। तथा न भुङ्क्ते तेन कृत्वा न विलसति तस्य वित्तस्य तृतीया नाशरूपा गतिर्भवति ॥ ६१ ॥

यस्यास्ति वित्तं स नरः कुलीनः स पण्डितः स श्रुतवान्गुणज्ञः।
स एव वक्ता स च दर्शनीयः सर्वे गुणाः काञ्चनमाश्रयन्ति ॥६२॥

यस्य पुरुषस्य वित्तं धनमस्ति विद्यते स नरः कुलीनः सत्कुलोत्पन्नः कथ्यते। स पण्डितः स विद्वान् कथ्यते। सः श्रुतवान् श्रुतं शास्त्रं विद्यते यस्य स तथा। शास्त्रवेत्ता विद्वान्। स गुणज्ञः स गुणवेदी। स एव वक्ता सुभाषी। च पुनः स दर्शनीयः द्रष्टुं योग्यः। उपपानित्यर्थः। यतः सर्वे अन्ये च गुणाः शौर्यौदार्यचातुर्यादयः काञ्चनं सुवर्णमेव आश्रयन्ति सेवन्ते। यत्र काञ्चनं तत्रैव सर्वे गुणा इत्यर्थः ॥ ६२ ॥

एतैर्महार्थैस्तुतुपुर्न देवा न भेजिरे भीमविषेण भीतिम्।
सुधां विना न प्रययुर्विरामं न निश्चितार्थाद्विरमन्ति धीराः ॥६३॥

[ १ अ. महार्घै ! रा. कोशे धंधयोर्भेदो दुर्घटः ]

देवा अमराः महार्थैः महान् अर्थो मूल्यं येषां तानि। तैः महामूल्यैः रत्नैः पारिजातादिभिरुत्कृष्टवस्तुभिः कृत्वा न तुतुषुः। न संतोषं प्रापुः। पुनः भीमविषेण। भीमं च तत् विषं च तेन भयंकरकालकूटेन भीतिं भयं न भेजिरे। न भीता बभूवुः। पुनः सुधामृतं विना विरामं न प्रयुः। उपरमं न प्रापुः। यतः धीराः धीमन्तः निश्चितार्थात् अवश्यं क्रियमाणार्थात् न विरमन्ति उदासीना न भवन्ति ॥ ६३ ॥

सन्त्यन्येऽपि बृहस्पतिप्रभृतयः संभाविता पञ्चषा-
स्तान्प्रत्येष विशेषविक्रमरुची राहुर्न वैरायते।
द्वावेव ग्रसते दिनेश्वरनिशाप्राणेश्वरौ भास्वरौ
भ्रातः पर्वणि पश्य दानवपतिः शीर्षावशेषीकृतः ॥६४॥

बृहस्पतिप्रभृतयः देवगुर्वाद्या अन्येऽपि इतरेऽपि ग्रहाः संभाविता लोकेषु पूजिताः शन्तः पञ्चषाः पञ्च षट् वा परिमाणं येषां ते तथा । सन्ति विद्यन्ते । एष राहुः विधुंतुदः तान्प्रति न वैरायते न वैरमाचरति । किं भूतः राहुः । विशेषविक्रमरुचिः । विशेष उत्कृष्टे यः विक्रमः पराक्रमः तस्मिन् रुचिः प्रीतिः यस्य स तथा । उत्कृष्टे पराक्रमाभिरुचिरित्यर्थः । परन्तु राहुः द्वौ एव ग्रसते गिलति । द्वौ कौ । दिनेश्वरनिशाप्राणेश्वरौ दिनेश्वरश्च निशाप्राणेश्वरश्च तौ सूर्याचन्द्रमसौ । क्व ग्रसते पर्वणि । अमावास्यायां पूर्णमास्यां च । हे भ्रातः सखे पश्य विलोकय । कथं ग्रसते । यतः किंलक्षणौ तौ भास्वरौ भासतः शोभेते इत्येवंशीलौ । तेजस्विनी बहवः शत्रव इत्यर्थः । किंलक्षणो राहुः । दानवपतिः दानवानां असुराणां पतिः स्वामी । पुनः किं० । शीर्षावशेषीकृतः । शीर्ष्णा मस्तकेन अवशेषीकृतः । अनवशेषः अवशेषः कृतः इत्यवशेषीकृतः ॥ ६४ ॥

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न च कङ्कणेन ।
विभाति कायः करुणापराणां परोपकारेण न चन्दनेन ॥६५॥

श्रोत्रं कर्णः श्रुतेन शास्त्रार्थश्रवणेन विभाति शोभते । न कुण्डलेन कर्णाभरणेन न विभाति । पाणिः करः दानेन विश्राणनेन विभाति न कङ्कणेन न कटकेन । करुणापराणां दयार्द्रमनसां पुरुषाणां कायः देहः परोपकारेण परेभ्यः अन्येभ्यः उपकारः साधुकरणं तेन आभाति । तु पुनः चन्दनेन मलयजेन न भाति ॥ ६५ ॥

जयन्ति ते सुकृतिनो रससिद्धाः कवीश्वराः ।
नास्ति येषां यशःकाये जरामरणजन्मभीः ॥ ६६ ॥

ते कवीश्वराः विद्वांसः । जयन्ति उत्कर्षेण वर्तन्ते । किंलक्षणाः । सुकृतिनः पुण्यवन्तः । पुनः किं० । रससिद्धा रसेषु शृङ्गारादिषु सिद्धाः ख्याताः । ते के । येषां यशःकाये यश एव कायः तस्मिन् कीर्तिशरीरे । जरामरणजन्मभीः । जरा वार्धक्यं च मरणं मृत्युश्च जन्म अवतरणं च तानि जरामरणजन्मानि तेभ्यः भीः भयं न अस्ति न विद्यते । येषां वैदुष्यकीर्तौ जरादिभ्यो भयं नास्तीत्यर्थः ॥ ६६ ॥

यद्धात्रा निजभालपट्टलिखितं स्तोकं महद्वा धनं
तत्प्राप्नोपि मरुस्थलेऽपि नितरां मेरौ च नातोऽधिकम् ।
तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः
कूपे पश्य पयोनिधावपि घटो गृह्णाति तुल्यं जलम् ॥६७॥

[१ रा. मूले 'प्राप्नोति']

हे सखे धात्रा (ब्र)ह्मणा निजभालपट्टलिखितं निजं च तत् भालं च तदेव पट्टः लेखास्पदं तस्मिन् लिखितं आत्मीयललाटे लिखितं स्तोकं स्वल्पं वा महत् बहुतरं वा धनं

वित्तं अस्ति तत् मरुस्थलेऽपि निर्जलधूलिस्थलेऽपि विषये नितरां अतिशयेन प्राप्नोपि प्राप्स्यसि । वर्तमानसामीप्ये वर्तमानवद्वेति भविष्यार्थे वर्तमानप्रयोगः । अतः अस्माद्धनात् । किंतु धनकणवर्षते अधिकं न । तत् तस्मात्कारणात् धीरो धैर्यवान्भव संपश्यस्व । वित्तवस्तु धनवस्तु पुरुषेषु कृपणां दीनां वृत्तिं व्यवहारं वृथा निरर्थकं मा कृथाः । न कुरु । पश्य विलोकय । घटः कुम्भः कूपे अम्भोधे इति प्रान्ते ) पयोनिधावपि समुद्रेऽपि तुल्यं तावदेव न न्यूनं नाधिकं च जलं उदकं गृह्णाति स्वीकरोति ॥ ६७ ॥

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुंगवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ ६८ ॥

श्वा शब्देभेः । पिण्डदस्य अन्नपिण्डदातुः । लाङ्गूलचालनं लाङ्गूलस्य पुच्छस्य चालनं भ्रामणं करोति । तथा अधः नीचैः चरणावपातं पदप्रसारं करोति । तथा भूमौ निपत्य पतित्वा वदनोदरदर्शनं च । वदनं च उदरं च तयोः दर्शनं कारयति । पुनः । गजपुंगवः गजनन्दनस्तु धीरं यथा स्यात्तथा विलोकयति पश्यति । च पुनः चाटुशतैः चाटूनां शतैः प्रियोक्तिवचनानां सहस्रैः आतस्तातेत्यादिभिः भुङ्क्ते अभ्यवहरति ॥ ६८ ॥

राजन्दुधुक्षसि यदि क्षितिधेनुमेनां
तेनाद्य वत्समिव लोकमिमं पुषाण ।
तस्मिंश्च सम्यगनिशं परिपोष्यमाणे
नानाफलैः फलति कल्पलतेव भूमिः ॥ ६९ ॥

[१ रा. टी 'मेतां']

हे राजन् यदि चेत् एतां क्षितिधेनुं क्षितिरेव धेनुः तां भूमिधेनुं दुधुक्षसि दोग्धुमिच्छसि । तेन कारणेन अद्य इमं लोकं प्रजां वत्समिव वत्सेन तुल्यं पुषाण पोषय । च अन्यत् तस्मिन् लोकवत्से सम्यक् साधुत्वेन अनिशं 'निरन्तरं परिपोष्यमाणे परिपुष्टिं प्राप्यमाणे( णे ) सति । भूमिधेनुः कल्पलतेव कल्पवल्लीव । नानाफलैः अनेकप्रकारैः फलैः ओघैः फलति ॥ ६९ ॥

सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्यपरा वदान्या ।
नित्यव्यया प्रचुरनित्यधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ७० ॥

[१ रा. मूले 'पुरुषा']

नृपर्नीतिः राजनीतिः राजव्यवहार इत्यर्थः । अनेकरूपा नानाविधा वर्तते । वेश्य । वाराङ्गनेव वेश्येव । यथा सा अनेकाकृतिधरा भवति । किंलक्षणा नृपनीतिः वाराङ्गना च । क्वचित्तत्या क्वापि अनृता असत्या कार्यानुसारेण सत्यमपत्यं वा वदतीत्यर्थः । पुनः किं० । परुषा कठिनभाषिणी क्वचिच्चियवादिनी मधुरभाषिणी तथा क्वचित् हिंस्रा हिंसाशीला । च अन्यत् । दयालुरपि क्वापि कृपापरा । च अन्यत् क्वचित् अर्थपरा धनसंग्रहपरायणा क्वचित् क्वान्या दानपरायणा तथा नित्यव्यया नित्यं व्ययो वितरणं यस्याः सा तथा । चान्यत् प्रचुरनित्यधनागमा प्रचुरा बहवो नित्यं सदा धनागमा यस्याः सा तथा भवतीति वेश्यापि तथैवेति ॥ ७० ॥

न क्वचिच्चण्डकोपानामात्मीयो नाम भूभुजाम् ।
होतारमपि जुह्वानं स्पृष्टो दहति पावकः ॥ ७१ ॥

[ १ अ. ' भूभृताम् ' ]

नामेति संभावनायाम् । चण्डकोपानां प्रचण्डकोपानां भूभुजां राज्ञां क्वचित्कोऽपि आत्मीयः स्वकीयो न भवति । अत्रार्थान्तरन्यासः । पावकः वैश्वानरः स्पृष्टः सन् होतारं जुह्वानमपि जुह्वतमपि दहति भस्मीकरोति ॥ ७१ ॥

विरम विरसायासादस्माद्दुरध्यवसायतो
विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे ।
अयि जडधिये कल्पापाये व्यपेतनिजक्रमाः
कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः ॥ ७२ ॥

अयीति कोमलामन्त्रणे । हे जडधिये त्वं अस्मात् दुरध्यवसायतः । दुः अध्यवसायः व्यापारः तस्मात् दुष्कर्मणः विरम पृथग्भव । किंलक्षणात् । विरसायासाद् । विरसः नीरसः आयासः श्रमो यस्य स तथा तस्मात् । कोऽसौ दुरध्यवसाय इत्यत आह । यत् विपदि विपत्तौ सत्यां महतां महात्मनां धैर्यध्वंसं धीरत्वहानिं । ईक्षितुं द्रष्टुं ईहसे वाञ्छसे । एते महान्तः क्षुद्राः लघवः कुलशिखरिणः कुलपर्वताः न भवन्ति० । वा अथवा एते जडराशयः समुद्राः न । किंभूताः क्षुद्राः लघवः पुनः किंलक्षणाः उभये । कल्पापाये कल्पस्यापायोऽन्तः तस्मिन् व्यपेतनिजक्रमाः । व्यपेतः गतः निजक्रमः गुरुत्वगाम्भीर्यादिः येषां ते तथा ॥ ७२ ॥

अकरुणत्वमकारणविग्रहः परधनाय रतिः परयोषिति ।
स्वजनबन्धुजनेष्वसहिष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनाम् ॥७३॥

[ १ ख. मूले ' ता ' इति वर्णः ' ति ' इति पश्चात्कृतः ]

हि निश्चितम् । पुरात्मनां पापिनां इदं प्रकृतिसिद्धं स्वभावसहजं वस्तु वर्तते । इदं किं यत् अकरुणत्वं निर्दयत्वं तथा अकारणविग्रहः कारणं विनैव विग्रहः कलहो भवति । पुनः परधनाय परेषामन्येषां धनाय रतिः सक्तिर्भवति । तथा परयोषिति अन्येषां स्त्रियां रतिः सक्तिश्च भवति । तथा स्वजनबन्धुजनेषु स्वजनाश्च बन्धुजनाश्च तेषु आत्मीयवर्गेषु सुहृज्जनेषु च असहिष्णुता असहिष्णोर्भावः । अक्षमशीलत्वं चेति॥७३॥

कान्ताकटाक्षविशिखा न खनन्ति यस्य
चित्तं न निर्दहति कोपकृशानुतापः ।
कर्षन्ति भूरिविषयाश्च न लोभपाशा
लोकत्रयं जयति कृत्स्नमिदं स धीरः ॥ ७४ ॥

स धीरः पुमान् । इदं कृत्स्नं समग्रं लोकत्रयं त्रैलोक्यं जयति । स कः । यस्य चित्तं मनः कर्म कान्ताकटाक्षविशिखाः । कान्ताः सुन्दर्यः स्त्रियः तासां कटाक्षा वक्रनिरीक्षणानि त एव विशिखा बाणाः कर्तारः न खनन्ति । न विदारयन्ति । तथा कोपकृशानुतापः । कोप एव कृशानुः वैश्वानरः स एव तापः क्रोधाग्निः यस्य चित्तं न निर्दहति । तथा भूरिविषयाः भूरयश्च ते विषयाश्च ते । लोभ एव पाशास्तैः कृत्वा यस्य चित्तं न कर्षन्ति न आकर्षन्ति । न वशीकुर्वन्तीत्यर्थः ॥ ७४ ॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खलसज्जनानाम् ॥७५॥

खलसज्जनानां दुर्जनसज्जनानां मैत्री मित्रता दिनस्य पूर्वार्धपरार्धभिन्ना पूर्वार्धं प्रथमार्धं च परार्धं उत्तरार्धं च पूर्वापरार्धे ताभ्यां भिन्ना भिन्ना युक्ता छाया इव आतपप्रत्यनीकेव भवति । किंलक्षणा पूर्वार्धच्छाया प्रारम्भगुर्वी । आदौ गरीयसी । पुनः किंलक्षणा क्रमेण क्षयिणी क्षयिष्णुः । किंलक्षणा परार्धच्छाया । पुरा पूर्वं लघ्वी अतिशयेन लघुः । पुनः किं० । पश्चाद्वृद्धिमती वर्धमाना ॥ ७५ ॥

प्रदानं प्रच्छन्नं गृहमुपगते संभ्रमविधिः
प्रियं कृत्वा मौनं सदसि कथनं चाप्युपकृतेः ।
अनुत्सेको लक्ष्म्या निरभिभवसाराः परकथाः
सतां केनोद्दिष्टं विषममसिधाराव्रतमिदम् ॥ ७६ ॥

[ १ अ. °धृतं° ]

सतां सत्पुरुषाणां इदं विषमं असिधाराव्रतं असिधारायाः खड्गधारायाः व्रतं दुष्करमित्यर्थः । केन उद्दिष्टं केन कथितं । इदं किम । प्रच्छन्नं गुप्तं प्रदानम् । पुनः गृहं उपगते प्राप्ते

सति । संभ्रमविधिः । आदरविधिः । तथा प्रियं अभीष्टं कृत्वा मौनं तूष्णींभावः । न कथयेदित्यर्थः । च अन्यत् । उपकृतेः उपकारस्य तेन कृतस्येत्यर्थः । सदसि सभायां कथनं प्रकाशनम् । लक्ष्म्या समृद्ध्या कृत्वा अगुत्सेकः उत्सेकाभावः अगर्वित्वमित्यर्थः । तथा परकथाः परेषामन्येषां कथा वार्ताः निरभिभवसाराः । अभिभवाभावः निरभिभवः तेन सराः श्रेष्ठाः कथाः । नाभिभूयन्त इत्यर्थः ॥ ७६ ॥

छिन्नोऽपि रोहति तरुः क्षीणोऽप्युपचीयते पुनश्चन्द्रः ।
इति विमृशन्तः सन्तः संतप्यन्ते न विधुरेऽपि ॥ ७७ ॥

सन्तः इति विमृशन्तः इति विचारयन्तः सन्तः विपदां पदेषु विधुरेऽपि स्थाने न संतप्यन्ते । न संतापं प्राप्नुयुः । इतीति किम् । छिन्नोऽपि लूनोऽपि तरुः वृक्षो रोहति अङ्कुरवान्भवति । तथा क्षीणोऽपि क्षयं प्राप्तोऽपि चन्द्रः पुनः उपचीयते वृद्धिं प्राप्नोति ॥७७॥

भवन्ति नम्रास्तरवः फलोद्गमै-
र्नवाम्बुभिर्भूरिविलम्बिनो घनाः ।
अनुद्धताः सत्पुरुषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम् ॥ ७८ ॥

तरवः वृक्षाः फलोद्गमैः फलोदयैः नम्रा नता भवन्ति । तथा नवाम्बुभिः नवोदकैः कृत्वा । घनाः मेघाः भूरिविलम्बिनः भूरि बहु विलम्बन्ते ते तथा । अतिनीचा इत्यर्थः । तथा सत्पुरुषाः समृद्धिभिः विभवातिशयैः अनुद्धता नम्रा भवन्ति । यतः परोपकारिणां परेभ्यः उपकुर्वते ये तेषां एष एव नम्रत्वलक्षण एव स्वभावः प्रकृतिः ॥ ७८ ॥

कदर्थितस्यापि हि धैर्यवृत्तेर्न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्नेर्नाधः शिखा याति कदाचिदेव ॥७९॥

हि निश्चितम् । कदर्थितस्य क्लेशितस्यापि धैर्यवृत्तेः धैर्येण वृत्तिर्वर्तनं यस्य स तथा । तस्य धीरस्य । धैर्यगुणः गम्भीरत्वगुणः । प्रमार्ष्टुं स्फेटयितुं न शक्यते । न स्फेट्यत इत्यर्थः । अत्रार्थान्तरन्यासः । यतः वह्नेर्वैश्वानरस्य अधोमुखस्य अवाङ्मुखस्यापि कृतस्य सतः शिखा ज्वाला कदाचिदपि अधो न याति । नीचैर्न गच्छति ॥ ७९ ॥

अप्रियवचनदरिद्रैः प्रियवचनाढ्यैः स्वदारसंतुष्टैः ।
परपरिवादनिवृत्तैः क्वचित्क्वचिन्मण्डिता वसुधा ॥ ८० ॥

वसुधा पृथिवी एवंविधैः पुरुषैः क्वचित्क्वचित् केषु केषु स्थानेषु मण्डिता अलंकृता वर्तते । किंलक्षणैः । अप्रियवचनदरिद्रैः । अप्रियवचनानां कठोरवाक्यानां दरिद्राः तैः ।

वेषावधिर्वचनं मास्तीत्यर्थः । पुनः किं० । प्रियवचनाढ्यैः प्रियवचनानां सामवाक्यानां आढ्याः तैस्तैः धनिन इत्यर्थः । तैः । तेषां प्रियवचनानि बहूनि सन्तीत्यर्थः । पुनः किं० । स्वदारसंतुष्टैः । स्वदारेषु स्वयोषित्सु संतुष्टाः संतोषिणः ते तैः । परस्त्रीपरिहारिभिरित्यर्थः । पुनः किं० । परपरिवादनिवृत्तैः । परेषामन्येषां परिवादाः निन्दावचनानि तेभ्यो निवृत्ताः व्यावृत्ताः तैः परनिन्दादूरस्थैः ॥ ८० ॥

पद्माकरं दिनकरो विकचं करोति
चन्द्रो विकाशयति कैरवचक्रवालम् ।
नाभ्यर्थितोऽपि जलदः सलिलं ददाति
सन्तः स्वयं परहितेषु कृताभियोगाः ॥ ८१ ॥

[१ रा. मूले 'दिनकरं']

सन्तः सत्पुरुषाः परहितेषु अन्याभीष्टकरणेषु । कृताभियोगाः कृतः अभियोग उद्यमो यैस्ते तथा कृतोद्यमा भवन्ति । तत्र दृष्टान्ताः । दिनकरः श्रीसूर्यः पद्माकरं पद्मानां आकरं कमलखण्डं विकचं विकासितं करोति । तथा चन्द्रः कैरवचक्रवालं कुमुदमण्डलं कैरवाणां चक्रवालं मण्डलं विकाशयति विकाशं प्रापयति । तथा जलधरो मेघः नाभ्यर्थितोऽपि नयाचितोऽपि जलं सलिलं ददाति ॥ ८१ ॥

एकेनापि हि शूरेण पादाक्रान्तं महीतलम् ।
क्रियते भास्करेणैव स्फारस्फुरिततेजसा ॥ ८२ ॥

[ अ. पदा ]

हि निश्चितम् । एकेनापि केवलेनापि शूरेण धीरेण पुरुषेण क्षमातलं महीतलं पादाक्रान्तं पादाभ्यां चरणाभ्यां आक्रान्तं क्रोडीकृतं क्रियते । आयत्तं विधीयत इत्यर्थः । किंलक्षणेन शूरेण । स्फारस्फुरिततेजसा स्फारं महत् स्फुरितं प्रवृत्तं तेजः प्रभावो यस्य स तथा तेन । केनेव । भास्करेणेव । यथा श्रीसूर्येण क्षमातलं पादाक्रान्तं पादैः किरणैः आक्रान्तं व्याप्तं क्रियते । किं० भास्करेण । स्फारस्फुरिततेजसा स्फारं प्रभूतं स्फुरितं वर्षतः प्रभूतं तेजो दीप्तिर्यस्य स तथा तेन ॥ ८२ ॥

वरं शृङ्गोत्तुङ्गाद्गुरुशिखरिणः क्वापि विषमे
पतित्वायं कायः कठिनहृषदन्तर्विदलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने
वरं वह्नौ पातस्तदपि न कृतः शीलविलयः ॥ ८३ ॥

[ रा. मूले विषये ]

अयं कायः देहः । गुरुशिखरिणः । गुरुश्चासौ शिखरी च तस्य महापर्वतस्य । शृङ्गोत्तुङ्गात्—उत्तु( तु )ङ्गशृङ्गं इति शृङ्गोत्तुङ्गं तस्मात् । उच्चशृङ्गादित्यर्थः । क्वापि

कस्मिन्नपि विषमे गहने स्थाने पतित्वा भ्रष्ट्वा काठिनहृषदन्तविश्लेषितः। कठिनाः कठोराश्च ते हृषदः पाषाणाश्च तेषामन्तर्मध्ये विदलितश्चूर्णीकृतः वरं श्रेष्ठम्। तथा तीक्ष्णदशने। तीक्ष्णाः तीव्रा दशनाः दन्ता यस्मिन् तत्तथा तस्मिन् फणिपतिमुख। फणिपतेः महासर्पस्य मुखे वदने न्यस्तः आरोपितो हस्तः करः वरमीषात्प्रियं ततो मरणं भवेदित्यर्थः। तथा वह्नौ ज्वलति वैश्वानरे पातः पतनं वरम्। मनाङ्मिश्रयम्। तदपि तत्रापि कृतः विहितः शीलविलयः शीलस्य आचारस्य ब्रह्मचर्यस्य विलयः नाशः न वरं न श्रेष्ठः। निन्द्य इत्यर्थः॥ ८३॥

वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणा-
न्मेरुः स्वल्पशिलायते मृगपतिः सद्यः कुरङ्गायते।
व्यालो माल्यगुणायते विषरसः पीयूषवर्षायते
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति॥८४॥

[ १ अ. शिखायते. ]

यस्य पुरुषस्य अङ्गे शरीरे शीलं सदाचारः ब्रह्मचर्यं वा समुन्मीलति प्रवर्तते तस्य पुरुषस्य वह्निर्वैश्वानरः जलायते जलमिवाचरति शीतो भवतीत्यर्थः। तथा तस्य जलधिः समुद्रः कुल्यायते कुल्येवाचरति। तत्क्षणात् कृत्रिमसरिदिव भवतीत्यर्थः। समुद्रेऽपि न मज्जतीत्यर्थः। तस्य पुरुषस्य मेरुः कनकगिरिः अतिगहनोऽपि स्वल्पशिलायते स्वल्पशिलेवाचरति अतिलघुर्भवतीत्यर्थः। तथा मृगपतिः सिंहः तस्य सद्यः तत्क्षणं कुरङ्गायते। कुरङ्गो मृगः तद्वदाचरति। मृगवद्भीतो भवतीत्यर्थः। तथा व्यालः दुष्टः सर्पः माल्यगुणायते माल्यानां पुष्पाणां गुणः दोरकः पुष्पमाला तद्वदाचरति। तद्वदनुपद्रवकारी सुस्पर्शश्च भवतीत्यर्थः। तथा तस्य विषरसः कालकूटस्य रसः पीयूषवर्षायते पीयूषस्यामृतस्य वर्षः वृष्टिः तद्वदाचरति। अबाधकः सन् प्रत्युत सुखकारी भवतीत्यर्थः। किंलक्षणं शीलं अखिललोकवल्लभतमं अतिशयेन अखिलानां समग्राणां लोकानां वल्लभं प्रियतरम्॥ ८४॥

यदचेतनोऽपि पादैः स्पृष्टः प्रज्वलति सवितुरिनकान्तः।
तत्तेजस्वी पुरुषः परकृतनिकृतिं कथं सहताम्॥ ८५॥

तत्तस्मात्कारणात्तेजस्वी, अभिमानी सप्रतापो वा पुरुषः। परकृतनिकृतिं परैः अन्यैः कृतां विहितां निकृतिं पराभवं कथं कस्मात् सहतां क्षमतां अपि तु न सहताम्। तत्कुतः। यद्यस्मात्कारणात्। अचेतनोऽपि न चेतनः अचेतनः। जडोऽपि इनकान्तः सूर्यकान्तमणिः सवितुः श्रीसूर्यस्य पादैः किरणैः स्पृष्टः सन् प्रज्वलति। ज्वलितः प्रदीप्तो भवति। यदा अचेतनोऽपि ज्वलति तदा सचेतनः प्रतापवांश्च ज्वलत्यत्र किं चित्रमिति भावः॥ ८५॥

आज्ञा कीर्तिः पालनं ब्राह्मणानां दानं भोगो मित्रसंरक्षणं च।
येषामेते षड्गुणा न प्रवृत्ताः कोऽर्थस्तेषां पार्थिवोपाश्रयेण॥८६॥

येषां पुरुषाणां पार्थिवोपाश्रयेण पार्थिवस्योपाश्रयः । तेन राजाश्रयेण किं प्रयोजनं नास्तीत्यर्थः । एते के । एका आज्ञा शासनं येनोक्तं स सर्वः सर्वैर्विधीयते इत्यर्थः । तथा कीर्तिः यशः सच्छन्द(?)इत्यर्थः । तथा ब्राह्मणानां पालनम् । ब्राह्मणानामित्युपलक्षणं सर्वलोकानां पालनमित्यर्थः । तथा दानं यथावसरं वितरणं तथा भोगः सुखानुभवः । तथा मित्रसंरक्षणं च मित्राणां सुहृदां संरक्षणं व्यसनेभ्यस्त्राणम् ॥ ८६ ॥

व्यालं बालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणीञ्छिरीषकुसुमप्रान्तेन संनह्यते ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
नेतुं वाञ्छति यः सतां पथि खलान्सूक्तैः सुधास्यन्दिभिः ॥८७॥

[१ रा. मूले टीकायां च 'शरीष' ]

यः पुरुषः खलान् दुर्जनान् सुधास्यन्दिभिः । सुधां अमृतं स्यन्दन्ति क्षरन्ति तानि सुधास्यन्दीनि तैः अमृतस्राविभिः सूक्तैः सु शोभनानि उक्तानि भाषणानि सूक्तानि तैः कृत्वा सतां साधूनां पथि मार्गे सदाचारे इत्यर्थः । नेतुं प्रवर्तयितुं वाञ्छति अभिलषति । असौ पुमान् बालमृणालतन्तुभिः बालाः कोमलाश्च ते मृणालतन्तवश्च पद्मिनीतन्तवः तैः कृत्वा व्यालं दुष्टगजं रोद्धुं बन्धुं समुज्जृम्भते वाञ्छति । तथा स पुमान् शरीषकुसुमप्रान्तेन शिरीषकुसुमस्य प्रान्तेन अग्रेण वज्रमणीन् हीरकान् भेत्तुं वेद्धुं संनह्यते संनद्धो भवति । पुनः स पुमान् मधुबिन्दुना मधुनः क्षौद्रस्य बिन्दुना कणेन क्षाराम्बुधेः क्षारसमुद्रस्य माधुर्यं मधुरत्वं रचयितुं विधातुं ईहते चेष्टते व्याप्रियते वाञ्छतीत्यर्थः ॥ ८७ ॥

स्वायत्तमेकान्तहितं विधात्रा विनिर्मितं छादनमज्ञतायाः ।
विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ॥८८॥

विधात्रा ब्रह्मणा मौनं तूष्णींभावः । एवंभूतं विनिर्मितं निष्पादितम् । किंलक्षणं मौनं स्वायत्तं स्वस्यायत्तं अधीनम् । आत्मनो वशे वर्तते इत्यर्थः । पुनः किं० । एकान्ते हितं एकान्तं निरन्तरं हितं हितकारि । मौनिनो निरपराधित्वादित्यर्थः । पुनः किं० । अज्ञतायाः मूर्खत्वस्य छादनं आवरणम् । मूर्खो हि मौनवान्न ज्ञायते इत्यर्थः । पुनः किं० मौनम् । सर्वविदां सर्वं विदन्ति जानन्ति ये ते सर्वविदः । तेषां समाजे सभायां अपण्डितानां पण्डितेभ्योऽन्येषां मूर्खाणामित्यर्थः । विशेषतो विशेषेण विभूषणं आभरणम् । मौनवान्न विरुध्यते न निन्द्यते इत्यर्थः ॥ ८८ ॥

उद्भासिताखिलखलस्य विशृङ्खलस्य
प्राग्जातविस्मृतनिजाधमकर्मवृत्तेः ।
दैवादवाप्तविभवस्य गुणद्विषोऽस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ॥ ८९ ॥

अस्य नीचस्य अपशब्दस्य गोचरगतैः गोचरं गताः तैः विषयं प्राप्तैः कैः पुरुषैः पुंभिः यथा स्यात्तथा आस्यते स्थीयते । अपि तु न कैरपि । किंभूतस्य नीचस्य । उद्भासिताखिलखलस्य । उद्भासिताः शोभां प्रापिताः अखिलाः समग्राः खलाः येन स तथा तस्य । पुनः किं० । विशृङ्खलस्य विगता शृङ्खला अर्गला यस्य स तथा तस्य । निरङ्कुशस्येत्यर्थः । पुनः किं० । प्राग्जातविस्मृतनिजाघमकर्मवृत्तेः । प्रागुजाता पूर्वमनुभूता विस्मृता विस्मरं प्रापिता निजा आत्मीया अघमा निकृष्टा कर्मवृत्तिः कर्मणा जीविका येन स तथा तस्य । पुनः किं० । दैवात् प्राकृतकर्मणः अवाप्तविभ( व )स्य अवाप्तः प्राप्तः विभवो धनं येन स तथा तस्य । पुनः किं० । गुणद्विषः गुणान् पं( पां )क्तिकौलीन्यादीन् द्वेष्टीति गुणद्विट् तस्य । एवंभूतस्य दुर्जनस्याग्रे न केनापि साधुना जीव्यत इत्यर्थः ॥८९॥

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं
विद्या राजसु पूज्यते न हि धनं विद्याविहीनः पशुः ॥९०॥

नामेति निश्चितम् । विद्या अध्ययनं नरस्य अधिकं अतिशयवत् रूपं वर्तते । कुरूपस्यापि शोभाकरत्वादित्यर्थः । विद्या नरस्य प्रच्छन्नगुप्तं प्रच्छन्नं च तत् गुप्तं च एवंभूतं धनम् । तथा विद्या नरस्य भोगकरी भोगान् विलासान् कारयतीति सा तथा । पुनः यशःसुखकरी यशश्च सुखं च यशःसुखे ते करोतीति तथा । कीर्त्यानन्दविधात्री । तथा विद्या गुरूणां गुरुः । मान्यानामपि मान्या । तथा विद्या विदेशगमने परदेशगमने बन्धुजनः बान्धवसार्थः । तथा नरस्य विद्या परं श्रेष्ठं दैवतं पालकत्वात् । तथा विद्या राजसु राजमण्डलेषु पूज्यते । हि निश्चितं धनं न पूज्यते । राजानोऽपि हि विदुषः पूजयन्ति । न धनवतः । अथ किं बहुनोक्तेन । विद्याविहीनः पुरुषः पशुः पशुतुल्य इत्यर्थः ॥ ९० ॥

दाक्षिण्यं स्वजने दया परजने शाठ्यं सदा दुर्जने
प्रीतिः साधुजने क्षमा गुरुजने नारीजने धूर्तता ।
शौर्यं शत्रुजने समयः खलजनें विद्वज्जनेष्वार्जवं
ये चैवं पुरुषाः कलासु कुशलास्तेषां हि लोके स्थितिः ॥९१॥

च अन्यत् ये पुरुषाः एवममुक्त( एवममुना वा एवमुक्त )प्रकारेण कलासु कुशलाः चतुरा भवन्ति । हि निश्चितं तेषां लोके । स्थितिः जीवनमर्यादा भवति । एवं कथं येषां पुरुषाणां स्वजने दाक्षिण्यं स्वजननिषये लज्जाविधेयत्वम् । तथा परजने अन्यलोके दया ।

तथा सदा दुर्जने असाधुजने शाठ्यं दृढत्वं तथा येषां साधुजने प्रीतिः सज्जने प्रेमविषयत्वं तथा गुरुजने पूज्य जने क्षमा सहिष्णुत्वं तथा नारीजने स्त्रीवर्गे धूर्तता वञ्चकत्वं स्त्रीषु हि सत्यं न प्रशस्यते। तथा खलजने दुर्जने स्मयः गर्वः तथा विद्वज्जने पण्डितजने आर्जवम्। ऋजोर्भावः सरलत्वं तथा शत्रुजन वरिजने शौर्यं शरलस्य( शूरस्य )भावः। शत्रुषु हि कातरत्वं न प्रशस्यते ॥ ९१ ॥

करे श्लाघ्यस्त्यागः शिरसि गुरुपादप्रणमनं
मुखे सत्या वाणी विजयि भुजयोः पौरुषमहो।
हृदि स्वच्छा वृत्तिः श्रुतमधिगतं च श्रवणयो-
र्विनाप्यैश्वर्येण प्रकृतिमहतां मण्डनमिदम् ॥ ९२ ॥

[१ शोधनात्पूर्वं रा. मूले 'प्रणयितं' २ रा. मूले टीकायां च विजयी.]

महतां सत्पुरुषाणां ऐश्वर्येण ईश्वरस्य भावः ऐश्वर्यं तेन विनापि प्रभुत्वमृतेऽपि प्रकृतिः सहजं इदं एतत मण्डनं अलंकरणं वर्तते। इदं किं करे हस्ते श्लाघ्यः प्रशस्यः त्यागः दानं शिरसि मस्तके गुरुपादप्रणमनं गुरूणां पूज्यानां पादप्रणमनं चरणेषु नतिः तथा मुखे सत्या अनुपद्रवकारिणी यथार्था वाणी वाक्। तथा भुजयोः बाहवोः विजयी( यि ) विजयशीलं पौरुषं अतुलं बलं तथा हृदि मनसि स्वच्छा सुतरां अच्छा निर्मला वृत्तिः प्रवृत्तिः तथा श्रवणयोः कर्णयोः श्रुतं शास्त्रं अधिगतं प्राप्तं अलंकरणम् ॥ ९२।

वहति भुवनश्रेणीं शेषः फणाफलकस्थितां
कमठपतिना मध्येपृष्ठं सदा स च धार्यते।
तमपि कुरुते क्रीडाधीनं पयोधिरनादरा-
दहह महतां निःसीमानश्चरित्रविभूतयः ॥ ९३ ॥

अहह इत्याश्चर्ये। महतां चरित्रविभूतयः। चरित्रस्य विभूतयः महिमानः निःसीमानः निर्गता सीमा मर्यादा याभ्यस्ताः तथा वर्तन्ते। अतिमहत्य इत्यर्थः। यतः कारणात् शेषो नागपतिः भुवनश्रेणीं भुवनानां श्रेणीं परंपरां फणाफलकस्थितां फणाधाः फलके उपरिभागे स्थितां वर्तमानां वहति बिभर्ति। च अन्यत् स शेषः नागः कमठपतिना श्रीकच्छपरूपिणा भगवता मध्येपृष्ठं पृष्ठमध्ये धार्यते ध्रियते पयोधिः समुद्रः तमपि कच्छपमपि अनादरात् हेलया क्रीडाधीनं क्रीडस्य मध्यभागैकदेशस्य अधीनं आयत्तं कुरुते इति ॥ ९३ ॥

स्पृहयति भुजयोरन्तरमायतकरवालकररुहविदीर्णम्।
विजयश्रीर्वीराणां व्युत्पन्नप्रौढवनितेव ॥ ९४ ॥

[ १ अ. विनितेव. ]

विजयश्रीः जयसमृद्धिः वीराणां धीराणां भुजयोः बाह्वोः अन्तरं मध्यं व्युदस्यति वाञ्छति। किंलक्षणं भुजान्तरम्। आयतकरवालकरुहविदीर्णम्। आयतं दीर्घं यत् करवालं खड्गः स एव करुहो नखः तेन विदीर्णं विदारितं केव व्युत्पन्नप्रौढवनितेव। व्युत्पन्ना चतुरा या प्रौढवनिता महती वधूः सा यथा वीराणां भुजयोरन्तरं व्युदस्यति। किंभूतं मध्यं आयतकरवालकरुहविदीर्णं आयतकरवालवत् नीला ये करुहाः तैर्विदीर्णम् ॥ ९४ ॥

लज्जां गुणोघजननीं जननीमिवार्या-
मत्यन्तशुद्धहृदयामनुवर्तमानाः।
तेजस्विनः सुखमसूनपि संत्यजन्ति
सत्यव्रतव्यसनिनो न पुनः प्रतिज्ञाम् ॥ ९५ ॥

[१ रा. मूले 'मानाम्']

तेजस्विनः महातेजसः पुरुषाः लज्जां अकार्यकरणात्। ह्रियं अनुवर्तमानाः अनुसरन्तः सन्तः सुखं यथा स्यात्तथा असूनपि प्राणानपि संत्यजन्ति जहति। पुनः प्रतिज्ञां अङ्गीकृतं न संत्यजन्ति। किंलक्षणाः सन्तः सत्यव्रतव्यसनिनः। सत्ये यथार्थभाषणे व्रते आचरणे व्यसनं आसक्तिः विद्यते येषां ते तथा। किंलक्षणां लज्जां गुणौघजननीं गुणानां ओघान् समूहान् जनयति उत्पादयति सा तथा ताम्। पुनः किं०। आर्यां श्रेष्ठां पुनः किं०। अत्यन्तशुद्धहृदयां अत्यन्तं अतिशयेन शुद्धं निर्मलं नीरागं हृदयं मनः यया सा तथा ताम् कामिवानुवर्तमानाः स्वां स्वकीयां जननीं मातरमिव यथा। केचिदुक्तलक्षणां जननीं अनुसरन्तः स्वां प्रतिज्ञां न त्यजन्ति ॥ ९५ ॥

परिवर्तिनि संसारे मृतः कोऽपि न जायते।
स जातो येन जातेन याति वंशः समुन्नतिम् ॥ ९६ ॥

परिवर्तिनि। परिवर्तते परिभ्रमतीत्येवंशीलः परिवर्ती तस्मिन् भ्रमणशीले संसारे भवे कः पुमान् मर्त्यः मनुष्यो न जायते नोत्पद्यते। परं तु स पुमान् जातः उत्पन्नः। कथ्यते इति शेषः। स कः येन जातेन वंशोऽन्वयः समुन्नतिं महत्त्वं याति प्राप्नोति ॥ ९६ ॥

सिंहः शिशुरपि निपतति मदमलिनकपोलभित्तिषु गजेषु।
प्रकृतिरियं सत्त्ववतां न खलु वयस्तेजसो हेतुः ॥ ९७ ॥

शिशुरपि बालोऽपि सिंहः पञ्चाननः गजेषु हस्तिषु महत्सु निपतति गजान् आस्कन्दतीत्यर्थः। किंलक्षणेषु गजेषु। मदमलिनकपोलभित्तिषु मदेन दानोद्भवेन मलिनाः कपोलभित्तयः गण्डस्थल्यो येषां ते तथा तेषु। यतः सत्त्ववतां इयं प्रकृतिः बलवतां अयं स्वभावः यन्महत्सु विक्रमेरन्। खलु यस्मात्। वयः देहावस्था तेजसः बलस्य हेतुः कारणं न। नहि वयसैव बलीयान्भवतीति भावः ॥ ९७ ॥

किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष य-
त्किं वा नास्ति परिश्रमो दिनपतेरास्ते न यच्चिश्चलः।
किं चाङ्गीकृतमुत्सृजञ्जन इव श्लाघ्यो जनो लज्जते
निर्वाहः प्रतिपन्नवस्तुनि सतामेतद्धि गोत्रव्रतम् ॥९८॥

हि निश्चितम्। सतां साधुपुरुषाणां एतत् इदं गोत्रव्रतं गोत्रस्य व्रतं कुलव्रतं सतां गोत्रे इदं अवश्यं कर्तव्यमित्यर्थः। एतत्किं यत् प्रतिपन्नवस्तुनि प्रतिपन्नं अङ्गीकृतं च तत् वस्तु च तस्मिन् अङ्गीकृतपदार्थे निर्वाहः निर्वहणम्। अङ्गीकृतवस्तुनोऽवश्यं पालनमित्यर्थः। तत्र दृष्टान्ताः। किं कूर्मस्य कच्छपस्य वपुषि शरीरे भरव्यथा भरेण भारेण व्यथा पीडा न वर्तते यत् एष कच्छपः क्ष्मां पृथिवीं न क्षिपति न अस्यति। अपि तु भरव्यथा भविष्यतीत्यर्थः। वा अथवा दिनपतेः श्रीसूर्यस्य परिश्रमो(मः) खेदो न अस्ति न विद्यते किं अपि तु परिश्रमोऽस्तीत्यर्थः। यतः निश्चलः अव्यापारः न आस्ते न उपविशति न तिष्ठतीत्यर्थः। किंच श्लाघ्यो महत्तरो जनः। जन इव प्राकृत इव अङ्गीकृतं करिष्यामीति प्रतिज्ञातं उत्सृ( ज )न् त्यजन्। यथा प्राकृतो जनोऽङ्गीकृतं त्यजति तद्वत् त्यजन्नित्यर्थः। लज्जते लज्जां प्राप्नोति। सज्जनसेति पाठे मनसा चित्तेन सह लज्जते ॥ ९८ ॥

दूरादर्थं घटयति नवं दूरतश्चापशब्दं
त्यक्त्वा भूयो भवति निरतः सत्कथापादनेषु।
मन्दं मन्दं रचयति पदं लोकचित्तानुवृत्त्या
कामं मन्त्री कविरिव सदा खेदभारैरमुक्तः ॥९९॥

कामं निश्चितं मन्त्री सचिवः कविरिव काव्यकर्तेव सदा निरन्तरं खेदभारैः खेदस्य भाराः तैः श्रमसमूहैः अमुक्तः न मुक्तः अमुक्तः युक्त इत्यर्थः। वर्तते। यतः दूरात् दूरदेशात् नवं नूतनं अर्थं अश्वगजादिप्राप्तिसाधनं भूतप्रयोजनं जातं घटयति योजयति। किं कृत्वा दूरतः दूरात् अपशब्दं निन्दां त्यक्त्वा परित्यज्य। यथा निन्दा न भवति अर्थं घटयतीत्यर्थः। कविरपि दूरतः अपशब्दं कुत्सितं व्याकरणालंकारादिविरोधिनं शब्दं त्यक्त्वा दूरात् नवं अर्थं वर्णनीयं पदार्थं घटयति योजयति। पुनः मन्त्री सत्कथापादनेषु सत्यः शोभनाश्च ताः कथाश्च वृत्तान्ताः तासां आपादनेषु संयोजनेषु निरतस्तत्परो भवति। यथा सत्कथाः प्रवृत्तयः भवन्ति तथा प्रवर्तते इत्यर्थः। कविरपि सत्कथानां नलरामयुधिष्ठिरप्रभृतिप्रवृत्तीनां आपादनेषु निरतो भवति। तथा मन्त्री मन्दं मन्दं शनैः शनैः पदं स्थानं रचयति कुरुते। कया लोकचित्तानुवृत्त्या। लोकानां चित्तानि चेतांसि तेषां अनुवृत्तिः अनुवर्तनं तया। यथा लोकानां चित्तानुवर्तनं भवति तथा पदं स्थानं विदधातीत्यर्थः। कविरपि लोकचित्तानुवृत्त्या निमित्तेन मन्दं मन्दं पदं वाक्यसमुदायं रचयति। यथा लोकचित्तानुवृत्तिर्भवति तथा पदं विनिर्मातीत्यर्थः ॥ ९९ ॥

दैवेन प्रभुणा स्वयं जगति यद्यस्य प्रमाणीकृतं
तत्तस्योपनयेन्मनागपि महान्नैवाश्रयः कारणम् ।
सर्वाशापरिपूरके जलधरे वर्षत्यपि प्रत्यहं
सूक्ष्मा एव पतन्ति चातकमुखे द्वित्राः पयोबिन्दवः ॥१००॥

[ १ अ. 'चातुक' ]

प्रभुणा समर्थेन दैवेन पूर्वजन्मोपार्जितादृष्टेन स्वयं आत्मना जगति विश्वस्मिन् यत् वस्तु यस्य जीवस्य प्रमाणीकृतं प्राप्यत्वेन निर्णीतं तद्वस्तु तस्य उपनयेत् । तत्तं प्रति प्रापयेत् । अथवा तद्वस्तु तं प्रति उपनयेत् गच्छेत् । महान् आश्रयः धनाद्यधिकरणं मनागपि ईषदपि नैव कारणं नैव प्राप्तिसाधकः । तत्र दृष्टान्तः । सर्वाशापरिपूरके सर्वासां सकलानां आशानां दिशानां परिपूरके पूरयितरि जलधरे मेघे प्रत्यहं वर्षत्यपि वर्षमाणेऽपि सति चातकमुखे तोककवदने सूक्ष्माः स्वल्पीयांस एव द्वित्राः द्वौ त्रयो वा परिमाणं येषां ते तथा । पयोबिन्दवः पयसः बिन्दवः उदककणाः पतन्ति प्राप्नुवन्ति । मेघस्य महत्त्वान्न महान्तः न बहवश्च वारिकणाः पतन्तीत्यर्थः ॥ १०० ॥

अभिमुखनिहतस्य सतस्तिष्ठतु तावज्जयोऽथ वा स्वर्गः ।
उभयबलसाधुवादः श्रवणसुखोऽसौ बतात्यर्थम् ॥ १०१ ॥

[ १ अ. 'बतात्यर्थः' ]

अभिमुखनिहतस्य । अभिमुखं सन्मु( संमु )खं शत्रुभिर्युद्ध्वा निहतस्य वीरस्य तावत् । जयस्तिष्ठतु वा स्वर्गस्तिष्ठतु मा भवतु । परं असौ उभयबलसाधुवादः । सैन्यद्वये साधु साध्विति वादः शब्दः अत्यर्थं श्रवणसुखः कर्णसुखदाता । श्रव्य इत्यर्थः । बतेति विस्मये । केन निवार्यत इति शेषः ॥ १०१ ॥

केयूरा न विभूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला
न स्नानं न विलेपनं न कुसुमं नालंकृता मूर्धजाः ।
वाण्येका समलंकरोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं न क्वचित् ॥१०२॥

केयूरा अङ्गदानि पुरुषं न विभूषयन्ति न शोभयन्ति । तथा चन्द्रोज्ज्वलाः चन्द्रवत् उज्ज्वला निर्मला हारा एकावल्यादयश्च न विभूषयन्ति । तथा स्नानं सुगन्धतैलयक्ष( ? ) कर्दमाद्युद्वर्तनेन स्नपनं पुरुषं न शोभयति । तथा विलेपनं चन्दनकर्पूरकेसरकस्तूरिकालेपनं न भूषयति । न कुसुमं चम्पकमल्लिकाजातीप्रभृतिपुष्पदामरूपं कर्तृ पुरुषं न भूषयति । तथा अलंकृताः अगरुधूपादिप्रसाधिताः दीर्घाश्च मूर्धजाः शिरोरुहा न विभूषयन्ति । किंतु पुरुषं

एका केवला वाणी एव सरस्वती एव समलंकरोति सम्यक्त्वेन अलंकरोति । या वाणी संस्कृता अभ्यासादिसंस्कारवती सती धार्यते ध्रियते पठ्यत इत्यर्थः । खलु यस्माद्भूषणानि उक्तान्यामरणानि सततं क्षीयन्ते क्षयं प्राप्नुवन्ति । वाग्भूषणं वागेव भूषणं क्वचित् न क्षीयते ॥ १०२ ॥

यदि नाम दैवगत्या जगदसरोजं कदाचिदपि जातम् ।
अवकरनिकरं विकिरति तत्किं कुक्कुटवाकुरिव हंसः ॥१०३॥

+इति नीतिशतकं समाप्तितां पफाण लि । श्रीमुक्तिसौभाग्य ।
वाचकैः शि । मु । कल्याणसौभाग्य ग । क्षते श्री मुम्भा ई वं । रे॥

[+ रा. मू. पुष्पिका नास्ति ]

नाम निश्चितम् । यदि चेत्कदाचित् कस्मिन्नपि प्रस्तावे जगद्विश्वं दैवगत्या दैववशात् असरोजं न सरोजानि यस्मिंस्तत् निष्पद्मं जातं तत्तर्हि हंसो मरालः कुक्कुटवाकुरिव कुक्कुट इव अवकरनिकरं समूहं विकिरति विक्षिपति । अपितु न ॥ १०३ ॥

इति श्रीभर्तृहरिकृतं नीतिशतकं सभाष्यं संपूर्णम् ।

*चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरो
लीलादग्धविलोलकामशलभः श्रेयोदशाग्रे स्फुरन् ।
अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयं-
श्चेतःसद्मनि योगिनां विजयते ज्ञानप्रदीपो हरः ॥ १ ॥

[* अयं श्लोकः, अ. कोशे शृङ्गारशतके न दृश्यते । १ रा. मूले शोधनात्प्राङ् 'हरिः']

योगिनां चेतःसद्मनि चित्तगृहे । ज्ञानप्रदीपो हरः विजयते । किंलक्षणः चूडोत्तंसितचारुचन्द्रकलिकाचञ्चच्छिखाभासुरः । पुनः किं० । लीलादग्धविलोलकामशलभः । किं कुर्वन् श्रेयोदशाग्रे स्फुरन् । पुनः किं कुर्वन् । अन्तःस्फूर्जदपारमोहतिमिरप्राग्भारमुच्छेदयन् विजयते उत्कर्षेण वर्तते ॥ १ ॥

शुभ्रं सद्म सविभ्रमा युवतयः श्वेतातपत्रोज्ज्वला
लक्ष्मीरित्यनुभूयते स्थिरमिव स्फीते शुभे कर्मणि ।
विच्छिन्ने नितरामनङ्गकलहक्रीडात्रुटत्तन्तुकं
मुक्ताजालमिव प्रयाति झटिति भ्रस्यद्दिशो दृश्यताम् ॥२॥

[१अ. 'धाम' । २ अ. 'भ्रश्य°]

इति अमुना प्रकारेण । इत्यादि वा वस्तु शुभे पुण्ये कर्मणि स्फीते वृद्धे सति स्थिरमे( मि )व नित्यं यथा स्यात्तथा अनुभूयते अनुभुज्यते । इत्यादीति किं शुभ्रं शुचोज्ज्वलं सद्म गृहं विभ्रमैः सह वर्तमानाः सविभ्रमाः सविलासाः युवतयः कामिन्यः । तथा श्वेतातपत्रैः धवलच्छत्रैः उज्ज्वला देदीप्यमाना लक्ष्मीः समृद्धिरिति । पुनः तस्मिन् शुभे कर्मणि विच्छिन्ने त्रुटिते सति । नितरामतिशयेन । अनङ्गकलहक्रीडात्रुटत्तन्तुकं अनङ्गस्य कामस्य कलहक्रीडा प्रीतिकलहः कलिः तया त्रुटन्तः तन्तवः सूत्राणि यस्य तत् तथाभूतं मुक्ताजालमिव मुक्तासरमिव झटिति वेगेन भ्रस्यत् पतत सत् दृश्यतां दिशः प्रयाति दश दिशो गच्छति ॥ २ ॥

तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः ।
यावदेव न कुरङ्गचक्षुषां ताड्यते चटुललोचनाञ्चलैः ॥ ३ ॥

एष निर्मलविवेकदीपकः निर्मलः स्फुरद्रूपश्चासौ विवेक एव दीपकश्च कृतिनां सत्पुरुषाणामपि तावदेव स्फुरति ज्वलति । तावत् कियत् । यावदेव कुरङ्गचक्षुषां मृगलोचनानां स्त्रीणां चटुललोचनाञ्चलैः, चटुलानि चपलानि च तानि लोचनानि नयनानि च तेषां अञ्चलाः प्रान्ताः कटाक्षाः तैः न ताड्यते न विहन्यते । अन्योऽपि दीपकः चटुलपवनाञ्चलैः यावत् न ताड्यते तावत्स्फुरति ज्वलति ॥ ३ ॥

धन्यास्त एव तरलायतलोचनानां
तारुण्यदर्पघनपीनपयोधराणाम् ।
क्षामोदरोपरिलसत्त्रिवलीलतानां
दृष्ट्वाकृतिं विकृतिमेति मनो न येषाम् ॥ ४ ॥

त एव पुरुषाः धन्याः महाभाग्याः । ते के येषां मनः चित्तं तरलायतलोचनानां तरले चपले आयते दीर्घे लोचने नयने यासां ताः तथा तासां आकृतिं रूपं दृष्ट्वा विकृतिं विकारं न एति नं प्राप्नोति । न क्षुभ्यतीत्यर्थः । किंलक्षणानां तासां तारुण्यवर्पघनपीनपयोधराणां तारुण्यस्य यौवनस्य दर्पः गर्वः तेन घनाः कठिनाः पीनाः स्थूलाः पयोधराः स्तना यासां तास्तथा तासाम् । पुनः किंलक्षणानाम् । क्षामोदरोपरिलसत्त्रिवलीलतानां क्षामं कृशं च तत् उदरं मध्यं च क्षामोदरं तस्योपरि लसन्ती शोभायमाना त्रिवली वलित्रयं सैव लता यासां तास्तथा तासाम् ॥ ४ ॥

सदा योगाभ्यासव्यसनवशयोरात्ममनसो-
रविच्छिन्ना मैत्री स्फुरति कृतिनस्तस्य किमिमैः ।
प्रियाणामालापैरधरमधुभिर्वक्त्रविधुभिः
सनिःश्वासामोदैः सकुचकलशाश्लेषसुरतैः॥ ५ ॥

यस्य कृतिनः प्रवीणस्य पुरुषस्य । सदा सर्वदा आत्ममनसोः आत्मा च मनश्च तयोः जीवमानसयोः अविच्छिन्ना अविच्छेदवती मैत्री सखिता स्फुरति वर्तते । यस्यात्ममनसी एकत्र तिष्ठत इत्यर्थः । किंलक्षणयोः आत्ममनसोः । योगाभ्यासव्यसनवशयोः । योगानां यमादीनां समाधीनां अभ्यासः अभ्यसनं तत्र व्यसनं आसक्तिः तेन वशयोः वशवर्तिनोः । तस्य पुरुषस्य इमैः प्रियाणां कामिनीनां आलापैः मधुरवचनैः किम् । तथा अधरमधुभिः ओष्ठामृतैः किम् । तथा वक्त्रविधुभिः मुखचन्द्रैः किम् । तथा सकुचकलशाश्लेषसुरतैः' कुचकलशानां आश्लेषः आलिङ्गनं तेन सह वर्तमानानि सकुचकलशाश्लेषाणि एकंभूतानि तानि सुरतानि च तैः किम् । किंभूतैः नि(:)श्वासानां आमोदेन सह वर्तमानानि सनि(:)श्वासामोदानि तैः ॥ ५ ॥

वचसि भवति सङ्कल्पत्यागमुद्दिश्य वार्तां
स्मृतिमुखरमुखानां केवलं पण्डितानाम् ।
जघनमरुणरत्नग्रन्थिकाञ्चीकलापं
कुवलयनयनानां को विहातुं समर्थः ॥ ६ ॥

स्मृतिमुखरमुखानाम् । स्मृत्या धर्मशास्त्रेण मुखरं वाचालं मुखं येषां ते तेषां तेषां पण्डितानां विदुषामपि वचसि वचने सङ्कल्पागं विषयत्यागं उद्दिश्य वार्ता कथा भवति । परं तु कुवलयनयनानां कुवलयवत् नयने यासां तास्तथा तासां स्त्रीणां जघनं कटिपुरोभागं विहातुं त्यक्तुं कः पुमान्समर्थः शक्तः भवेत् । किंलक्षणं जघनं अरुणरत्नग्रन्थिकाञ्चीकलापवत् । अरुणरत्नानां पद्मरागमणीनां ग्रन्थयः पर्वाणि यस्मिन् सः अरुणरत्नग्रन्थिः एवंविधः काञ्चीकलापो मेखलाकलापो यस्मिंस्तत्तथा तत् ॥ ६ ॥

मत्तेभकुम्भदलने भुवि सन्ति शूराः
केचित्प्रचण्डमृगराजवधेऽपि दक्षाः ।
किंतु ब्रवीमि बलिनां पुरतः प्रसह्य
कन्दर्पदर्पदलने विरला मनुष्याः ॥ ७ ॥

भुवि पृथिव्यां मत्तेभकुम्भदलने प्रमत्तगजकुम्भविदारणे शूराः समर्थाः केचित्सन्ति । केचित्पुरुषाः प्रचण्डमृगराजवधेऽपि बलवत्पञ्चाननवधेऽपि दक्षाः निपुणा भवन्ति । तु पुनः । बलिनां पुरतः किं ब्रवीमि बलवतामग्रे किं कथयामि । यत्प्रसह्य हठात्कारेण कन्दर्पदर्पदलने कन्दर्पस्य कामस्य दर्पः बलं तस्य दलनं मर्दनं तस्मिन् विषये मनुष्याः विरलाः द्विमाः सन्ति ॥ ७ ॥

स्मितेन भावेन च लज्जया भिया
पराङ्मुखैरर्धकटाक्षवीक्षणैः ।
वचोभिरीर्ष्याकलहेन लीलया
समस्तभावैः खलु बन्धनं स्त्रियः ॥ ८ ॥

खलु निश्चितम् । स्त्रियः समस्तभावैः बन्धनं भवति (स्त्रियः) । कैः भावैः स्मितेन हास्येन । तथा भावेन चित्ताभिप्रायेण । च अन्यत् लज्जया ह्रिया । तथा भिया भयेन । तथा अर्धकटाक्षवीक्षणैः । अर्धकटाक्षैः निरीक्षणानि तैः । तथा वचोभिः वचनैः । तथा ईर्ष्याकलहेन । ईर्ष्यया युक्तः कलहस्तेन । तथा लीलया विलासेन ॥ ८ ॥

एताश्चलद्वलयसंततिमेखलोत्थ-
झंकारनूपुरपराजितराजहंस्यः ।
कुर्वन्ति कस्य न मनो विवशं तरुण्यो
विस्रस्तमुग्धहरिणीसदृशाक्षिपातैः ॥ ९ ॥

एतास्तरुण्यः कामिन्यः कस्य मनः विवशं परवशं न कुर्वन्ति । कैः । विस्रस्तमुग्धहरिणीसदृशाक्षिपातैः । विस्रस्ता भीताश्च ताः मुग्धा मनोहराश्च हरिण्यश्च ताभां सदृशाः

तुल्याश्च ते अक्षिपाताः कटाक्षाः तैः । किंलक्षणाः एताः । चलद्वलयसंततिमेखलोत्थझंकारमू-
पुरपराजितराजहंस्यः । वलयानां कंकणानां संततिः श्रेणिः तथा मेखला च ते वलयसंततिमें-
खले ताभ्यां उत्थ उत्पन्नश्चासौ झंकारा(रौ )श्च । तथा नूपुरे मञ्जीरे च तैः पराजिताः
विकृताः राजहंस्यो मरालाङ्गना याभिस्ताः तथा ताः ॥ ९ ॥

सत्यं जना वच्मि न पक्षपातालोकेषु सप्तस्वपि तथ्यमेतत् ।
नान्यन्मनोहारि नितम्बिनीभ्यो दुःखैकहेतुर्न च कश्चिदन्यः ॥१०॥

हे जनाः हे लोकाः सत्यं यथार्थं वच्मि ब्रवीमि । पक्षपातात् न पक्षपातेन न अङ्गी-
कारात् । सप्तसु लोकेषु भुवनेषु एतत्तथ्यं सत्यं यत् नितम्बिनीभ्यः स्त्रीभ्यः अन्यत् वस्तु
मनोहारि मनोहरं न । च अन्यत् कश्चित्पदार्थः दुःखैकहेतुः न । दुःखस्य एकहेतुः न ।
दुःखैककारणं न ॥ १० ॥

लीलावतीनां सहजा विलासास्त एव मूढस्य हृदि स्फुरन्ति ।
रागो नलिन्या हि निसर्गसिद्धस्तत्र भ्रमत्येव मुधा षडङ्घ्रिः॥११॥

[१ ज. °सिद्धिं ]

लीलावतीनां स्त्रीणां ये सहजाः स्वाभाविकाः विलासाः त एव मूढस्य हृदि स्फुरन्ति
उल्लसन्ति । तत्र दृष्टान्तः । हि निश्चितं नलिन्याः पद्मिन्याः रागः निसर्गसिद्धः । रक्तत्वं
स्वभावसिद्धम् । तत्र षडङ्घ्रिः भ्रमरः मुधा मिथ्या एव भ्रमति । स जानाति यदियं स्त्री
निरीह्यैव रक्ता भवतीति ॥ ११ ॥

सिद्धाध्यासितकन्दरे हरवृषस्कन्धावरुग्णद्रुमे
गङ्गाधौतशिलातले हिमवतः स्थाने स्थिते स्थेयसि ।
कः कुर्वीत शिरः प्रणामविगलन्मानं मनस्वी जनो
यद्वित्रस्तकुरङ्गशावनयना न स्युः स्मराङ्गं स्त्रियः ॥ १२ ॥

यत् यदि स्त्रियः कामिन्यः स्मराङ्गं स्मरस्य कामस्याङ्गं आयुधं न स्युर्न भवन्ति ।
तर्हि कः मनस्वी अहंकारी जनः शिरः मस्तकं प्रणामविगलन्मानं प्रणामेन नमस्कारेण विग-
लन् प्रस्यन्मानोऽभिमानो यस्य यत्तथाविधं कुर्वीत कुर्यात् । किंलक्षणाः स्त्रियः । वित्रस्त-
कुरङ्गशावनयनाः । वित्रस्तो गीतो यो (यः) कुरङ्गशावः मृगपोतकः तस्य नयने इव नयने
यासां तास्तथा । क्व सति ह(हि)मवतः स्थाने हिमगिरेः आस्पदे स्थेयसि स्थिरतरं स्थिते सति
विद्यमाने सति । किंलक्षणे स्थाने । सिद्धाध्यासितकन्दरे । सिद्धैः योगसिद्धैः अध्यासिता
आश्रिताः कन्दरा गुहा यस्य तत्तथा तस्मिन् । पुनः किंलक्षणे । हरवृषस्कन्धावरुग्णद्रुमे
हरस्य श्रीमहादेवस्य वृषस्य वृषभस्य स्कन्धेन अंसेनावरुग्णा भग्ना द्रुमा वृक्षा यस्मिंस्तत्तथा
तस्मिन् । पुनः किंलक्षणे । गङ्गाधौतशिलातले । गा(ग)ङ्गया धौतानि क्षालितानि शिलातलानि
दृषदो यस्मिंस्तत्तथा तस्मिन् । एभिस्त्रिभिर्विशेषणैः सिद्धाश्रमत्वमेवभूमित्यपवित्रत्वान्यु-
क्तानि ॥ १२ ॥

दिश वनहरिणीभ्यो वंशकाण्डच्छवीनां
कवलमुपलकोटिच्छिन्नमूलं कुशानाम् ।
शुकयुवतिकपोलापाण्डुताम्बूलवल्ली-
दलमरुणनखाग्रैः पाटितं वा वधूभ्यः ॥ १३ ॥

[१ अ. 'वांश']

हे जन । वनहरिणीभ्यः काननमृगीभ्यः कुशानां दर्भाणां कवलं ग्रासं दिश देहि । किंलक्षणं कवलम् । उपलकोटिच्छिन्नमूलम् । उपलानां कोटिः तीक्ष्णभागः तेन छिन्नमूलं छिन्नं मूलं यस्य स तथा तम् । किंलक्षणानां दर्भाणां वंशकाण्डच्छवीनां वंशस्य वेणोः काण्डं पर्व पत्रं वा तस्येव छविः कान्तिः येषां ते तथा तेषां नीलानामित्यर्थः । वा अथ वा वधूभ्यः स्त्रीभ्यः ताम्बूलवल्लीदलं नागवल्लीपर्णं दिश देहि । किंलक्षणं दलम् । अरुणनखाग्रैः अरुणा रक्ताश्च ते नखाः करजाश्च तेषां अग्राणि तैः पाटितं जर्जरितम् । पुनः किंलक्षणम् । शुकयुवतिकपोलापाण्डु शुकयुवतेः शुकाङ्गनायाः कपोलवत् आपाण्डु ईषद्धौरम् ॥ १३ ॥

असाराः सन्त्वेते विरतिविषमा वाथ विषया
जुगुप्सन्तां यद्वा ननु सकलदोषास्पदमिति ।
तथाप्येतद्ब्रूमो न हि परहितात्पुण्यमधिकं
न चास्मिन्संसारे कुवलयदृशो रम्यमपरम् ॥ १४ ॥

[१ रा. टीकायां 'जुगुप्स्यन्तां']

एते विषयाः भोगाः असाराः निःसाराः सन्तु भवन्तु । किंलक्षणाः विषयाः विरतिविषमाः विरतौ परिणामे विषमाः कठिनाः । अथ वा पक्षान्तरे । ते विषया इति अमुना प्रकारेण जुगुप्स्यन्तां निन्द्यन्ताम् । इतीति किम् । ननु निश्चितम् । इमे विषयाः सकलदोषास्पदं सकलदोषाणां आस्पदं स्थानकमिति । यत्र विषया भवन्ति तत्रैव सर्वे दोषाः हिंसाद्यो वसन्तीति भावः । यद्यप्येवमस्ति तथापि एतत् इदं वक्ष्यमाणं ब्रूमः कथयामः । एतत् किम् । यत्परहितात् परस्यान्यस्य यस्य कस्यापि जीवस्य हितात् हितकरणात् अधिकं पुण्यं सुकृतं न । चान्यत् । अस्मिन्संसारे कुवलयदृशः इन्दीवरलोचनायाः स्त्रियाः अपरं अधिकं रम्यं रमणीयं न अस्ति ॥ १४ ॥

मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदन्तु ।
सेष्या नितम्बाः किमु भूधराणामुत स्मरस्मेरविलासिनीनाम् ॥ १५ ॥

[१ ता. मूले विलासनीनाम्, टी. विलासीनीनाम्]

हे आर्याः हे साधवः मात्सर्यं मत्सरित्वं उत्सार्य परित्यज्य । इदं एतत् समर्यादं मर्यादया सह वर्तमानं यथा स्यात्तथा । सत्यमित्यर्थः । वदन्तु ब्रुवन्तु । इदं किं पुरुषैः भूधराणां पर्वतानां नितम्बाः सानवः किमु किं सेव्याः सेवनीयाः । उत अथ वा स्मरस्मेर-विलासी(सि)नीनां स्मरेण कन्दर्पेण स्मेराः सहर्षाः विलासाः विद्यन्ते यासां तास्तथा तासां कामिनीनां नितम्बाः कटिप्रदेशाः किमु सेवनीयाः इति तथ्यं कथयन्तु ॥ १५ ॥

किमिह बहुभिरुक्तैर्युक्तिशून्यैर्वचोभि-
र्हृदयमिह पुरुषाणां सर्वदा सेवनीयम् ।
अभिनवमदलीलालोलसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा ॥ १६ ॥

[१ रा. टी. °न्यैः प्रलापैः]

इह जगति शून्यैः निरर्थकैः आकाशवचनवत् वुध्यपरिच्छेद्यैः बहुभिः प्रभूतैः प्रलापैः अनर्थकवचनैः किं, न कोऽप्युपयोग इत्यर्थः । इह विश्वस्मिन् पुरुषाणां सर्वदा सर्वकालं हृदयं उभयं सेवनीयं आश्रयणीयम् । किं तत्तदुभयम् । सुन्दरीणां शोभनाकारं संपन्नानां स्त्रीणां यौवनं तारुण्यं वा अथ वा वनं काननं सेवनीयम् । किंलक्षणं यौवनम् । अभिनव-मदलीलालोलसम् । अभिनवा प्रतिदिवसं नूतना चासौ मदलीला च अभिनवमदलीला तया लोलसं सुन्दरं मन्थरं वा । पुनः किंलक्षणम् । स्तनभरपरिखिन्नं स्तनयोर्भरेण भारेण परिखिन्नं परिखेदं प्राप्तम् ॥ १६ ॥

मत्तेभकुम्भपरिणाहिनि कुङ्कुमार्द्रे
कान्तापयोधरतटे रतिखेदखिन्नः ।
वक्षो निधाय भुजमण्डलमध्यवर्ती
धन्यः क्षपां क्षपयति क्षणलब्धनिद्रः ॥ १७ ॥

[१ अ. °माद्रे. २ अ. कोशे रा. टीकायां च शोधनात्पूर्वं ' क्षिपां ']

धन्यः भाग्यवान्पुरुषः । क्षपां रात्रिं क्षपयति निर्गमयति । किं कृत्वा कान्तापयो-धरतटे कान्तायाः प्रियायाः पयोधरतटे स्तनमण्डले वक्षो हृदयं निधाय आरोप्य । किंलक्षणः भुजमण्डलमध्यवर्ती भुजयोः मण्डलस्य वलयस्य मध्ये वर्तत इति स तथा । पुनः किं० । क्षणलब्धनिद्रः । क्षणं क्षणमात्रं लब्धा निद्रा येन स तथा । किंलक्षणे कान्तापयोधर-तटे । मत्तेभकुम्भपरिणाहिनि मत्तेभकुम्भस्येव परिणाहः विशालता विद्यते यस्य तच्चथा तस्मिन् । पुनः किं० । कुङ्कुमार्द्रे कुङ्कुमेन केसरेण आर्द्रं स्निग्धं तस्मिन् । पुनः किं० रतिखेदखिन्नः रत्या संभोगेन खेदः श्रमः तेन खिन्नः श्रान्तः ॥ १७ ॥

राजंस्तृष्णाम्बुराशेर्नं हि जगति गतः कश्चिदेवावसानं
लोकोऽप्यर्थैः प्रभूतैः स्ववपुषि गलिते यौवने सानुरागः ।
गच्छामः सद्म तावद्विकसितकुमुदेन्दीवरालोकिनीना-
माक्रम्याक्रम्य रूपं झटिति न जरया लुण्टयते कामिनीनाम् ॥१८॥

हे राजन् हि निश्चितं जगति भुवि तृष्णाम्बुराशेः लोभसमुद्रस्य अवसानं अन्तं कश्चिदेव कोऽपि पुमान् गतः । कोऽपि धनं प्राप्य वितृष्णो न जात इत्यर्थः । कैः प्रभूतैः अर्थैः वसुभिः अश्वगजाजवसनाद्यन्नादिपदार्थैः बहुभिः सद्भिरित्यर्थः । वा अथ वा कः गलिते नष्टे यौवने तारुण्ये गते सति स्ववपुषि गलिते सति यौवने स्वशरीरे न सानुरागः न सप्रेमः । अपि तु सर्वोऽपि सानुरागः । अथ वा कः पुमान् स्ववपुषि गलिते सति यौवने न सानुरागः । पश्यं तावत् सद्म गृहं गच्छामः यामः । तावत् क्रियत् । यावत् जरया कामिनीनां स्त्रीणां रूपं सौन्दर्यं आक्रम्य २ ( आक्रम्य ) अवस्कन्द २ ( अवस्कन्द ) न लुण्टयते न मुष्यते । वृद्धत्वेन यावन्नासौ रूपं न निराक्रियत इत्यर्थः । किंलक्षणानां ताासाम् । विकसितकुमुदेन्दीवरालोकिनीनाम् । कुमुदं च इन्दीवरं च कुमुदेन्दीवरे विकसिते प्रफुल्ले च ते कुमुदेन्दीवरे च विकसितकुमुदेन्दीवरे तद्वत् आलोकनं निरीक्षणं दृष्टिः विद्यते यासां तास्तथा ताासाम् । एतावता स्त्रीणां रूपं जरया झटिति विक्रियां नीयते । अत एव विषया अविलम्बेन सेवनीया इति भावः ॥ १८ ॥

उपरि घनं घनपटलं तिर्यग्गिरयोऽपि नर्तितमयूराः ।
क्षितिरपि कन्दलधवला दृष्टिं पथिकः क्व पातयतु ॥ १९ ॥

पथिकः पान्थः । दृष्टिं क्व कस्मिन् स्थले पातयतु प्रवर्तयताम् । क्व निरीक्षतामित्यर्थः । सर्वत्र तत्तद्वस्तुवर्णनेन कामोद्दीपनपीडाया अद्भुतरूपत्वादित्यर्थः । तदेवाह । उपरि आकाशे घनं सान्द्रं घनपटलं मेघमण्डलं दृश्यते । तिर्यग्गिरयोऽपि तिरश्चीनाः पर्वता अपि नर्तिता मयूराः नर्तिता केकिनो येषु ते तथा तथा दृश्यन्ते । अधः क्षितिरपि पृथिव्यपि कन्दलधवला कन्दलैः लताविशेषपुष्पैः कृत्वा धवला उज्ज्वला । अथ वा कन्दलैः हरि( त )तृणैः धवला उज्ज्वला शोभमानेत्यर्थः ॥ १९ ॥

संसारेऽस्मिन्नसारे परिणतितरले द्वे गती पण्डितानां
तत्त्वज्ञानामृताम्भःप्लुतिललितधियां याति कालः कदाचित् ।
नो चेन्मुग्धाङ्गनानां स्तनजघनघनाभोगसंयोगिनीनां
स्थूलोपस्थस्थलाग्रस्थगितकरतलस्पर्शलोलोर्ध्वमानाम् ॥२०॥

[१ रा. मू. 'लोलोयमानाम्']

अस्मिन्नेसारे असारे सारविहीने पण्डितानां ज्ञानिनां द्वे गती जायेते । गतिद्वयं भवति । क्लिक्षणे संसारे । परिणतितरले । परिणतौ परिणामे तरलः चञ्चलः तस्मिन् । द्वे के गती । एका कदाचित् । तत्त्वज्ञानामृताम्भःप्लुतिललितधियां तत्त्व-ज्ञानमेव आत्मज्ञानमेव अमृताम्भः सुधोदकं तेन प्लुतिः प्लवनं तया ललिता मनोज्ञा स्फुरत्तमा धीः बुद्धिर्येषां ते तथा तेषां सतां कालः तिथिः याति अवसरः आयुर्वा याति गच्छति । चेत् यदि नो एवं भवेत् तर्हि मुग्धाङ्गनानां सुन्दरस्त्रीणां स्थूलोपस्थस्थ-लास्थगितकरतलस्पर्शलोलोल्यमानां स्थूलं विशालं च तत् उपस्थस्थलं च भगमण्डलं च तस्यां स्थगितं आच्छादितं तत्र करतलस्पर्शे करेण संस्पर्शने लोलः चपलः अनवरतवर्ती उद्यमः उद्यमो येषां ते तथा तेषां सतां कालो याति । क्लिक्षणानां अङ्गनानाम् । स्तनजघनघनाभोगसंयोगिनीनां स्तनौ कुचौ च जघनं पुरोभागश्च तानि स्तनजघनं तस्य घनो बाह्यासो आभोगः परिपूर्णता तस्याः संयोगः संसर्गो विद्यते यासां तास्तथा तासाम् ॥ २० ॥

कान्तेत्युत्पललोचनेति पृथुलश्रोणीभरेत्युन्नम-
त्पीनोत्तुङ्गपयोधरेति सुमुखाम्भोजेति सुभ्रूरिति ।
दृष्ट्वा माद्यति मोदतेऽभिरमते प्रस्तौति विद्वानपि
प्रत्यक्षाशुचिपुत्रिकां स्त्रियमहो मोहस्य दुश्चेष्टितम् ॥ २१ ॥

अहो इत्याश्चर्ये । मोहस्य अज्ञानस्य दुश्चेष्टितं दुष्टव्यापारः । यत् पुमान् स्त्रियं योषितं प्रत्यक्षाशुचिपुत्रिकां प्रत्यक्षं अशुचिपुत्रिकां अपवित्रपुत्तलिकां दृष्ट्वा विद्वान् ज्ञाततत्त्वोऽपि माद्यति मदं प्राप्नोति । मोदते हृष्यति । तथा अभिरमते क्रीडति । तथा प्रस्तौति वर्णयति । कथम् । इत्यमुना प्रकारेण । इतीति किम् । अहो आश्चर्ये । मनो-हरा स्त्री वर्तते तथा पुनः उत्पललोचना । इति इन्दीवरनयनेति । तथा पुनः पृथुल-श्रोणीभरा इति पृथुलः विस्तीर्णः श्रोणीभरः कटितटं यस्याः सा तथा । तथा पुनः । उन्नमत्पीनोत्तुङ्गपयोधरा इति । उन्नमन्तौ उन्नतौ पीनौ मांसलौ उत्तुङ्ग(तुङ्ग)त्वौ उच्चौ पयोधरौ स्तनौ यस्याः सा तथा । तथा पुनः सुमुखाम्भोजेति । सु शोभनं मुखमेव अम्भोजं वदनकमलं यस्याः सा तथा । तथा पुनः सुभ्रूः, इति मोदते । सु शोभने भ्रुवौ भ्रुकुट्यौ यस्याः सा तथा इति । इत्यादिविशेषणरूपं वर्णयन् विद्वानपि मदमोदादि प्राप्नोतीत्यर्थः ॥ २१ ॥

क्वचित्सभ्रूभङ्गैः क्वचिदपि च लज्जापरिगतैः
क्वचिद्भीवित्रस्तैः क्वचिदपि च लीलाविलसितैः ।
कुमारीणामेतैर्वदनसुभगैर्नेत्रवलितैः
स्फुरन्नीलाब्जानां प्रकरपरिकीर्णा इव दिशः ॥ २२ ॥

[१ ज. चकितैः, रा. टी. 'चलितैः' दलितैः इति च.]

कुमारीणां कोमलाङ्गनानां नेत्रचलितैः नेत्राणां व(च)लितानि विक्षेपणानि तैः कृत्वा दिशः सर्वाः कक्षुभः । स्फुरन्नीलाब्जानां स्फुरन्ति च तानि नीलाब्जानि नीलोत्पलानि च तेषां प्रकराः समूहाः तैः परिकीर्णाः व्याप्ता इव । दृश्यन्त इति शेषः । किंलक्षणैः नेत्रचलितैः कचित्कदाचिदपि लज्जापरिगतैः लज्जया ह्रिया परिगतानि व्याप्तानि तैः । पुनः किं० । कचिद्भीवित्रस्तैः कदाचित् भिया भयेन वित्रस्तानि चपलानि भीतानि च तैः । पुनः किं० नेत्रचलितैः । च पुनः कचिदपि कदाचिदपि लीलाविलसितैः । लीलया हेलया विलसितं विलासो येषां तानि तथा तैः । च पुनः किंलक्षणैः वदनसुभगैः वदनं मुखं सुभगं सुन्दरं यैस्तानि तथा तैः । अथ वा वदनैः सुभगानि तैः ॥ २२ ॥

वक्त्रं चन्द्रविलासि पङ्कजपरीहासक्षमे लोचने
वर्णः स्वर्णमपाकरिष्णुरलिनीजिष्णुः कचानां चयः ।
वक्षोजावविकुम्भविभ्रमहरौ गुर्वी नितम्बस्थली
वाचां हारि च मार्दवं युवतिषु स्वाभाविकं मण्डनम् ॥२३॥

युवतिषु स्त्रीषु एतत् स्वाभाविकं स्वभावेन प्रकृत्या संपन्नं मण्डनं अलंकरणम् । एतत्किम् । वक्त्रं मुखम् । मण्डनं किंलक्षणं चन्द्रविलासि चन्द्रवत् विलासः शोभा विद्यते यस्य तत् चन्द्रशोभि । तथा लोचने नयने मण्डनम् । किंलक्षणे नेत्रे । पङ्कजपरीहासक्षमे । पङ्कजस्य इन्दीवरस्य परीहासाय तिरस्काराय क्षमे समर्थे । तथा वर्णः रूपं आकारः युवतिषु मण्डनम् । किं० वर्णः । स्वर्णं कनकं अपाकरोति तिरस्करोतीति अपाकरिष्णुः तिरस्कर्ता । तथा कचानां केशानां चयः शिरोरुहाणां कलापः मण्डनम् । किंलक्षणः । अलिनीजिष्णुः । अलिनीः भ्रमरीः जयति इत्येवंशीलः अलिनीजिष्णुः । तथा वक्षोजौ स्तनौ च स्वाभाविकं मण्डनम् । किंलक्षणौ । इभकुम्भविभ्रमहरौ । इभस्य गजेन्द्रस्य कुम्भयोः विभ्रमं विलासं हरतः जयतः इत्येवंशीलौ तौ तथा । तथा नितम्बस्थली अतिशयेन गुरुः विशाला गुर्वी च । पुनः वाचां वाणीनां मार्दवं मृदोर्भावः कोमलत्वं मण्डनं भवति । किंलक्षणं मार्दवम् । हारि हरतीत्येवंशीलम् । मनोहारीत्यर्थः । स्त्रीणामेवंविधं वक्त्रादिकं अलंकारकरणमविडपि मण्डनं भवतीति भावः ॥ २३ ॥

नामृतं न विषं किंचिदेकां मुक्त्वा नितम्बिनीम् ।
सैवामृतलता रक्ता विरक्ता विषवल्लरी ॥ २४ ॥

एकां केवलां नितम्बिनीं प्रशस्तनितम्बां स्त्रियं मुक्त्वा त्यक्त्वा किंचित् अमृतं पीयूषं न अस्ति । किंचिद्विषमपि हालाहलमपि न अस्ति । यतः कारणात् स्त्रैव नितम्बिन्येव रक्ता रागवती सती अमृतलता अमृतवल्ली । तथा विरक्ता वैराग्यवती सती विषवल्लरी विषस्य वल्लरी वल्ली च भवति महाबुःखोत्पादकत्वात् ॥ २४ ॥

भ्रूचातुर्यात्कुञ्चिताक्षाः कटाक्षाः
स्निग्धा भावा लज्जितान्ताश्च हासाः ।
लीलामन्दं प्रस्थितं च स्थितं च
स्त्रीणामेतद्भूषणं चायुधं च ॥ २५ ॥

एतद् वस्तु स्त्रीणां भूषणं आभरणम् । च अन्यत् आयुधं शस्त्रं च । एतत्त्रिए । कटाक्षाः अपाङ्गदर्शनानि । किंलक्षणाः कटाक्षाः भ्रूचातुर्यात् भ्रुवोः चातुर्यं सौन्दर्यं वोपचतुरत्वं वा तस्मात् कुंचिताक्षाः कुंचितानि वक्रीकृतानि अक्षीणीः ( णि ) लोचनानि येषु ते तथा । तथा स्निग्धाः स्नेहवन्तः भावाः चित्ताभिप्रायाः । च अन्यत् हासाः एतानि । किंलक्षणा हासाः लज्जितान्ताः । लज्जितं लज्जा अन्ते अवसाने येषां ते तथा । च अन्यत् लीलया विलासेन मन्दं मन्थरं यथा स्यात्तथा प्रस्थितं गमनम् । च अन्यत् । स्थितं गतिनिषूचिम् ॥ २५ ॥

स्मितं किंचिद्वक्त्रं सरलतरलो दृष्टिविभवः
परिस्पन्दो वाचामभिनवरसोक्तिः सरभसम् ।
गतीनामारम्भः किशलयितलीलापरिकरः
स्पृहान्त्यास्तारुण्यं किमिव न हि रम्यं मृगदृशः ॥२६॥

[१ अ. शोधनात्माङ् °लयति.]

हे जगति मृगदृशो मृगलोचनायाः संबन्धि वस्तु किं न रम्यं किं न मनोहरं अपि तु सर्वं मनोहरमित्यर्थः । किंलक्षणायाः मृगदृशः । तारुण्यं यौवनं स्पृहन्त्याः शोभमतिकम्य यौवनं प्राप्नुवन्त्या इत्यर्थः । हि निश्चितं वक्त्रं मुखं किं न रम्यं अपि तु रम्यं किंलक्षणं किंचित् स्मितं ईषद्विकसितम् । सहासमित्यर्थः । तथा दृष्टिविभवः दृष्टेः विभवः समृद्धिः मुहुरालोकनमित्यर्थः । किं न रम्यः । किंलक्षणः सरलतरलः । सरलश्चासौ ऋजश्चासौ तरलश्चपलश्च स तथा । तथा वाचां वाणीनां परिस्पन्दः प्रवाहः किं न रम्यः अभिनवरसोक्तिः अभिनवाः रसाः अभिनवप्रेमाणः उक्तयो भाषणानि यस्मिन् स तथा । तथा गतीनां गमनानां सरभसं सहर्षं सवेगं वा आरम्भः यथा स्यात्तथा आरम्भः प्रवर्तनं किं न रम्यः । किंलक्षणः किशलयितलीलापरिकरः । किशलयितः पल्लवितः लीलानां विलासानां परिकरः समुदायो यस्य स तथा ॥ २६ ॥

स्मृता भवति तापाय दृष्टा तून्मादकारिणी ।
स्पृष्टा भवति मोहाय सा नाम दयिता कथम् ॥ २७ ॥

नामेति निश्चये । सा अङ्गना दयिता प्रिया कथम् । दयते पालयतीति दयिता । दुःखकारित्वात्सुखकारिणी कथमित्यर्थः । यतः सा स्मृता चिन्तिता सती तापाय दुःखाय भवति । तु पुनः दृष्टा सती विलोकिता सती उन्मादकारिणी । उन्मादं मत्तता कारयतीति तथा । पुनः स्पृष्टा स्पर्शविषया सती मोहाय जाड्याय स्तम्भाय वा भवति । एवमप्रियकारित्वे कथं दयितात्वमित्यर्थः ॥ २७ ॥

आवर्तः संशयानामविनयभवनं पत्तनं साहसानां
दोषाणां संनिधानं कपटशतमयं क्षेत्रमप्रत्ययानाम् ।
स्वर्गद्वारस्य विघ्नं नरकपुरमुखं सर्वमायाकरण्डं
स्त्रीयन्त्रं केन सृष्टं विषममृतमयं प्राणिलोकस्य पाशः ॥२८॥

अहो स्त्रीयन्त्रं स्त्री एव यन्त्रं कूटं सृष्टं उत्पादितम् । किंलक्षणम् । प्राणिलोकस्य संसारोत्पन्नजनसंघातस्य पाशः । पाश इव पाशः । बन्धनमित्यर्थः । पुनः किंभूतम् । अमृतमयं अमृतरूपं विषं कालकूटम् । संयोगवियोगयोस्तथारूपत्वादित्यर्थः । पुनः किंभूतम् । संशयानां संदेहानां आवर्तः आकरः । आवर्ते आकरे बहवो मणयो भवन्ति यथा तथा अस्मिन् बहवः आचरणाः विषयाः संदेहा इत्यर्थः । पुनः किं० । अविनयभवनं अविनयानां अनेकाविवेकानां भवनं निवासगृहम् : यथा गृहे गृहस्थः सदा लभ्यते तथा तस्मिन् अविनय इत्यर्थः । पुनः किं० । स( सा )हसानां अनुचितकर्मप्रवृत्तीनां पत्तनं नगरम् । यथा नगरे बहवो जना भवन्ति तथा स्त्रियां बहूनि साहसानीत्यर्थः । पुनः किंभूतम् । दोषाणां अनृतमूर्खत्वलोभित्वनिर्दयत्वाशुचित्वादीनां संनिधानं समीपम् । यत्र स्त्री तत्र सर्वे दोषाः सन्तीति भावः । पुनः किंलक्षणम् । कपटशतमयं कपटानां कैतवानां शतानि प्रचुराणि यस्मिंस्तत् । पुनः किंलक्षणम् । अप्रत्ययानां अविश्वासानां क्षेत्रमुत्पत्तिस्थानम् । यथा क्षेत्रे बहवोऽङ्कुरा भवन्ति तथा तस्यां बहवोऽप्रत्यया इत्यर्थः । पुनः किं० । स्वर्गद्वारस्य स्वर्गलोकप्राप्तेः विघ्नः अन्तरायभूतम् । स्त्री हि स्वर्गगमनं विघ्नयति । पुनः किं० । नरकपुरमुखं निरयनगरस्य मुखमिव मुखं प्रवेशसाधनमित्यर्थः । पुनः किंवि० । सर्वमायाकरण्डं सर्वासां मायानां करण्डं संग्रहभाण्डम् । यथा करण्डे सर्वाणि वसूनि तिष्ठन्ति । एवं स्त्रीषु सर्वा माया इत्यर्थः ॥ २८ ॥

नो सत्येन मृगाङ्क एव वदनीभूतो न चेन्दीवर-
द्वंद्वं लोचनतां गतं च कनकैरप्यङ्गयष्टिः कृता ।
किं त्वेवं कविभिः प्रतारितमनास्तत्त्वं विजानन्नपि
त्वग्मांसास्थिमयं वपुर्मृगदृशां मन्दो जनः सेवते ॥२९॥

अन्धो मूर्खः जनः तत्त्वं यथार्थरूपत्वं विजानन्नपि जानानोऽपि मृगदृशां मृगनयनानां वपुः शरीरं सेवते भजति । किंलक्षणं वपुः । त्वग्मांसास्थिमयं त्वचश्चर्माणि च मांसानि पिशि(शि)तानि च अस्थीनि कीकसानि च तानि प्रचुराणि यस्मिंस्तत् । किंलक्षणो जनः कविभिः काव्यकर्तृभिः एवं अमुना प्रकारेण प्रतारितमनाः प्रतारितं भ्रामितं मनो मानसं यस्य स तथा । एवं रूपं सत्येन निश्चयेन एष वदनीभूतः अवदनं वदनं भूतः मुखरूपः संपन्नः मृगाङ्कः चन्द्रमाः नो न भवति । इदं वदनं (नो?) न। तर्हि किं वदनरूपः चन्द्रमा इत्यर्थः । यां अयं वा लोचने इमे न भवतः किंतु लोचनतां नयनत्वं गतं प्राप्तं इदं इन्दीवरद्वंद्वं कृष्णान्योऽहयं न च पुनः कनकैः सुवर्णैः रम्या मनोहरा । अकृत्रिमैः शरीरजता च कृता अपि तु सर्वं कृतमित्यर्थः ॥ २९ ॥

सन्मार्गे तावदास्ते प्रभवति हि नरस्तावदेवेन्द्रियाणां
लज्जां तावद्विधत्ते विनयमपि समालम्बते तावदेव ।
भ्रूचापाकृष्टमुक्ताः श्रवणपथगता नीलपक्ष्माण एते
यावल्लीलावतीनां न हृदि धृतिमुषो दृष्टिबाणाः पतन्ति ॥३०॥

हि निश्चितम् । नरः पुमान् सन्मार्गे सतां साधूनां मार्गे सदाचारे इत्यर्थः । तावत् तत्पर्यन्तं आस्ते तिष्ठति । पुनः इन्द्रियाणां मनश्चक्षुःप्रभृतीनां तावदेव प्रभवति प्रभुर्भवति । इन्द्रियाणि तावत् वशे वर्तन्त इत्यर्थः । तथा नरः तावत् लज्जां अकार्यकरणे ह्रियं विधत्ते करोति । अकार्यकरणात्तावल्लज्जते इत्यर्थः । पुनः तावदेव विनयमपि विनीततामपि समालम्बते वहति । तावत् कियत् । यावत् लीलावतीनां विलासिनीनां दृष्टिबाणाः नयनशराः हृदि मनसि न पतन्ति न लगन्ति । किंलक्षणाः दृष्टिबाणाः भ्रूचापाकृष्टमुक्ताः भ्रूरेव चापं धनुः तेन आकृष्टाश्च ते मुक्ताश्च तथा । पुनः किं० श्रवणपथगताः श्रवणयोः कर्णयोः पन्थानं गति श्रवणपथः तत्र गताः प्राप्ताः। पुनः किं० नीलपक्ष्माणः। नीलानि श्यामानि पक्ष्माणि लोमानि येषु ते तथा । पुनः किंलक्षणाः धृतिमुषः धृतिं धैर्यं मुष्णन्ति हरन्ति ते तथा ॥ ३० ॥

यदेतत्पूर्णेन्दुद्युतिहरमुदाराकृतिधरं
मुखाब्जं तन्वङ्ग्याः किल वसति यत्राधरमधु ।
इदं तत्किंपाकद्रुमफलमिदानीमतिरसं
व्यतीतेऽस्मिन्काले विषमिव भविष्यत्यसुखदम् ॥ ३१ ॥

किलेति सत्ये । यत् एतत् प्रसिद्धं तन्वङ्ग्याः कृशाङ्ग्याः मुखाब्जं वदनकमलं वर्तते । किंलक्षणम् । पूर्णेन्दुद्युतिहरं पूर्णेन्दोः पूर्णचन्द्रमण्डलस्य द्युतिं कान्तिं हरति जयतीति तथा तत् । पुनः किंलक्षणं मुखाब्जम् । उदाराकृतिधरं उदारां रमणीयां आकृतिं आकारं धरति तच्चथा । तत् किं यत्र मुखाब्जे अधरमधु ओष्ठामृतं वसति । अन्येऽपि

मधुनः भावः मु । तत् मुखाब्जं इदानीं वर्तमाने काले अतिरसं अतिशयास्वादं वर्तते । तत् अस्मिन्काले व्यतीते अतिक्रान्ते सति । असुखदं दुःखदायि भविष्यति । किमिति उत्प्रेक्ष्यते । किंपाकद्रुमफलमिव । किंपाको विषवृक्षः तस्य फलमिव । यथा किंपाकस्य विषद्रुमस्य फलं अतिरसं भवति मधुरत्वात् । एवंभूतमपि असुखदं दुःखदायि भवति । मारकत्वात् ॥ २१ ॥

संसारेऽस्मिन्नसारे कुनृपतिभवनद्वारसेवाकलङ्क-
व्यासङ्गव्यस्तधैर्यं कथममलधियो मानसं संनिदध्युः ।
यत्रेताः प्रोद्यदिन्दुद्युतिनिचयभृतो न स्युरम्भोजनेत्राः
प्रेङ्खत्काञ्चीकलापाः स्तनभरविनमन्मध्यभागास्तरुण्यः ॥२२॥

अस्मिन् असारे सारविहीने संसारे अमलधियः निर्मलमतयः पुरुषाः मानसं चित्तं कथं संनिदध्युः कथं आरोपयन्ति । अपि तु नारोपयन्ति । कथं यथा स्यात् । कुनृपतिभवनद्वारसेवाकलङ्कव्यासङ्गव्यस्तधैर्यं स्यात्तथा । कुत्सिताः कृपणाः अदाताः( र )श्च अगुणज्ञाश्च ये नृपतयः राजानस्तेषां भवनानि गृहाणि तेषां द्वाराणि आजिराणि तेषां सेवा सेवनं सैव कलङ्कं लाञ्छनं तस्य व्यासङ्गः आसञ्जनं तेन व्यस्तं गतं धैर्यं धीरत्वं यत्र यस्यां क्रियायां तथा । यदि चेत् एताः सकलजगन्मनोहरत्वेन प्रसिद्धाः स्त्रियः युवत्यः तरुण्यः न स्युर्न भवेयुः । किंलक्षणाः प्रोद्यदिन्दुद्युतिनिचयभृतः प्रोद्यन् उद्यन् चासौ इन्दुः चन्द्रमाश्च । उद्यच्चन्द्रो हि पीतरक्तो भवति । तस्य द्युतिनां दीप्तीनां निचयं समूहं बिभ्रति धारयन्तीति तथा । पुनः किंलक्षणाः तरुण्यः । अम्भोजनेत्राः पद्मनयनाः । पुनः किं० । प्रेङ्खत्काञ्चीकलापाः प्रेङ्खत् शब्दायमानः काञ्चीकलापो मेखलादाम यासां तास्तथा । पुनः किं० । स्तनभरविनमन्मध्यभागाः । स्तनभरेण स्तनातिशयेन विनमन् मध्यभागः उदरं यासां तास्तथा । एतैर्नैते स्त्रीभिराकृष्टमनसः सन्तः कृपाङ्गः सेवन्ते इत्यर्थः ॥ २२ ॥

परिमलभृतो वाताः शाखा नवाङ्कुरकोटयो
मधुरविरुतोत्कण्ठाभाजः प्रियाः पिकपक्षिणः ।
विरलविरलस्वेदोद्गारा वधूवदनेन्दवः
प्रसरति मधौ धात्र्यां जातो न कस्य गुणोदयः ॥२३॥

धात्र्यां पृथिव्यां मधौ वसन्ते प्रसरति वर्धमाने सति कस्य पदार्थस्य गुणोदयः गुणाविर्भावः न जातः नाभूत् । अपि तु सर्वस्यापि पदार्थस्य गुणोदय आसीदित्यर्थः । यतः वाताः समीरणाः परिमलभृतः परिमलं आमोदं बिभ्रति ते तथा । आसन् । पुनः शाखाः तरूणां काण्डानि नवाङ्कुरकोटयः नवानां नूतनानां अङ्कुराणां किशलयोद्भेदानां कोट्यो

वासो तास्तथा आसन्। तथा प्रियाः सुखिनामतिवल्लभाः आगन्दकारित्वात्। पिकपक्षिणः कोकिलाः मधुरविकृतोत्कण्ठाभाजः। मधुरं मनोहरं च तत् विरुतं शब्दितं च तस्मिन् उत्कण्ठां औत्सुक्यं भजन्ति ते तथा आसन्। पिका उत्कण्ठया गिरोऽव्यक्तित्यर्थः। तथा मधुवदनेन्दवः स्त्रीमुखचन्द्राः विरलविरलस्वेदोद्गाराः। विरलविरलः अतिविरलः असान्द्रः स्वेदस्य घर्मजलस्य उद्गारः उद्गमः येषु ते तथा। वसन्ते हि नातिसी(शी)तं नात्युष्णं च जातो घर्मजलं स्वल्पमित्यर्थः॥ ३३॥

अच्छाच्छचन्दनरसार्द्रकरा मृगाक्ष्यो
धारागृहाणि कुसुमानि च कौमुदी च।
मन्दो मरुन्मधुरसः शुचि हर्म्यपृष्ठं
ग्रीष्मे मुदं च मदनं च विवर्धयन्ति॥ ३४॥

[१ अ. कुसुमाणि.]

एते पदार्थाः ग्रीष्मे उष्णकाले मुदं हर्षं च अन्यत् मदनं च कामं च विवर्धयन्ति। एते के। मृगाक्ष्यः मृगलोचनाः स्त्रियः। किंलक्षणाः। अच्छाच्छचन्दनरसार्द्रकराः। अच्छाच्छः अतिनिर्मलः योऽसौ चन्दनरसः तेन आर्द्रौ क्लिन्ना करौ पाणी यासां ताः तथा। तथा धारागृहाणि यन्त्रगृहाणि। च अन्यत् कुसुमानि पुष्पाणि। च अन्यत् कौमुदी चन्द्रज्योत्स्ना च धारा च पुनः मन्दः स्थिरः सुखस्पर्शो मरुत् वायुः। तथा मधुरसः मधुनो मधरसः। तथा शुचिः विविक्तं प्रसाधितं वा हर्म्यपृष्ठं वा। हर्म्यस्थलं च॥ ३४॥

शास्त्रज्ञोऽपि प्रगुणमतिरप्यात्मवोधोऽपि वाढं
संसारेऽस्मिन्भवति विरलो भाजनं सद्गतीनाम्।
येनैतस्मिञ्जिरयनगरद्वारमुद्घाटयन्ती
वामाक्षीणां भवति कुटिलभ्रूलता कुथिकेव॥ ३५॥

[१ रा. मू. 'विरति']

अस्मिन्संसारे तेन कारणेन विरलो जनः। कोऽप्येक इत्यर्थः। सद्गतीनां स्वर्गादीनां भाजनं पात्रं भवति। कश्चिदपि सद्गतिं प्राप्नोतीत्यर्थः। किंलक्षणः शास्त्रज्ञोऽपि शास्त्रवेत्तापि। पुनः किं०। वाढं अतिशयेन प्रगुणमतिरपि प्रगुणा विचार इवमित्यमिति वितर्के प्रवीणा मतिर्बुद्धिर्यस्य स तथा। पुनः किं०। आत्मवोधोऽपि आत्मनः परमात्मरूपस्य वोधो ज्ञानं यस्य स तथा। परमात्मतत्त्वज्ञोऽपीत्यर्थः। तेन केन। येन कारणेन एतस्मिन्संसारे वामाक्षीणां वामलोचनानां स्त्रीणां कुटिलभ्रूलता कुटिलभ्रूलेखा कुथिका इव कीलकोद्घाटनयन्त्रमिव भवति विद्यते। किंलक्षणा भ्रूलता। निरयनगरद्वारं नरकपुरद्वारं उद्घाटयन्ती प्रकाशयित्री। यथा कुथिका द्वारमुद्घाटयति तथा सापि नरकद्वारं उद्घाटयति। तद्दर्शनमूढानां नरकपातसम्भवादित्यर्थः॥ ३५॥

उन्मीलत्त्रिवलीतरङ्गवलया प्रोत्तुङ्गपीनस्तन-
द्वंद्वेनोद्धतचक्रवाकयुगला वक्त्राम्बुजोद्भासिनी ।
कान्ताकारधरा नदीयमभितः क्रूराशया नेष्यते
संसारार्णवमज्जनं यदि ततो दूरेण संत्यज्यताम् ॥३६॥

हे जन यदि चेत् संसारार्णवमज्जनं संसारसागरे ब्रुडनं न इष्यते न वाञ्छ्यते तर्हि इयं प्रसिद्धा कान्ताकारधरा कान्तायाः सुन्दर्याः आकारं आकृतिं धरति बिभर्तीति तथा । नदी स्त्रीरूपा नदीत्यर्थः। दूरेण दूरात् संत्यज्यतां (मु)च्यताम् । अथ कान्तानद्योः रूपकमाह । नद्यपि कान्ताकारा मनोहराकृतिर्भवति । किंभूता कान्ता नदी च । उन्मीलत्त्रिवलीतरङ्गवलया । उन्मीलत् प्रकाशत् त्रिवली वलित्रयमेव तरङ्गवलयं ऊर्मिमण्डलं यस्याः सा तथा । नदीपक्षे उन्मीलत् त्रिवलीव त्रिवलीतुल्यं तरङ्गवलयं कल्लोलचक्रं यस्याः सा तथा । पुनः किंलक्षणा । प्रोत्त(त्तु)ङ्गपीनस्तनद्वंद्वेन प्रोत्त(त्तु)ङ्गं उन्नतं च पीनं च मांसलं च तत् स्तनद्वंद्वं कुचयुग्मं च तेन मिषेण उद्गतचक्रवाकयुगला स्तनद्वयव्याजेन उद्यतचक्रवाकमिथुना । नद्यां हि चक्रवाकमिथुनैर्भाव्यम् । पुनः किंलक्षणा । वक्त्राम्बुजोद्भासिनी । वक्त्रमेवाम्बुजं पद्मं तेन उत् अतिशयेन भासते शोभते सा तथा । नद्यपि अम्बुजोद्भासिनी भवति । पुनः किंलक्षणा । अभितः सर्वदा(तः) क्रूराशया क्रूरः कठिनः आशयोऽन्तःकरणं यस्याः सा तथा । नद्यपि अभितः क्रूरजलाशया भवति ॥ ३६ ॥

इह हि मधुरगीतं नृत्यमेतद्रसोऽयं
स्फुरति परिमलोऽसौ स्पर्श एष स्तनानाम् ।
इति हतपरमार्थैरिन्द्रियैर्भ्राम्यमाणः
स्वहितकरणधूर्तैः पञ्चभिर्वञ्चितोऽस्मि ॥ ३७ ॥

[१रा. मू. 'हत इतिवद्भाति.]

इत्यमुना प्रकारेण हतपरमार्थैः नासि( शि )तपरमतज्जज्ञानैः पञ्चभिः पञ्चसंख्याकैः इन्द्रियैः भ्राम्यमाणः प्रतार्यमाणः सन् वञ्चितोऽस्मि मुषितोऽस्मि । किंलक्षणैः स्वहितकरणधूर्तैः । स्वहितकरणे स्वार्थकरणाय धूर्तानि वञ्चकानि तैः। इतीति किं हि निश्चितं इहास्मिन्स्थले मधुरगीतं मनोहरं गानं वर्तते इति श्रोत्रेन्द्रियेण प्रतारणा । एतत् मधुरं नृत्यं नाट्यं वर्तते इति चक्षुरिन्द्रियेण प्रतारणा । अयं हि मधुरो रसः पानं वर्तते इति रसनेन्द्रियेण प्रतारणा । असौ परिमलः आमोदः स्फुरति प्रसरतीति घ्राणेन्द्रियेण प्रतारणा । एषः स्तनानां कुचानां स्पर्शः रम्यं स्पर्शनमिति त्वगिन्द्रियेण प्रतारणा ॥ ३७ ॥

संसार तव पर्यन्तपदवी न दूरीयसी।
अन्तरा दुस्तरा न स्युर्यदि रे मदिरेक्षणाः ॥ ३८ ॥

हे संसार तव पर्यन्तपदवी मोक्षपद्धती न दूरीयसी न अतिशयेन दूरा दूरीयसी यदि चेद् । अन्तरा मध्ये दुस्तरा उल्लङ्घयितुमशक्या मदिरेक्षणा मदिरावद् मद्यजनकं ईक्षणं दर्शनं यासां तास्तथा स्त्रियो न स्युर्न भवेयुः ॥ ३८ ॥

कामिनीकायकान्तारे कुचपर्वतदुर्गमे।
मा संचर मनःपान्थ यत्रास्ते स्मरतस्करः ॥ ३९ ॥

[१अ. 'स्तन']

हे मनःपान्थ हे चित्तपथिक त्वं कामिनीकायकान्तारे कामिन्याः स्त्र्यूर्याः कायः शरीरमेव कान्तारं वनं तस्मिन् । मा संचार मा गच्छ । किंलक्षणे स्त्रीशरीरवने । कुचपर्वतदुर्गमे । कुचौ स्तनौ एव पर्वतौ गिरी ताभ्यां दुर्गे(र्गमे) विषमे कान्तारमपि पर्वताभ्यां विषमं भवति । यतः तत्र कामिनीकान्तारे स्मरतस्करः आस्ते स्मरः कन्दर्प एव तस्करश्चौरः तिष्ठति । वने हि चौरेण भवितव्यम् ॥ ३९ ॥

शृङ्गारद्रुमनीरदे प्रसुमरक्रीडारसस्रोतसि
प्रद्युम्नप्रियबान्धवे चतुरतामुक्ताफलोद्वन्वति ।
तन्वीनेत्रचकोरपार्वणविधौ सौभाग्यलक्ष्मीनिधौ
धन्यः कोऽपि न विक्रियां कलयति प्राप्ते नवे यौवने ॥४०॥

[ १ रा. मूले श्री. टी. श्रोतसीत्यपि ]

कोऽपि धन्यः पुरुषः नवे नूतने यौवने तारुण्ये प्राप्त आगते सति विक्रियां विकारं कुचेष्टां न कलयति न धारयति विक्रियां न धत्ते स धन्यः भाग्यवानित्यर्थः । किंलक्षणे यौवने शृङ्गारद्रुमनीरदे शृङ्गार एव द्रुमः वृक्षस्तस्य नीरदे जलदे । वृक्षा हि नेवेन सिच्यमानाः प्रवृद्धा भवन्ति । एवं यौवनेन शृङ्गार इत्यर्थः । पुनः किंलक्षणे । प्रसुमरक्रीडारसस्रोतसि प्रसुमराणि०प्रसरणशीलानि क्रीडारसा एव केल्यासक्तय एव स्रोतांसि प्रवाहाः यस्मिंस्तत्तथा । तस्मिन् प्रवहः क्रीडारसा भवन्तीत्यर्थः। पुनः किं०। प्रद्युम्नप्रियबान्धवे प्रियबन्धोर्मित्रस्य भावः प्रियबान्धवं प्रद्युम्नस्य कन्दर्पस्य प्रियबान्धवे प्रियमित्रत्वं यस्य तत्तथा तस्मिन् प्रियबा(ब)न्धौ आगते यथा मित्रं हृष्यति तथा यौवने कन्दर्प इत्यर्थः । पुनः किं० । चतुरतामुक्ताफलोद्वन्वति । चतुरता चातुर्यमेव मुक्ताफलानि प्रशस्तमौक्तिकानि तेषां उदन्वान् समुद्रः । तस्मिन् समुद्रे हि प्रशस्तमौक्तिकानि यथा भवन्ति तथा यौवने च चतुरता इत्यर्थः । पुनः किं० । तन्वीनेत्रचकोरपार्वणविधौ । तन्वीनां सुन्दरीणां नेत्राणि

नयनान्येव चकोराः पक्षिणः तेषां पार्वणविधुरिव पार्वणविधुः पूर्णमासीचन्द्रः तस्मिन् । पूर्णचन्द्रमसं दृष्ट्वा यथा चकोरा हृष्यन्ति दृप्यन्ति तथा यौवनं दृष्ट्वा स्त्रीनेत्राणि इत्यर्थः। तन्वीनेत्रचकोरपारणविधाविति वा पाठः नेत्रचकोराणां पारणाय भोजनाय विधुरिव विधुस्तस्मिन् । चकोरा हि चन्द्रज्योत्स्नाः पिबन्तीति प्रसिद्धमेव । पुनः किं० सौभाग्यलक्ष्मीनिधा । सौभाग्यस्य सुन्दरत्वस्य लक्ष्म्यः शोभाः तासां निधिरिव निधिस्तस्मिन् । यथा निधौ लक्ष्म्यो भवन्ति तथा यौवने सुन्दरत्वानीत्यर्थः । एवं बहुभिः उपमानैर्यौवनस्य प्रबलत्वेऽपि पुरुषस्य विक्रियायां अकलने महाभागमित्यर्थः ॥ ४० ॥

रागस्यागारमेकं नरकशतमहादुःखसंप्राप्तिहेतु-
र्मोहस्योत्पत्तिबीजं जलधरपटलं ज्ञानताराधिपस्य ।
कन्दर्पस्यैकमित्रं प्रकटितविविधस्पष्टदोषप्रबन्धं
लोकेऽस्मिन्न ह्यनर्थव्रजकुसुमवनं यौवनादन्यदस्ति ॥४१॥

[ १ अ. 'प्रबन्धो' ]

हि निश्चितम् । अस्मिन् भूलोके यौवनात् अन्यत् तारुण्यात् इतरत् रागस्य क्रोधादेः कषायस्य एकं मुख्यं आगारं धवलगृहं न अस्ति । यथा अगारे स्वामी नित्यं वर्तते तथा यौवने राग इत्यर्थः । तथा यौवनात् अन्यत् नरकशतमहादुःखसंप्राप्तिहेतुः नास्ति । नरकशतेषु कुम्भीपाकतपनावीचिमहारौरवरौरवसंघातकालसूत्रलालाभक्षवैतरणीप्रभृतिषु यानि महादुःखानि अतिकष्टानि तेषां संप्राप्तौ न हेतुः । कारणं न विद्यते । तथा तस्मादन्यत् मोहस्याज्ञानस्य उत्पत्तिबीजं उदयकारणं नास्ति । तथा ज्ञानताराधिपस्य विवेकचन्द्रस्य जलधरपटलं मेघमण्डलं यौवनादन्यन्नास्ति । यथा जलधरपटलेन चन्द्र आच्छाद्यते तथा यौवनेन विवेक इत्यर्थः । तथा यौवनादन्यत् प्रकटितविविधस्पष्टदोषप्रबन्धं अन्यत् वस्तु नास्ति । प्रकटितः प्रकाशितः विविधानां अनेकप्रकाराणां स्पष्टदोषाणां प्रसिद्धदुर्गुणानां प्रबन्धः परंपरा येन तत् । एवं वस्तु अन्यन्नास्ति । तथा अनर्थव्रजकुसुमवनम् । अनर्थव्रजाः उत्पातसमूहाः एव कुसुमानि पुष्पाणि यस्य तत्तथा । एवंभूतं वनं काननं अन्यत् नास्ति । यथा कानने बहूनि कुसुमानि भवन्ति तथा यौवने बहवोऽनर्था इत्यर्थः ॥ ४१ ॥

द्रष्टव्येषु किमुत्तमं मृगदृशः प्रेमप्रसन्नं मुखं
घ्रातव्येष्वपि किं तदास्यपवनः श्राव्येषु किं तद्वचः ।
किं स्वाद्येषु तदोष्ठपल्लवरसः स्पृश्येषु किं तत्तनु-
र्ध्येयं किं नवयौवने सहृदयैः सर्वत्र तद्विभ्रमाः ॥ ४२ ॥

द्रष्टव्येषु दर्शनीयेषु सुन्दरेषु वस्तुषु किं उत्तमं किं श्रेष्ठम् । का दर्शनीयसीमेत्यर्थः । मृगदृशः मृगलोचनायाः स्त्रियाः मुखं वदनं श्रेष्ठम् । किंलक्षणम् । प्रेमप्रसन्नं प्रि(प्रे)ण्णा प्रियतया प्रसन्नं सानन्दम् । तथा घ्रातव्येषु अपि आघ्राणीयेषु किं उत्तमम् । तदास्यपवनः तस्या मृगदृशः आस्यं वदनं तस्य पवनः स्वनिश्वासः उत्तमः । तथा श्राव्येषु श्रवणीयेषु किं उत्तमं श्रेष्ठं तदाह तद्वचः श्रेष्ठम् । तस्याः वचः वचनम् । तथा स्वाद्येषु स्वादार्हवस्तुषु किं उत्तमं तदाह । तदोष्ठपल्लवरसः तस्याः ओष्ठपल्लवः अधरकिशलयं तस्य रसः पानं उत्तमः । तथा स्पृश्येषु स्पर्शनीयेषु कोमलेषु वस्तुषु किं उत्तमं तदाह तत्तनुः तस्यास्तनुः शरीरं उत्तमा । तथा सहृदयैः दयालुभिः ज्ञानिभिः चतुरैरित्यर्थः । नवयौवने नवे तारुण्ये सति किं ध्येयं किं ध्यातव्यं तदाह । सर्वत्र पदार्थेषु सर्वकालेषु वा तद्विभ्रमाः तस्याः विभ्रमाः विलासाः ध्येयाः स्मरणीयाः । एतेनोक्तिप्रत्युक्तिकथनेन जगति एतादृक् रम्यं वस्तु न भवतीत्यर्थः ॥ ४२ ॥

जात्यन्धाय च दुर्मुखाय च जराजीर्णाखिलाङ्गाय च
ग्रामीणाय च दुःकुलाय च गलत्कुष्ठाभिभूताय च ।
संदत्ते सुमनोहरं निजवपुर्लक्ष्मीलवश्रद्धया
पण्यस्त्रीषु विवेककल्पलतिकाशस्त्रीषु रज्येत कः ॥ ४३ ॥

[ १ अ ' दुःकलाय ']

कः विवेकी पुमान् । पण्यस्त्रीषु पण्याङ्गनासु वेश्यासु रज्येत रागं प्राप्नुयात् । किंलक्षणासु विवेककल्पलतिकाशस्त्रीषु विवेकः विचारः ज्ञानं एव कल्पलतिका कल्पवल्ली तस्याः शस्त्रीषु कुठारिकासु च्छेदिकास्वित्यर्थः । या पण्यस्त्री जात्यन्धाय जात्या जन्मना अन्धः निश्चक्षुः तस्मै पुरुषाय सुमनोहरं सुन्दरं निजवपुः स्वशरीरं दत्ते ददाति । च पुनः दुर्मुखाय दुर्वदनाय । च पुनः जराजीर्णाखिलाङ्गाय । जरया वृद्धत्वेन जीर्णानि शिथिलानि अखिलानि सर्वाणि अङ्गानि हस्तपादादीनि यस्य स तथा तस्मै । च पुनः ग्रामीणाय ग्रामे भवो ग्रामीणः तस्मै अचतुराय । च पुनः दुष्कुलाय कुत्सितकुलोत्पन्नाय । च पुनः गलत्कुष्ठाभिभूताय गलत् स्रवत् यत् कुष्ठं चि( श्वि ? )त्रं तेन अभिभूतः पराभूतः तस्मै दुर्व्याधिमते पुरुषाय निजवपुः संदत्ते कया लक्ष्म्या लवश्रद्धया । लक्ष्म्याः लवः कणः अतिस्तोकत्वं तस्य या श्रद्धा वाञ्छा तया ॥ ४३ ॥

कश्चुम्बति कुलपुरुषो वेश्याधरपल्लवं मनोज्ञमपि ।
चारभटचोरचेटकनटविटनिष्ठीवनशरावम् ॥ ४४ ॥

कः कुलपुरुषः सत्कुलोत्पन्नः पुमान् । मनोज्ञं मनोहरमपि वेश्याधरपल्लवं ओष्ठकिसलयं चुम्बति पिबति । किंलक्षणं अधरम् । चारभटचोरचेटकनटविटनिष्ठीवनशरावम् । चाराः प्रणिधयः भटाः योद्धारः चौराः तस्कराः चेटकाः दासाः । नटा नर्तकाः विटाः स्त्रिंगाः [विडगाः]तेषां निष्ठीवनं थूत्करणं तदर्थं शरावं घटप( ख )र्परं शरावमिव शरावम् । यथा शरावे निष्ठीवनं क्षिप्यते तथा वेश्याधर इत्यर्थः ॥ ४४ ॥

वेश्यासौ मदनज्वाला रूपेन्धनसमेधिता ।
कामिभिर्यत्र हूयन्ते यौवनानि धनानि च ॥ ४५ ॥

असौ वेश्या मदनज्वाला मदनस्य कामाग्नेः ज्वाला शिखा वर्तते किंभूता रूपेन्धनसमेधिता । रूपं सौन्दर्यमेव इन्धनं काष्ठं तेन समेधिता वर्धिता । अग्निशिखा अपि इन्धनेन समिध्यते । यत्र वेश्यायां कामिभिः पुरुषैः यौवनानि तारुण्यानि । च अन्यत् धनानि द्रविणानि । हूयन्ते क्षिप्यन्ते अग्निशिखायामपि हूयते कामनापरैः पुरुषैः । ४५ ॥

मधुरयं मधुरैरपि कोकिलाकलकलैर्मलयस्य च वायुभिः ।
विरहिणः प्रणिहन्ति शरीरिणो विषदि हन्त सुधापि विषायते ॥४६॥

अयं मधुर्वसन्तः मधुरैरपि मनोहरैरपि कोकिलाकलकलैः कोकिलानां कलकलाः कोलाहलाः तैः । च अन्यत् । मलयस्य गिरेः वायुभिः दक्षिणानिलैः कृत्वा । विरहिणः शरीरिणः प्रणिहन्ति मारयति । व्यथयतीत्यर्थः । हन्त खेदे । विषदि सत्यां आपत्काले सति सुधापि अमृतमपि विषायते विषमिव आचरति ॥ ४६ ॥

तावन्महत्त्वं पाण्डित्यं कुलीनत्वं विवेकिता ।
यावज्ज्वलति नाङ्गेषु हन्त पञ्चेषुपावकः ॥ ४७ ॥

पुरुषस्य तावत्कालपर्यन्तं महत्त्वं महतो भावो भवति । महत्त्वं तावद्गणयति । पाण्डित्यं च तावद्गणयति तावत् पाण्डित्यं पण्डितत्वं भवति । तथा तावत्कुलीनत्वं सत्कुलता भवति । पुमान् तावत् कुलं गणयतीत्यर्थः । तावत्पुंसः विवेकिता विवेकज्ञत्वं भवति । तावद्विवेको भवतीत्यर्थः । तावत् कियत् । हन्त इति खेदे । यावत् अङ्गेषु हृदयहस्तादिषु पञ्चेषुपावकः पञ्च इषवः शोषणमोहनतापनोन्मादनोच्चाटनाः बाणाः यस्य पञ्चेषुः कामः स एव पावकः न ज्वलति ? न दीप्तो भवति । एतेन कामानले प्रदीप्ते महत्त्वादयः सर्वेऽपि गुणा नष्टा भवन्तीत्यर्थः ॥ ४७ ॥

शंभुस्वयंभुहरयो हरिणेक्षणानां
येनाक्रियन्त सततं गृहकर्मदासाः ।
वाचामगोचरचरित्रपवित्रिताय
तस्मै नमो भगवते मकरध्वजाय ॥ ४८ ॥

[ १ रा. 'स्वयंभू' मूले टीकायां च ]

तस्मै भगवते मकरध्वजाय मीनकेतवे कामाय नमः । ममस्कारोऽस्तु । किंलक्षणाय । वाचां अगोचरचरित्रपवित्रिताय । वाणीनां अगोचरं अविषयं यत् चरित्रं पराक्रमः तेन पवित्रितः शोभितः तस्मै । अवाङ्मनसगोचरचरित्रायेत्यर्थः । तस्मै कस्मै । येन शंभुस्वयंभूहरयः । शंभुः श्रीमहादेवः स्वयंभूर्ब्रह्मा हरिः श्रीनारायणः ते हरिणेक्षणानां मृगनयनानां स्त्रीणां सततं गृहकर्मदासाः गृहकर्मसु गृहव्यापारेषु दासा इव दासाः नियोगकर्तारः अक्रियन्त क्रि(कृ)ताः । येनाकुलिताः सन्तः स्त्रीणां गृहेषु भृत्या इव भवन्तीत्यर्थः ॥ ४८ ॥

स्त्रीमुद्रां झषकेतनस्य परमां सर्वार्थसंपत्करी-
मेनां ये प्रविहाय यान्ति कुधियो मिथ्याफलान्वेषिणः ।
ते[1] तेनैव निहत्य निर्दयतरं नग्नीकृता मुण्डिताः
केचित्पञ्चशिखीकृताश्च जटिलाः कापालिकाश्चापरे ॥४९॥

[ १ अ. ' वसतिं ' । २ अ. शोधनात्प्राक् 'तत्तेनैव ']

कुधियो मूढाः । झषकेतनस्य मकरध्वजस्य पंदर्पस्य । एनां प्रसिद्धां परमां उत्कृष्टां स्त्रीमुद्रां स्त्री एव मुद्रा व्यवहारद्रविणाभिज्ञा तां प्रविहाय त्यक्त्वा अनादृत्य यान्ति गच्छन्ति । किंलक्षणां स्त्रीमुद्रां सर्वार्थसंपत्करीं सर्वाः सकलाः भोगदानाद्याः अर्थसंपदः पदार्थसमृद्धीः करोतीति तथा । किंलक्षणाः कुधियः मिथ्याफलान्वेषिणः । मिथ्याफलानि अनिर्धारितफलानि । संदिग्धानीत्यर्थः । स्वर्गादीनि अन्वेषयन्तीति तथा । अनिर्णीतफलानि स्वर्गादीन्युद्दिश्य ये स्त्रियः त्यजन्तीत्यर्थः । ते पुरुषाः तेन कामेन निर्दयतरं अतिनिष्करुणं यथा स्यात्तथा नग्नीकृताः विवस्त्राः कृताः वर्तन्ते । दिगम्बराः कृता इत्यर्थः । केचित् केऽपि मुण्डिता व्युप्तकेशाः कृताः तथा केचित् पञ्चशिखीकृताः पञ्चशिखावन्तः कृताः । अपञ्चशिखाः( पञ्चशिखाः )कृताः इति पञ्चशिखीकृताः । तथा केचित् जटिलाः जटावन्तः कृताः । तथा अपरे कापालिकाः कपालेन चरन्ति ते तथा । शैवा इत्यर्थः । कृताः । एतेन कामार्थमेतानि तपोलिङ्गानि दधतः क्लिश्यन्तीत्यर्थः ॥ ४९ ॥

विस्तारितं मकरकेतनधीवरेण
स्त्रीसंज्ञितं विडिशमत्र भवाम्बुराशौ ।
येनाचिरात्तदधरामिषलोलमत्स्य-
मीवान्विलुप्य स पचत्यनुरागवह्नौ ॥ ५० ॥

अत्र भवाम्बुराशौ संसारसमुद्रे मकरकेतनधीवरेण । मकरः केतने ध्वजे यस्य स तथा मीनध्वजः कामः । स एव धीवरः मत्स्यघाती तेन खीसंज्ञितं खीनामकं विडिशं मत्स्यबन्धनं जालं विस्तारितं प्रसारितं वर्तते । येन विडिशेन अचिरात्तत्क्षणमेव स कामः धीवरः तदधराभिधलमर्त्यमीनान् । तस्याः स्त्रियाः अधरामिषं ओष्ठामृतं तत्र लोलाश्चपला ये मर्त्याः मनुष्याः त एव मीना मत्स्यास्तान्विकृष्य आकृष्य अनुरागवह्नौ अनुराग एव वह्निः तस्मिन् स्नेहतैश्चानरं पचति तत्र स्थापयतीत्यर्थः । अत्रामिषशब्दः अमृतवचनः । यथान्योऽपि धीवरः आमिषलोलाः मांसाय लालसाः ये मीनाः तान्विकृष्य वह्नौ पचति रन्धयति ॥ ५० ॥

उन्मत्तप्रेमसंरम्भादारभ्यन्ते यदङ्गनाः ।
तत्र प्रत्यूहमाधातुं ब्रह्मापि खलु कातरः ॥ ५१ ॥

[ १ अ. 'सारम्भा' । २ रा. टी. 'आरभन्ते' । ]

उन्मत्तप्रेमसंरम्भात् । उन्मत्तं उच्छृङ्खलं यत् प्रेम स्नेहः तस्य संरम्भात् आटोपात् अतिप्रेम्ण इत्यर्थः । अङ्गनाः कामिन्यः यत् कर्म आरभन्ते यत्कर्तुमिच्छन्तीत्यर्थः । तत्र कर्मणि प्रत्यूहं अन्तरायं आधातुं कर्तुं ब्रह्मापि जगत्स्रष्टापि । खलु निश्चितं कातरः भीरुः वर्तते । तत्र प्रत्यूहं कर्तुं विभेतीत्यर्थः ॥ ५१ ॥

प्रणयमधुराः प्रेमोद्गाढाः प्रसादपदास्तथा
भणितिमधुरा मुग्धप्रायाः प्रकाशितसंमदाः ।
प्रकृतिसुभगा विश्रम्भार्थाः स्मरोदयदायिनो
रहसि किमपि स्वैरालापा हरन्ति मृगीदृशाम् ॥ ५२ ॥

[ १ रा. टी. 'प्रसन्न । २ रा. मू. विद्ध( धृ )म्भार्थाः । ३ अ. स्मेरा° ]

मृगीदृशां मृगीलोचनानां स्त्रीणां रहसि एकान्ते स्वैरालापाः स्वैरं स्वेच्छया आलापाः वचनानि स्वैरालापाः । किमपि अनिर्वचनीयं तथा स्यात्तथा । चित्तं इति शेषः । हरन्ति आकर्षन्ति । किंलक्षणाः स्वैरालापाः प्रणयमधुराः प्रणयेन स्नेहेन मधुराः यदि वशं न यास्यामि तदा स्नेहो नङ्क्ष्यतीति विह्वलाः । पुनः किंलक्षणाः प्रेमोद्गाढाः प्रेम्णा स्नेहेन उत्कृष्टाः सन्तः गाढाः दृढाः । अथ वा प्रेम्णा उत् अतिशयेन गाढा भूताः यत्र प्रभूतं प्रेमास्तीत्यर्थः । पुनः किंलक्षणाः तथा तेन प्रकारेण यथा प्रेम भवति तथोक्ता इत्यर्थः प्रसन्नपदाः प्रसन्नानि उज्ज्वलानि शान्तानि वा पदानि सुश्लिष्टान्तरूपाणि येषु ते तथा । पुनः किंलक्षणाः । भणितिमधुराः भणितौ भणने सति मधुरा मनोहराः कथ्यमानाः रम्या इत्यर्थः । पुनः किंलक्षणाः मुग्धप्रायाः मुग्धा अचतुराः तेभ्यः ईषन्न्यूनाः मुग्धप्रायाः ।

चतुरा अपि अचतुरा इव ज्ञायमानाः इत्यर्थः। अत एव। किंलक्षणाः प्रकासि(शि)तसंमदाः प्रकाशितः प्रकटीकृतः संप(म)दो हर्षो यैस्ते तथा। पुनः किंलक्षणाः प्रकृतिसुभगाः प्रकृत्या स्वभावेन सुभगाः मनोहराः अकृत्रिमसुभगत्वात्। विश्रम्भार्थाः। विश्रम्भः विश्वासः कथ्यते येषु ते तथा। अहं ते वशं यास्यामीति विश्वासजनका इत्यर्थः प्रकृतिसुभगाविर्भूतार्था इत्येकं पदं वा पाठान्तरे। प्रकृत्या सुभगाश्च ते आविर्भूतार्थाश्च ते तथा। अत एव। पुनः किंलक्षणाः। स्मरोदयदायिनः स्मरस्य कामस्य उदयं उत्कर्षं ददतीत्येवंशीलाः। अतिशयेन कामजनका इत्यर्थः॥ ५२॥

मालती शिरसि जृम्भणोन्मुखी चन्दनं वपुषि कुङ्कुमाविलम्।
वक्षसि प्रियतमा मदालसा स्वर्ग एष परिशिष्ट आगतः॥ ५३॥

एषः परिशिष्टः पूर्णः स्वर्गः देवराज्यवासः आगतः प्राप्तो वर्तते। इदं सुखं स्वर्गवासतुल्यमित्यर्थः। एषः कः। यत् शिरसि मस्तके जृम्भणोन्मुखी जृम्भणाय विकासाय उन्मुखी विकसन्ती मघमघायमाना इत्यर्थः। पुनः वपुषि शरीरे कुङ्कुमाविलं कुङ्कुमेन केसरेण आविलं मिश्रितं चन्दनं मलयजरसः। पुनः किं०। वक्षसि उरःस्थले मदालसा मदेन यौवनोत्थमत्ततया अलसा मन्थरा प्रियतमा कामिनी भवति। तत् एषः॥ ५३॥

कुङ्कुमपङ्ककलङ्कितदेहा गौरपयोधरकम्पितहारा।
नूपुरहंसरणत्पदपद्मा कं न वशीकुरुते भुवि रामा॥ ५४॥

रामा सुन्दरी स्त्री भुवि पृथिव्यां कं पुरुषं न वशीकरोति। अपि तु सर्वं वश्यं करोतीत्यर्थः। किंलक्षणा रामा। कुङ्कुमपङ्ककलङ्कितदेहा। कुङ्कुमपङ्केन चन्दनकेसरकर्दमेन कलङ्कितो लाञ्छितो देहो यस्याः सा तथा। पुनः किंलक्षणा। गौरपयोधरकम्पितहारा। गौरयोः पीतयोः पयोधरयोः स्तनयोः संबन्धी उपरि वा कम्पितः चलन् हारः एकावल्यादिर्यस्याः सा तथा। विकसितजातीपुष्पसुगन्धिरिति वा पाठान्तरम्। विकसितानि प्रफुल्लानि च तानि जातीपुष्पाणि च माला तैः सुगन्धिः। पुनः किंलक्षणा। नूपुरहंसरणत्पदपद्मा। नूपुरौ मञ्जीरौ एव हंसौ मरालौ रणन्तौ शब्दायमानौ पादपद्मौ चरणकमले यस्याः सा तथा॥ ५४॥

नूनं हि ते कविवरा विपरीतबोधा
ये नित्यमाहुरबला इति कामिनीस्ताः।
याभिर्विलोलतरतारकदृष्टिपातैः
शक्रादयोऽपि विजिता अबलाः कथं ताः॥ ५५॥

नूनं इति संबोधने। हि निश्चितं ते कविवराः कविषु श्रेष्ठाः विपरीतबोधाः विपरीतः अनन्वितः बोधो ज्ञानं येषां ते तथा। विपरीतज्ञानाः। ते कं। ये कविवराः

ताः कामिनीः स्त्रीः नित्यं सदा अवशाः नःवशं यासां ताः तथा । आहुः कथयन्ति । यतः याभिः कामिनीभिः । विलोलतरतारकदृष्टिपातैः विलोलतराः अतिचपलाः तारकाः कनीनिकाः यासु ताः तथा दृष्टपश्च नेत्राणि च तासां पाताः क्षेपाः तैः कृत्वा शक्रादयः जगज्जयनशीलाः इन्द्रादयोऽपि देवा अपि विजिताः वशीकृताः । ताः स्त्रियः कथं कस्मात् अपटाः कथ्यन्त इति शेषः ॥ ५५ ॥

उद्वृत्तः स्तनभार एष तरले नेत्रे चले भ्रूलते
रागाधिष्ठितमोष्ठपल्लवमिदं कुर्वन्तु नाम व्यथाम् ।
सौभाग्याक्षरमालिकेव लिखिता पुष्पायुधेन स्वयं
मध्यस्थापि करोति तापमधिकं रोमावली केन सा ॥५६॥

यत्र निश्चितं एषः उद्वृत्तः स्तनभारः वर्तुलाकारः स्तनयोः कुचयोः भारः अतिशयेन उच्चपीनत्वमित्यर्थः । तथा तरले चपले नेत्रे नयने । तथा चले चपले भ्रूलते भ्रूयल्यौ । तथा रागाधिष्ठितं रागेण रक्तिम्ना अधिष्ठितं आश्रितं एवं ओष्ठपल्लवं अधरकिशलयं च । एतानि वस्तूनि व्यथां बाधां कुर्वन्तु पीडयन्तित्यर्थः । यः किल उद्वृत्तः पुरुषमतिक्रान्तः स व्यथां जनयति । तथा यश्च तरलः तथा यश्चपलः । यश्च रागेण क्रोधादिना अधिष्ठितो भवति स व्यथां जनयति । तद्युक्तमित्यर्थः । परं सा रोमावलिः रोमराजिः केन कारणेन तापं महातापं करोति । किंलक्षणा मध्यस्थापि मध्ये उदरमध्ये तिष्ठतीति मध्यस्थापि । यो मध्यस्थः किल भवति सः तापं करोतीत्यत्र चित्रम् । पुनः किंलक्षणा रोमावलिः । पुष्पायुधेन कामेन स्वयं आत्मना लिखिता रचिता अतिमनोहरेत्यर्थः । सौभाग्याक्षरमालिकेव । सौभाग्यार्थानां अक्षराणां वर्णानां मालिका एव श्रेणी एव । अत्र महत्सौभाग्यं अस्तीति लिखिता अक्षरपङ्क्तिरिवेत्यर्थः ॥ ५६ ॥

विक्लस्य मन्दमनसः कुकवेः कवित्वं
यः स्त्रीमुखं च शशिनं च समीकरोति ।
भ्रूक्षेपविस्मितकटाक्षनिरीक्षणानि
कोपप्रसादहसितानि कुतश्च चन्द्रे ॥ ५७ ॥

तस्य कुकवेः दुष्कवेः शशिनं च कवित्वं काव्यं विक्लं भिन्नमस्तु । किंलक्षणस्य मन्दमनसः मूढमतेः । तस्य कस्य । यः कुकविः स्त्रीमुखं नारीवदनं समीकरोति । तुल्यत्वेन वर्णयति यतः कारणात् चन्द्रे चन्द्रमसि भ्रूक्षेपविस्मितकटाक्षनिरीक्षणानि । भ्रूक्षेपेण कटाक्षनिरीक्षणेन विस्मितानि विस्मयकारीणि यानि कटाक्षनिरीक्षणानि पक्षत्रयेऽपि योजनानि कुतः कथं भवन्ति । अपि तु न भवन्ति । तथा कोपप्रसादहसितानि । कोपप्रसादाभ्यां क्रोधप्रसन्नताभ्यां हसितानि हसनानि च चन्द्रे कुतो भवन्ति ॥५७॥

जल्पन्ति सार्धमन्येन पश्यन्त्यन्यं सविभ्रमाः ।
हृद्गतं चिन्तयन्त्यन्यं प्रियः को नाम योषिताम् ॥ ५८ ॥

नाम निश्चितम् । योषितां स्त्रीणां कः प्रियो वल्लभो भवति । अपि तु न कोऽपि प्रियः । यतस्ताः अन्येन इतरेण सार्धं जल्पन्ति वदन्ति । तथा सविभ्रमाः सविलासाः सत्यः अन्यं अपरं पश्यन्ति विलोकयन्ति । तथा हृद्गतं हृदये अन्यं इतरं चिन्तयन्ति । कथा तेन सह समेष्यामि इति ध्यायन्तीति ॥ ५८ ॥

स्वपरप्रतारकोऽसौ निन्दति योऽलीकपण्डितो युवतीः ।
यस्मात्तपसोऽपि फलं स्वर्गः स्वर्गेऽपि युवतयोऽप्सरसः ॥५९॥

असौ अलीकपण्डितः मिथ्यापण्डितः । मिथ्यापण्डितत्वमिमानीत्यर्थः । युवतीः स्त्रियः निन्दति । स्त्रियः निष्करुणाः अशुचयः मोहरूपाश्चेत्येव जुगुप्सते । सः स्वपरप्रतारकः स्वं आत्मानं परं अन्यं च प्रतारयति छलयतीति तथा । तेन सर्वेऽपि वंचिता इत्यर्थः । यस्मात्कारणात्तपसोऽपि धर्मानुष्ठानस्यापि स्वर्गः सुरलोकः फलं लाभः । तथा स्वर्गेऽपि युवतयः स्त्रियः अप्सरसः देवाङ्गनाः फलं महालाभ इत्यर्थः ॥५९॥

विश्रम्य विश्रम्य वनद्रुमाणां छायासु तन्वी विचचार काचित् ।
तनूत्तरीयेण करोद्धृतेन निवारयन्ती शशिनो मयूखान् ॥६०॥

काचित्तन्वी स्त्री वनद्रुमाणां काननतरूणां छायासु आतपप्रत्यनीकासु विश्रम्य विश्रम्य चन्द्रकिरणस्पर्शभयेन विश्रान्त्वा २ ( विश्रान्त्वा ) विचचार चलति स्म । किं कुर्वती । करोद्धृतेन करस्थां उद्धृतेन उत्क्षिप्तेन तनूत्तरीयेण । तनु सूक्ष्मं च तत् उत्तरीयं च आच्छादनं वासः तेन शशिनश्चन्द्रमसः मयूखान्किरणान् निवारयन्ती निषेधयन्ती सती । कामार्कृततया तस्याश्चन्द्रकिरणः दुःसहा इति भावः ॥ ६० ॥

अदर्शने दर्शनमात्रकामा दृष्टौ परिष्वङ्गरसैकलोला ।
आलिङ्गितायां पुनरायतास्यामाशास्महे विग्रहयोरभेदम् ॥६१॥

या अहना अदर्शने भर्तुः अनालोकने दर्शनमात्रकामा दर्शनमात्रे कदापि दर्शनमपि भवतीति कामोऽभिलाषो यस्याः सा तथा । पुनः दृष्टौ सत्यां भर्तृदर्शने सति परिष्वङ्गरसैकलोला । आलिङ्गनरसार्थैकचपला भवति । कदालिङ्गनं भविष्यतीति महाचापल्यं भवतीत्यर्थः । पुनस्तस्यां आयतास्यां दीर्घलोचनायां आलिङ्गितायां आलिङ्गितायां सत्यां विग्रहयोः शरीरयोः अभेदं एक्यं आशास्महे अभिवाञ्छामः । कदापि भेदो मा भूदिति वाञ्छाम इत्यर्थः ॥ ६१ ॥

उरसि निपतितानां श्रस्तधम्मिल्लकानां
मुकुलितनयनानां किंचिदुन्मीलितानाम् ।
सुरतजनितखेदस्विन्नगण्डस्थलानां-
मधरमधु वधूनां भाग्यवन्तः पिबन्ति ॥ ६२ ॥

[ १ अ. °खेदं खिन्न. रा. मू खेदखिन्न. टी. खिन्न इति च. २ अ. °नां मधुरमधु. ]

भाग्यवन्तः कृतसुकृताः पुरुषाः वधूनां अङ्गनानां अधरमधु ओष्ठामृतं पिबन्ति पाययन्ति । किंलक्षणानाम् । उपरि उरसि निपतितानां निःसहत्वात् उरसि श्लिष्टानाम् । पुनः किंलक्षणानाम् । श्रस्तधम्मिल्लकानां श्रस्तः मुक्तबन्धः धम्मिल्लः केशकलापः यासां ताः तास्तथा तासाम् । पुनः किंलक्षणानाम् । मुकुलितनयनानां मुकुलिते जागरवशात् सुखानुभवाद्वा किंचित् मीलिते नयने नेत्रे यासां तास्तथा तासाम् । पुनः किं० । किंचिदुन्मीलितानां सुरताभिनिवेशेन किंचित् जागरितानाम् । पुनः किं० सुरतजनितखेदस्विन्नगण्डस्थलानां सुरतेन शोभनेन रतेन संभोगेन जनित उत्पादितो यः खेदः श्रमः तेन स्विन्नानि स्वेदवन्ति गण्डस्थलानि कपोलमण्डलानि यासां तास्तथा तासाम् ॥ ६२ ॥

किं गतेन यदि सा न जीवति प्राणिति प्रियतमा तथापि किम् ।
इत्युदीक्ष्य नवमेघमालिकां न प्रयाति पथिकः स्वमन्दिरम् ॥६३॥

पथिकः पान्थः नवमेघमालिकां नूतनजलदश्रेणिं उदीक्ष्य दृष्ट्वा इति कारणात् स्वं मन्दिरं स्वं गृहं न प्रयाति न गच्छति । इतीति किम् । यदि सा प्रियतमा दयिता न जीवति न प्राणान्धारयति तर्हि गतेन गृहं प्रति गमनेन किं (क) उपयोगः । अवश्यं सा मेघमालां दृष्ट्वा मद्विरहेण मृता भविष्यतीत्यर्थः । यदि च प्रियतमा प्राणिति जीवति तथापि किं गतेन क उपयोग इत्यर्थः । मेघमालां दृष्ट्वा मद्विरहेणापि जीवन्त्याः किंप्रेमत्वाच्च गन्तव्यं मयेति भावः ॥ ६३ ॥

प्राक्प्राप्तेति मनोरथागतगुणं जाताभिलाषं ततः
सव्रीडं तदनु श्लथीकृततनु प्रत्यस्तधैर्यं ततः ।
प्रेमार्द्रस्पृहणीयनिर्भररसक्रीडाप्रगल्भं ततो
निःसङ्गाङ्गविकर्षणाधिकसुखं रम्यं कुलस्त्रीरतम् ॥६४॥

पुरुषस्य कुलस्त्रीरतं सत्कुलोत्पन्नाङ्गना.याः सुरतं रम्यं रमणीयं भवेत् । किंलक्षणं कुलस्त्रीरतम् । प्राक् पूर्वं प्राप्ता आयाता इति मनोरथागतगुणं मनोरथेनाभिलाषेण आगतः

प्राप्तः गुणः दर्शनहर्षहासादिः यस्य तत्तथा। पुनः किंलक्षणम्। ततः अनन्तरं जाताभिलाषं जातः अभिलाषो मनोरथो देहसंसर्गे यस्य तत्तथा। पुनः किं०। ततः सव्रीडं सलज्जं तदनु पश्चात्। श्लथीकृततनु श्लथीकृता आर्जवेण प्रेमातिशयेन च शिथिलीकृता तनुर्देहो यत्र तत्तथा। पुनः किंलक्षणं रतम्। ततः प्रत्यस्तधैर्यं प्रत्यस्तं त्यक्तं धैर्यं धीरत्वं यस्मिन् तत्तथा। अर्थात् युवत्याम्। पुनः किं०। प्रेमार्द्रस्पृहणीयनिर्भररसक्रीडाप्रगल्भं प्रेम्णा स्नेहेन आर्द्रः युक्तः स्पृहणीयो वाञ्छनीयो यो निर्भरः अतिशयवान् रसः शृङ्गारः तस्य तेन वा क्रीडा रमणं तेन प्रगल्भं अतिमहत् वर्णनीयम्। पुनः किंलक्षणम्। ततः पश्चात् निःसङ्गाङ्गविकर्षणाधिकसुखं निःसङ्गं निःसंबन्धं यथा भवति तथा अङ्गानां हृदयपृष्ठि(ष्ठी)जघनानां विकर्षणं आकर्षणं तेन अधिकं सातिशयं सुखं यस्मिंस्तत्तथा। एतेनान्यनारीभ्यः कुलाङ्गनायाः रतं सुखातिशयप्रदमित्यर्थः॥ ६४॥

तावदेवामृतमयी यावल्लोचनगोचरा।
चक्षुःपथादपेता तु विषादप्यतिरिच्यते॥ ६५॥

सा कामिनी तावदेव तावत्कालपर्यन्तं अमृतमयी। तावत् कियत्। यावत् लोचनगोचरा लोचनयोः नेत्रयोः गोचरो विषयो यस्याः सा तथा। नेत्रदृश्येत्यर्थः। तु पुनः सा चक्षुःपथात् नेत्रमार्गात् अपेता अपसृता सती विषादपि कालकूटादपि अतिरिच्यते। अतिरिक्ता अधिका भवति। विरहेण प्राणान् हरतीत्यर्थः॥ ६५॥

न गम्यो मन्त्राणां न च भवति भैषज्यविषयो
न चापि प्रध्वंसं व्रजति विविधैः शान्तिकशतैः।
भ्रमावेशादङ्गे किमपि विदधद्भङ्गमसमं
स्मरापस्मारोऽयं भ्रमयति दृशौ घूर्णयति च॥ ६६॥

[१ अ. 'दृशं']

अयं स्मरापस्मारः। स्मर एव काम एव अपस्मारः महादुर्व्याधिः भ्रमयति चालयति च। अन्यत्। दृशौ दृष्टी नयने घूर्णयति घूर्णायमाने करोतीत्यर्थः। अथ कामस्यापस्मारस्य तुल्यानि विशेषणानि। किंलक्षणः स्मरापस्मारः। यः मन्त्राणां वेदपुराणोक्तानां न गम्यः न प्राप्यः। यो मन्त्रैर्न जीयत इत्यर्थः। अपस्मारोऽपि मन्त्रैरनपसारणीयः। पुनः अयं कः यः भैषज्यविषयः। भैषज्यानां औषधानां विषयो गोचरो यस्मिन्स तथा न भवति। औषधैर्न नाशं नीयत इत्यर्थः। अपस्मारोऽपि दुश्चिकित्सत्वादौषधैः न नश्यतीत्यर्थः। च अन्यत्। यः विविधैः नानाप्रकारैः शान्तिकशतैः वेदविहितैः शान्तिकर्मसहस्रैः प्रध्वंसं नाशं न व्रजति न प्राप्नोति। अपस्मारोऽपि शान्तिककर्मभिः न (न)श्यति। किं कुर्वन् भ्रमावेशात् भ्रमस्य भ्रान्तेः आवेशात् आरोपणात्। भ्रान्तिजनकत्वादित्यर्थः। अङ्गे शरीरे किमपि अनिर्वचनीयं खेदं विदधाति। भ्रमयति भ्रमं स्वभावाच्चालयति दृशौ घूर्णयति च॥ ६६॥

नूनमाज्ञाकरस्तस्याः सुभ्रुवो मकरध्वजः।
यतस्तन्नेत्रसंचारसूचितेषु प्रवर्तते ॥ ६७ ॥

नूनं निश्चितं मकरध्वजः कामः तस्याः सुभ्रुवोऽङ्गनायाः आज्ञाकरः आज्ञां आदेशं करोतीति तथा वर्तते। वशवर्तीत्यर्थः। यतः कारणात् स कामः तन्नेत्रसंचारसूचितेषु तस्याः कामिन्याः नेत्रयोः नयनयोः संचारः प्रसारणं तेन सूचितेषु कथितेषु ज्ञापितेषु। तथा दृष्टेष्वित्यर्थः। पुरुषेषु प्रवर्तते। आज्ञाकरः सेवकोऽपि प्रभोर्नेत्रसंचारज्ञापितेषु वृत्त्याय प्रवर्तते ॥ ६७ ॥

सति प्रदीपे सत्यग्नौ सत्सु तारामणीन्दुषु।
विना मे मृगशावाक्ष्या तमोभूतमिदं जगत् ॥ ६८ ॥

इदं जगत् विश्वं मे मम मृगशावाक्ष्या मृगशावस्येव अक्षिणी यस्याः सा मृगशावाक्षी। तया मृगनयनया विना ह(स्व)ते तमोभूतं अन्धकाररूपं जातं वर्तते। क सति प्रदीपे श्रीसूर्ये सति। तथा अग्नौ वैश्वानरे दीप्यमाने सति पुनः केषु सत्सु तारामणीन्दुषु। तारकारत्नचन्द्रेषु सत्सु दीप्यमानेष्वपि आनन्दहेतुषु सत्सु कामिनीं विना संसारो दुःखरूप इत्यर्थः ॥ ६८ ॥

मुखेन चन्द्रकान्तेन महानीलैः शिरोरुहैः।
ओष्ठाभ्यां विद्रुमाभाभ्यां रेजे रत्नमयीव सा ॥ ६९ ॥

[१ रा. टी. 'पद्मरागाभ्यां' अ. 'विद्रुमाभ्यां च']

सा पाठा रत्नमयीव मणिमयीव मणिभिः निर्मितेवेत्यर्थः। रेजे। किंभूता मुखेन वदनेन उपलक्षिता। किंलक्षणेन मुखेन चन्द्रकान्तेन चन्द्रवत् कान्तं मनोहरं तेन। मणिरपि चन्द्रकान्तः। पुनः किंलक्षणा। शिरोरुहैः केशैः उपलक्षिता। किंलक्षणैः महानीलैः। अतिकृष्णवर्णैः। मणयोऽपि महानीलाः। पुनः किंलक्षणा। ओष्ठाभ्यां अधराभ्यां उपलक्षिता। किंभूताभ्याम्। पद्मरागाभ्यां पद्मवत् रागो रक्तिमा यपोस्तौ ताभ्याम्। पद्मरागो मणिः ॥ ६९ ॥

गुरुणा स्तनभारेण मुखचन्द्रेण भास्वता।
शनैश्चराभ्यां पादाभ्यां रेजे ग्रहमयीव सा ॥ ७० ॥

सा पाठा ग्रहमयीव सर्वग्रहरूपेव रेजे। किंलक्षणा स्तनभारेण कुचभारेण उपलक्षिता। किंलक्षणेन गुरुणा महता। गुरुशब्देन बृहस्पतिर्ग्रह उच्यते। पुनः किंलक्षणा। मुखचन्द्रेण वदनमेवेन्दुस्तेन उपलक्षिता। किंलक्षणेन मुखचन्द्रेण भास्वता यभस्ति, शोभते इति भास्वान् तेन शोभमानेनेत्यर्थः। चन्द्रोऽपि ग्रहः तथा भास्वान् श्रीसूर्योऽपि ग्रहः।

पुनः क्लिष्टलक्षणा सा । पादाभ्यां चरणाभ्यां उपलक्षिता : क्लिष्टलक्षणाभ्यां पादाभ्यां शनैश्चराभ्यां शनैः लीलामात्रत्वात् मन्दं यथा भवति तथा चरतः गच्छतस्तो शनैश्चरौ साभ्याय् । शनैश्चरोऽपि ग्रहः ॥ ७० ॥

असितात्मा सुसंनद्धः समाविष्कृतचापलः ।
भुजंगकुटिलस्तस्या भ्रूविक्षेपः खलायते ॥ ७१ ॥

[१ अ. °विःकृत°]

तस्या अङ्गनायाः भ्रूविक्षेपः भ्रुवोः विक्षेपः विक्षेपणम् । भ्रूविलास इत्यर्थः । खलायते । खल इव दुर्जन इव आचरतीति खलायते दुर्जनायते । क्लिष्टलक्षणः भ्रूविक्षेपः । असितात्मा असितः कृष्णः आत्मा स्वरूपं यस्य स तथा । खलोऽपि असितात्मा पापात्मा । पुनः कि० सुसंनद्धः । सुतरां अतिशयेन संनद्धः वशे रक्षितः । खलोऽपि सुसंनद्धः उच्चुखलः । पुनः क्लिष्टलक्षणः । समाविष्कृतचापलः । समाविष्कृतं सम्यक्प्रकारेण आविष्कृतं प्रकटीकृतं चापलं चपलत्वं यस्य स तथा । खलोऽपि समाविष्कृतचापलो भवति । पुनः कि० । भुजंगवत् सर्पवत् कुटिलो वक्रः । दुर्जनोऽपि सर्पवद्वातक्रः कुटिलो जिह्मश्च भवति ॥ ७१ ॥

मुग्धे धानुष्कता केयमपूर्वा तव दृश्यते ।
यया विध्यसि चेतांसि गुणैरेव न सायकैः ॥ ७२ ॥

[ १ अ. °ग्नता. २ रा. टी. 'त्वयि. ' ३ अ. °यथा°]

हे मुग्धे हे सुन्दरि त्वयि विषये का इयं प्रत्यक्षता धानुष्कता धनुर्धरता विद्यते दृश्यते वा । एवंविधः कश्चिद्धनुर्धरो नास्तीत्यर्थः । यया धानुष्कतया गुणैरेव सौन्दर्यचातुर्यसौजन्यमाधुर्यसौगन्ध्यादिभिरेव चेतांसि मनांसि विध्यसि ताडयसि न सायकैः न बाणैः । यो हि धानुष्को भवति स सायकैर्बाणैः कृत्वा स्थूलवेध्यं विध्यति नयु गुणैः न मौर्वीभिः । अस्य वैपरीत्ये तव महती धानुष्कतास्तीत्यर्थः ॥ ७२ ॥

एको रागिषु राजते प्रियतमादेहार्धहारी हरो
नीरागेषु जिनो विमुक्तललनासङ्गो न यस्मात्परः ।
दुर्वारस्मरबाणपन्नगविषव्यासङ्गमुग्धो जनः
शेषः कामविडम्बितो हि विषयान्भोक्तुं न मोक्तुं क्षमः ॥७३॥

रागिषु विषयेषु विषये । एको हरः श्रीमहादेवः राजते शोभते । सर्वोत्कर्षेण वर्तते इत्यर्थः । क्लिष्टलक्षणो हरः । प्रियतमादेहार्धहारी । प्रियतमाया: अतिप्रियायाः पार्वत्याः देहस्य शरीरस्य अर्धं हरति इति तथा । तथा नीरागेषु गतरागेषु पुरुषेषु विषये । जिनः अर्हद्देवः राजते । एको जिन एव वीतरागादिदोषेषु श्रेष्ठ इत्यर्थः । यस्मात् जिनात्परः अन्यः कोऽपि

विमुक्तललनासङ्गो न । विमुक्तस्त्यक्तः ललनायाः कामिन्याः सङ्गः संयोगो येन स तथा न विद्यते । तथाविधः कोऽपि जितकामो नास्तीत्यर्थः । शेषो जनः ताभ्यां श्रीमहादेवजिनाभ्यां अन्यो लोकः । विषयान्स्रक्चन्दनवनितादीन् भोक्तुं अनुभवितुं तथा मोक्तुं त्यक्तुं न क्षमः न समर्थः । किंलक्षणः । कामविडम्बितः कामेन कन्दर्पेण विडम्बितः पराभूतः कामाकुलितः । पुनः किंलक्षणः । दुर्वारस्मरबाणपन्नगविषव्यासङ्गमुग्धः । हि निश्चितं दुर्वाराः अवारणीयाः ये स्मरबाणाः कामशराः त एव पन्नगाः सर्पाः तेषां विषं संसर्गजनितोपद्रवः तस्य व्यासङ्गः संपर्कः तेन मुग्धो जडः । अविवेकीत्यर्थः । विषव्यासङ्गवान् हि जनः न किंचिज्जानातीत्यर्थः ॥ ७३ ॥

इदमनुचितमक्रमश्च पुंसां यदिह जरास्वपि मान्मथा विकाराः ।
इदमपि न कृतं नितम्बिनीनां स्तनपतनावधि जीवितं रतं वा ॥७४॥

[*पञ्चाननं परिभवत्युदरेण वेणी
दण्डेन पन्नगकुलं शशिनं मुखेन ।
या सा जगत्त्रयजयप्रथिता नताङ्गी
बुद्ध्या कया बत बुधैरबला बभाषे ।]

[*अयं श्लोकः अ. कोश एव दृश्यते]

इदं एतत् अनुचितं अयोग्यम् । च अन्यत् अक्रमः अनुक्रमोऽपि न भवति । इदं किं यत् इह जगति । पुंसां पुरुषाणां जरासु अपि सतीषु वार्धकेषु सत्सु मान्मथाः कामसंबन्धिनो(नः) कामजाता इत्यर्थः । विकाराः विक्रियाः विकलत्वाद्या भवन्ति । च अन्यत् इदमपि एतदपि न विहितं विधिनेति शेषः । इदमपि किं । यत् नितम्बिनीनां प्रशस्तनितम्बानां कामिनीनां जीवितं प्राणधारणं वा अथ वा रतं सुरतं स्तनपतनावधि स्तनयोः पतनं शैथिल्यं अवधिर्मर्यादा यस्य तत् तथा न कृतं स्तनकाठिन्यं यावत्तावन्न कृतं । तदप्ययुक्तमित्यर्थः ॥ ७४ ॥

व्यादीर्घेण चलेन वक्रगतिना तेजस्विना भोगिना
नीलाब्जद्युतिनाहिना वरमहं दष्टो न तच्चक्षुषा ।
दष्टे सन्ति चिकित्सका दिशि दिशि प्रायेण धर्मार्थिनो
मुग्धाक्षीक्षणवीक्षितस्य न हि मे वैद्यो न चाप्यौषधम् ॥७५॥

[१ रा. मू. चिकित्सका इत्येतत् चिकित्सिका इति शोधितम्]

अहं अहिना सर्पेण दष्टः भक्षितः वरं श्रेष्ठं मनाक्प्रियं वा । परं तच्चक्षुषा तस्याः कामिन्याश्चक्षुः नेत्रं तेन दष्टो भक्षितः कटाक्षेण दृष्ट इत्यर्थः । न वरं तेन दष्टस्य कदापि

पुरुषत्वाभावादित्यर्थः। उभयोर्विशेषणान्याह। क्लिष्टक्षणेन। अहिना तच्चक्षुषा च। व्याधीनेन विशेषेण आदीपेन अतिप्रलम्बिना। चक्षुरपि दीर्घं। पुनः क्लिष्टक्षणेन चञ्चलेन चञ्चलेन। चक्षुरपि चलं। पुनः क्लि०। वक्रगतिना वक्रा कुटिला गतिर्गमनं यस्य स तथा तेन। चक्षुरपि विलासित्वाद्वक्रगति। पुनः क्लिष्टक्षणेन तेजस्विना दीप्तिमता। चक्षुरपि तेजस्वि। पुनः क्लिष्टक्षणेन। भोगिना भोगः महान् देहो विद्यते यस्य स तथा तेन। चक्षुरपि भोगि नित्यविलासि। पुनः क्लिष्टक्षणेन। नीलाब्जद्युतिना नीलाब्जस्य इन्दीवरस्येव द्युतिः कान्तिर्यस्य स तथा तेन। चक्षुरपि इन्दीवरद्युति। यतः अहिना दष्टे सति प्रायेण बाहुल्येन दिशि दिशि सर्वासु दिक्षु धर्मार्थिनः पुण्यप्रयोजनाः चिकित्सकाः प्रतीकारकर्तारः सन्ति। हि निश्चितम्। मृगधाक्षीक्षणवीक्षितस्य मृगधाक्ष्याः सुन्दरनयनायाः ईक्षणं नेत्रं तेन वीक्षितस्य दृष्टस्य मे मम वैद्यो भिषक् न अस्ति। च अन्यत् औषधं भेषजं च नास्ति॥ ७५॥

विरहोऽपि संगमः खलु परस्परं संगतं मनो येषाम्।
अतिविघटितं हि हृदयं संगमेऽपि विरहं विशेषयति॥ ७६॥

खलु निश्चितम्। तेषां पुरुषाणां विरहोऽपि वियोगोऽपि संगमः संयोग एव भवति। ते पुरुषाः विरहेऽपि सति संगमवन्त इव भवन्तीत्यर्थः। तेषां केषां येषां मनः चित्तं परस्परं संगतं अन्योन्यासक्तं भवति। हि निश्चितम्। येषां एवंविधं अतिविघटितं अतिविश्लिष्टं अप्रीतिमदित्यर्थः। तत् हृदयं संगमेऽपि संयोगेऽपि सति। विरहं वियोगं विशेषयति विशेषयन्तं करोति तेषां संगमोऽपि विरह इत्यर्थः॥ ७६॥

संगमविरहविवर्के वरमिह विरहो न संगमस्तस्याः।
संगम एका भवती विरहे जगन्ति त्वन्मयानि स्युः॥ ७७॥

संगमविरहविवर्के। संगमश्च विरहश्च संगमविरहौ तयोः संबन्धिनि विवर्के विचारे सति क्रियमाणे सति तस्याः कामिन्याः विरहः श्रेष्ठः संगमः श्रेष्ठो वा इति विचारे क्रियमाणे इत्यर्थः। विरहः वियोग एव वरं न तु संगमः न संयोगः वरं श्रेष्ठः। यतः संगमे सति भवती त्वं एका एकैव। ज्ञायसे इति शेषः। विरहे त्वन्मयानि त्वद्रूपाणीव जगन्ति भुवनानि स्युः भवन्ति॥ ७७॥

अपसर सखे दूरादस्मात्कटाक्षविषानला-
त्प्रकृतिविषमाद्योषित्सर्पाद्विलासफणाभृतः।
इतरफणिना दष्टः शक्यश्चिकित्सितुमौषधै-
श्चटुलपनिताभोगिग्रस्तं त्यजन्ति हि मन्त्रिणः॥७८॥

सन्ते हे मित्र अस्मात् प्रसिद्धात् योषित्सर्पात् योषिदेव सर्पस्तस्मात् स्त्रीरूपभुजगात् दूरात् अपसर अपयाहि । किंभूतात् कटाक्षविषानलात् कटाक्षा एव वक्रनिरीक्षणान्येव विषानलः विषाग्निर्यस्य स तथा तस्मात् । पुनः किंभूतात् प्रकृतिविषमात् प्रकृत्या स्वभावेन विषमः कठिनः तस्मात् स्वभावक्रूरात् सर्पोऽपि विषानलवान् भवति। प्रकृत्या विषमश्च भवति पुनः किंभूतात् विलासफणाभृतः । विलासः लीला एव फणां फटां बिभर्तीति विलासफणाभृत् तस्मात् विलासफटाधारिणः । सर्पोऽपि फणां बिभर्ति । पुनः इतरफणिना दष्टः अन्यसर्पेण भक्षितः औषधैः मंत्रैः चिकित्सितुं परिचरितुं स्फेटयितुं शक्यः शक्यते । औषधैर्नीरुजो भवतीत्यर्थः । हि निश्चितम् । चटुलवनिताभोगिग्रस्तं चटुला चपला या वनिता अङ्गना सा एव भोगी सर्पः तेन ग्रस्तं भक्षितं आकृष्टचेतसमित्यर्थः । मन्त्रिणः मन्त्रज्ञा अपि त्यजन्ति । न संगृह्णन्ति । मन्त्रिभिरपि स नैरुज्याय न शक्यते इत्यर्थः ॥ ७८ ॥

तस्याः स्तनौ यदि घनौ जघनं च हारि
वक्त्रं च चारु तव चित्त किमाकुलत्वम् ।
पुण्यं कुरुष्व यदि तेषु तवास्ति वाञ्छा
पुण्यैर्विना न हि भवन्ति समीहितार्थाः ॥ ७९ ॥

हे चित्त हे मनः तस्याः कामिन्याः स्तनौ कुचौ यदि घनौ कठिनौ वर्तेते । च अन्यत् वक्त्रं वदनं चारु मनोहरं वर्तते । तर्हि तव आकुलत्वं विह्वलत्वं किं कथमित्यर्थः । यदि चेत्तेषु स्तनजघनवदनेषु तत्प्राप्तये इत्यर्थः । तव वाञ्छा अभिलाषोऽस्ति । तर्हि पुण्यं सुकृतं कुरुष्व विधेहि । यतः कारणात् पुण्यैः सुकृतैर्विना समीहितार्थाः समीहिताश्च ते अर्थाश्च समीहितार्थाः वाञ्छिता अर्थाः पदार्था न भवन्ति ॥ ७९ ॥

पान्थस्त्रीविरहानलद्युतिकलामातन्वती मञ्जरी
माकन्देषु पिकाङ्गनाभिरधुना सोत्कण्ठमालिङ्ग्यते ।
अप्येते नवपाटलापरिमलप्राग्भारपाटच्चरा
वान्ति क्लान्तिवितानतानवकृतः श्रीखण्डशैलानिलाः ॥८०॥

अधुना इदानीं पिकाङ्गनाभिः कोकिलस्त्रीभिः माकन्देषु सहकारवृक्षेषु मञ्जरी कुसुमजालं आलिङ्ग्यते आश्लिष्यते आलोक्यते वा पाठः दृश्यते । कथं यथा भवति सोत्कण्ठं साभिलाषं यथा स्यात्तथा । किंलक्षणा मञ्जरी । पान्थस्त्रीविरहानलद्युतिकलां आतन्वती । पान्थानां पथिकानां स्त्रियः तासां विरहानलः वियोगाग्निः तस्य द्युतिर्दीप्तिः तस्याः कलां साहश्यं । ( अत्र ग्रन्थः त्रुटितः दृश्यते ) दधती विस्तारयन्तीत्यर्थः । तथा एते श्रीखण्डशैलानिलाः मलयाचलवायवः अपि वान्ति प्रसरन्ति ।

किंलक्षणाः नवपाटलापरिमलप्राग्भारपाटच्चराः । पाटल्याः पुष्पाणि पाटलाः नवाः प्रत्यग्राश्च ताः पाटलश्च तासां परिमलो गन्धः तस्य प्राग्भारोऽतिशयः समूहो वा तस्य पाटच्चराः । चौराः । परिमलं हरन्त इत्यर्थः । पुनः किंलक्षणाः । क्लान्तिवितानतानवकृतः । क्लान्तेः श्रमस्य वितानं समूहः तस्य तानवं कृशत्वं तनूकरणं तत्कुर्वन्तीति तथोक्ताः ॥ ८० ॥

इतो विंशुद्दृष्टीविलसितमितः केतकतरुः
स्फुरद्गन्धः प्रोद्यज्जलदनिनदस्फूर्जितमितः ।
इतः केकिक्रीडाकलकलरवः पक्ष्मलदृशां
कथं यास्यन्त्येते विरहदिवसाः संभृतरसाः ॥ ८१ ॥

[१ अ. °विद्युल्लक्ष्मी°. २ रा. टी. °तरोः ]

पक्ष्मलदृशां पक्ष्मले पक्ष्मवत्यौ दृशौ यासां तासां सुनयनानां एते वार्षिकाः प्रसिद्धाः विरहदिवसाः वियोगवासराः कथं यास्यन्ति । ताभिर्विरहदिवसाः कथं निर्गमिष्यन्ते इत्यर्थः । किंलक्षणाः दिवसाः संभृतरसाः संभृतः पुष्टो वृद्धिं गतः रसो रागो येषु ते तथोक्ताः । तदेवाह यतः कारणात् इतः एकस्मिन्प्रदेशे विद्युद्दृष्टीविलसितं विद्युदेव क्षणप्रभेव यष्टी सता क्षणं स्फुरत्त्वात् तस्याः विलसितं स्फुरणं वर्तते । तथा इत एकस्मिन्प्रदेशे केतकतरुः स्फुरद्गन्धः वर्तते । केतकतरोः केतक्याः स्फुरन् प्रसरन् चासौ गन्ध आमोदश्च । तथा इत एकस्मिन्प्रदेशे प्रोद्यज्जलदनिनदस्फूर्जितं प्रोद्यंश्च उन्नच्छंश्चासौ जलदो मेघश्च तस्य निनदः शब्दः तस्य स्फूर्जितं वृद्धिश्च वर्तते । तथा इत एकस्मिन् प्रदेशे केकिक्रीडाकलकलरवः । केकिनां मयूराणां क्रीडा रमणं तस्य कलकलः कोलाहलो वर्तते । इत्थं संभृतरसत्वं दिवसानामित्यर्थः ॥ ८१ ॥

इमे तारुण्यश्रीनवपरिमलाः प्रौढसुरत-
प्रतापप्रारम्भाः स्मरविजयदानप्रतिभुवः ।
चिरं चेतश्चौरा अभिनवविकारैकगुरवो
विलासव्यापाराः किमपि विजयन्ते मृगदृशाम् ॥८२॥

मृगदृशां हरिणनयनानां अङ्गनानां इमे विलासव्यापाराः विलासानां लीलानां व्यापाराः करणानि । किमपि अनिर्वचनीयं यथा स्यात्तथा विजयन्ते उत्कर्षेण वर्तन्ते । किंलक्षणाः विलासव्यापाराः । तारुण्यश्रीनवपरिमलाः तारुण्यस्य यौवनस्य श्रीः समृद्धिः तस्याः परिमलाः आमोदाः । ज्ञापका इत्यर्थः । यथा आमोदेन तरुलतादिवस्तु ज्ञायते तथा विलासैर्यौवनं ज्ञाप्यते इत्यर्थः । पुनः किंलक्षणाः । प्रौढसुरतप्रतापप्रारम्भाः प्रौढं महत् च तत् सुरतं संभोगश्च तदेव प्रतापः दिवसः तस्य प्रारम्भाः आदिभूताः । यथा प्रारम्भेण प्रभातकालेन दिवसो ज्ञायते । तथा विलासव्यापारैः प्रौढसुरतमित्यर्थः । पुनः किंलक्षणाः विलासव्यापाराः । स्मरविजयदानप्रतिभुवः स्मरस्य कन्दर्पस्य विजयदाने जयदर्शने प्रतिभुवः

लम्भकाः जमान इति लोकप्रसिद्धं यथा प्रतिभुवः प्रतिश्रुतं वस्तु दापयन्ति तथा विलासव्यापाराः कामस्य जयमित्यर्थः। पुनः किंलक्षणाः विलासव्यापाराः। चिरं बहुकालं चेतश्चौराः चेतसः मनसः चौराः स्तेनाः। यथा स्तेना वस्तु मुष्णन्ति तथा विलासव्यापाराश्चेत इत्यर्थः। पुनः किंलक्षणाः। अभिनवविकारैकगुरवः अभिनवः प्रत्यग्रो यो विकारः कामजा विक्रिया उन्मादाः स्खलद्वाणीत्वाद्याः तेषां एके मुख्या गुरवः उपदेष्टारः शिक्षका इत्यर्थः। यथा गुरवः शिष्यं शिक्षयन्ति तथा विलासव्यापाराः उन्मादा विकारान् शिक्षयन्तीति भावः॥ ८२॥

आवासः किलकिंचितस्य दयिता पार्श्वे विलासालसा
कर्णे कोकिलकामिनीकलरवः स्मेरो लतामण्डपः।
गोष्ठी सत्कविभिः समं कतिपयैर्मुग्धाः सुधांशोः कराः
केषां चित्सुखयन्ति चात्र हृदयं चैत्रे विचित्राः स्रजः॥ ८३॥

अत्र मधौ ऋतौ चैत्रे मासे एते पदार्थाः केषां चिद् हृदयं चित्तं सुखयन्ति सुखवत्करोति। एते के पार्श्वे निकटे दयिता स्त्री। किंलक्षणा दयिता। किलकिंचितस्य आवासः मन्दिरम्। स्मितकवितमुदितानां शं(सं)करः किलकिंचितमुच्यते। किलकिंचितस्य विलासविशेषस्य गृहं, यत्र ते भवन्तीत्यर्थः। पुनः किंलक्षणा दयिता विलासालसा। विलासेन क्रीडया अलसा मन्थरा। पुनः के। कर्णे श्रवणे। कोकिलकामिनीकलरवः कोकिलस्य पिकस्य कामिनी कोकिला तस्याः कलरवः कोलाहलः भवेत्। तथा स्मेरो विकसितलतामण्डपः लतानां वासन्तीलतीभूतानां मण्डपः जनाश्रयः। तथा सत्कविभिः समं निपुणैर्विद्वद्भिः समं गोष्ठी वार्तानुवादः। किंलक्षणैः। कतिपयैः कतिसंख्याकैः। तथा मुग्धा मनोहराः सुधांशोश्चन्द्रमसः कराः रश्मयः तथा विचित्राः नानारूपवर्णाः स्रजो मालाः। एते पदार्थाः केषांचित्पुण्यवतां चेतः सुखयन्ति आह्लादयन्ति सप्तधातुकत्वेन महाह्लादकरणादिति भावः॥ ८३॥

सुधाशुभ्रं धाम स्फुरदमलरश्मिः शशधरः
प्रियावक्त्राम्भोजं मलयजरसश्चारुमुरभिः।
स्रजो हृद्यामोदास्तदिदमखिलं रागिणि जने
करोत्यन्तः क्षोभं न तु विषयसंसर्गविमुखे॥ ८४॥

[१ अ. °पुनः संसर्ग° (छन्दो विरुद्धः)]

तत् इदं अखिलं सर्वं रागिणि रागवति जने अन्तः क्षोभं चित्तौत्कण्ठ्यं करोति। तु पुनः विषयसंसर्गविमुखे। विषयाणां स्त्रगादीनां संसर्गः संबन्धः तस्माद्विमुखो निःस्पृहः

तस्मिन्नभे अन्तः क्षोभं न करोति । तत्किम् सुधाशुभ्रं सुधा( ध )या श्वेतमुषा शुभ्रं उज्ज्वलं धाम गृहमन्तः क्षोभं करोति । तथा शशधरश्चन्द्रमाः अन्तः क्षोभं करोति । किंलक्षणः शशधरः । स्फुरद्न( म )रश्मिः स्फुरन्तो दीप्यन्तः अमला निर्मला रश्मयः किरणा यस्य स तथोक्तः । तथा प्रियावक्त्राम्भोजं कान्तामुखकमलं चान्तः क्षोभं करोति । तथा मलयजरसः तथा । मलयजस्य चन्दनस्य रसः । किंलक्षणः चारुसुरभिः चारुश्वासौ सुरभिश्च स तथा पुनः किं मनो हरन्ति । स्रजो मालाः मनो हरन्ति । किंलक्षणाः सुधामोदाः सुधो मनोहर आमोदो(दः) परिमळो यासां तास्तथा ॥ ८४ ॥

आवासः क्रियतां गाङ्गे पापवारिणि वारिणि ।
स्तनद्वये तरुण्या वा मनोहारिणि हारिणि ॥ ८५ ॥

गाङ्गे गा(ग)ङ्गाया: इदं गाङ्गं तस्मिञ्जाह्नवीये वारिणि उदके आवासः क्रियतां । पुंवैरिति शेषः । किंलक्षणे गाङ्गे वारिणि । पापं पातकं वारयतीति निषेधयतीति पापवारि तस्मिन् । दुरितनिषेधके पापहारकावधिभूते इत्यर्थः । वा अथवा तरुण्याः कामिन्याः स्तनद्वये कुचयुग्मे आवासः क्रियताम् । किंलक्षणे स्तनद्वये मनोहारिणि दर्शनस्पर्शनाद्विर्भिर्मनो हरतीति मनोहारि तस्मिन् । पुनः किंलक्षणे हारिणि । हार एकावल्यादिर्विद्यते यस्मिंस्तत् हारि । तस्मिन् परमसुखदायकावधिभूते इत्यर्थः ॥ ८५ ॥

असूची संचारे तमसि नभसि प्रौढजलद-
ध्वनिप्रोच्छन्मध्ये पतति पृषतानां च निचये ।
इदं सौदामिन्याः कनककमनीयं विलसितं
मुदं च म्लानिं च प्रथयतितरां स्वैरसुहृशाम् ॥ ८६ ॥

[१ रा. मू. संसारे]

इदमतिप्रसिद्धं सौदामिन्याः विद्युतः विलसितं स्फुरणं स्वैरं सुदृशां इच्छाविहारिणीनां व्यभिचारिणीनां स्त्रीणां मुदं हर्षं प्रथयतितरां वर्धयतितराम् । अतिशयेन उत्साहं वर्धयतीत्यर्थः । मार्गप्रकाशकत्वादिति भावः । च अन्यत् म्लानिं च खेदं च अतिशयेन प्रथयति । विद्युतोऽन्तर्घनेऽन्धकारस्य दृष्टेरतिशयेनावरकत्वादिति भावः । किंलक्षणं सौदामिन्याः विलसितं । कनककमनीयं । कनकवत् सुवर्णवत् कमनीयं मनोहरं पिञ्जरमित्यर्थः । दीपिकातुल्यस्फुरणमिति भावः । क्व सति तमसि अन्धकारे असूचीसंचारे । न सूच्याः लोहशलाकायाः संचारः स्फुरणं यस्मिन् तत्तथा तस्मिन् । 'अन्धकारे सूच्या अप्रवेशः' इति लोकोक्तिः । अन्धकारे सान्द्रे सतीत्यर्थः । पुनः क्व सति । नभसि आकाशे प्रौढजलदध्वनिप्रोच्छन्मध्ये प्रौढः प्रसिद्धश्चासौ यो जलध्वनिः मेघशब्दः तेन प्रोच्छन् भृतः मध्योऽन्तरभागो यस्य तत्तथा ।

स्मिन् सति अतिगंभीरमेघध्वनिव्याप्तमध्ये सतीत्यर्थः। यथा मेघो गम्भीरं गर्जतीति भावः। च पुनः पृषतानां अम्बुकणानां निचये समूहे पतति सति मन्दं मन्दं जघरे गर्जति वर्षति चेत्यर्थः। तदा तासां सुखातिशयादिभावादित्यर्थः। तथा चोक्तं 'स्वाधीने पररमणे धुःसंचारासु गगनवीथीषु। पत्युर्विदेशगमने परमसुखं चपलजघनानाः' ॥ १ ॥ इति ॥ ८६ ॥

केशाः संयमिनः श्रुतेरपि परं पारं गते लोचने।
अन्तर्वक्त्रमपि स्वभावशुचिभिः कीर्णं द्विजानां गणैः।
मुक्तानां सततानिवासरुचिरं वक्षोजकुम्भद्वय-
मित्थं तन्वि वपुः प्रशान्तमपि ते रक्तिं करोत्येव नः ॥८७॥

हे तन्वि सुन्दरि। इत्थं अमुना प्रकारेण ते तव वपुः शरीरं प्रशान्तमपि शान्तगुणगणमपि युक्तमपि नः अस्माकं रक्तिं रागं अनुरागं करोति। अत्र शब्दच्छलेनाह। यत्किञ्च प्रशान्तं भवति तत् कस्योपरि रागं द्वेषं न करोति। किंभूतं वपुः यस्य केशाः शिरोरुहाः संयमिनः संयमवन्तो वियते येषां ते तथा वियन्ते। अथ शब्दच्छलं यस्य। संयमिनः नियमवन्तः स्युः स कथं रागं करोतीति विरोधः। तथा ते तव लोचने नयने श्रुतेरपि कर्णस्यापि परं पारं निकटं गते प्राप्ते वर्तेते। यस्य किञ्च लोचनं नेत्रं मनो वा श्रुतेर्वेदस्य पारं अन्तं गतं भवति स कस्योपरि रागं करोति। तथा यस्य वपुषः अन्तर्वक्त्रमपि मुखान्तः मुखमध्यमपि द्विजानां गणैः कीर्णं व्याप्तानां समूहैः कीर्णं व्याप्तं वर्तते। यश्च द्विजानां गणैः कीर्णः परिवृतो भवति। कस्यापि रागं न करोति। किंलक्षणैः द्विजानां गणैः। स्वभावशुचिभिः दन्तपक्षे स्वभावेन प्रकृत्या शुचिभिः श्वेतैः। ब्राह्मणपक्षे शुचिभिः पवित्रैः। पुनः यस्य वपुषः वक्षोजकुम्भद्वयं कुचघटयुगलं मुक्तानां मौक्तिकानां सततानिवासरुचिरं सततं निरन्तरं अधिवासेन आश्रयेण रुचिरं मनोहरं वर्तते। यः किञ्च मुक्तानां जीवन्मुक्तानां अधिवासेऽ रुचिरो भवति। सं कस्यापि रागं न करोतीति श्लेषपक्षे शान्तत्वमिति ॥ ८७ ॥

प्रिये प्रणयकुपितानां तावत्पदमातनोति हृदि मानः।
भवति न यावच्चन्दनतरुसुरभिर्मलयपवमानः ॥ ८८ ॥

तावत् प्रिये भर्तरि प्रणयकुपितानां प्रेमरुषितानां अङ्गनानां हृदि मनसि मानः कान्तं प्रति न गमिष्यामीत्यहंकारः पदं स्थानं आतनोतु करोतु। तावत् कियत्। यावन्मलयपवमानः मलयस्य मलयाचलस्य पवमानो वायुर्न भवति न प्रसरति न वातीत्यर्थः। किंलक्षणः मानः मलयजवायुः चन्दनतरुभिः चन्दनतरुभिः मलयजवृक्षैः सुरभिः सुगन्धः। एतेन मलयजपवने नास्ति सति कामिन्यो मुक्तमानाः सत्यो भर्तारमभिगच्छन्तीत्यर्थः ॥ ८८ ॥

सहकारकुसुमकेसरनिकरभरामोदमूर्छितादिगन्ते ।
मधुरमधुरविधुरमधुपे मधौ भवेत्कस्य नोत्कण्ठा ॥ ८९ ॥

मधौ वसन्ते सति कस्य जनस्योत्कण्ठा सुरताभिलाषः न भवेत्। अपि तु सर्वस्यापि जनस्योत्कण्ठा भवेदित्यर्थः। किंभूते मधौ सहकारकुसुमकेसरनिकरभरामोदमूर्छितदिगन्ते। सहकाराणां आम्राणां कुसुमानि तेषां केसराः परागाः तेषां निकराः समूहाः तेषां भरोऽतिशयः तत्सामोदः परिमलः तेन मूर्छिताः वृद्धिं गताः भरिता इत्यर्थः। दिशां कुक्षयो अन्ताः मध्यानि यस्मिन् स तथाऽपि तस्मिन् । पुनः किंलक्षणे मधुरमधुरविधुरमधुपे । मधुरं स्वादिष्ठं यन्मधु मकरन्दः तेन विधुरा अत्याकुला पानाय मधुपा भृङ्गा यस्मिन् स तथा तस्मिन्। अत एवातिमनोहरे इत्यर्थः ॥ ८९ ॥

स्रजो ह्यामोदा व्यजनपवनं चन्द्रकिरणा-
न्परागं कासारं मलयजरसं सीधुं विशदम् ।
शुचिं सौधोत्सङ्गं प्रतनु वसनं पङ्कजदृशो
निदाघर्तावेतद्विलसति लभन्ते सुकृतिनः ॥ ९० ॥

[१ रा. मू. टीकायां च सीधु इति प्रायः दृश्यते । २ रा. मू. सौधोसत्कं]

निदाघर्तौ निदाघश्चासौ ऋतुश्च निदाघर्तुः तस्मिन् ग्रीष्मे । विलसति विद्यमाने सति सुकृतिनः पुरुषाः एतद्वस्तु लभन्ते एतत्किं । स्रजः माला लभन्ते। किंलक्षणाः स्रजः ह्यामोदाः ह्यः मनोहरः आमोदः परिमलो यासां ताः तथा लभन्ते। व्यजनपवनं व्यजनस्य तालस्य पवनः समीरणः तं। पुनः किं लभन्ते। चन्द्रकिरणान् इन्दुरश्मीन्। पुनः किं लभन्ते। परागं कुसुमरेणु । पुनः किं लभन्ते कासारं सरो लभन्ते । पुनः किं लभन्ते । मलयजरसं चन्दनरसं । पुनः किं लभन्ते । विशदं शुभ्रं सीधु मद्यं । सीधुशब्दो नपुंसकलिङ्गेऽप्यस्ति षाण्मासिकं मद्यं सीधु उच्यते । पुनः किं लभन्ते । शुचिं पवित्रं विविक्तं वा सौधोत्सङ्गं चन्द्रशालां । पुनः किं० । प्रतनु सूक्ष्मं वसनं वस्त्रं । पुनः किं लभन्ते । पङ्कजदृशः कमलनयनाः स्त्रियश्च ॥ ९० ॥

विषदुपचितमेघं भूमयः कन्दलिन्यो
नवकुटजकदम्बामोदिनो गन्धवाहाः ।
शिखिकुलकलकेकारावरम्या वनान्ताः
सुखिममसुखिनं वा सर्वमुत्कण्ठयन्ति ॥ ९१ ॥

एतद्वस्तु सर्वं सकलं सुखिनं सुखवन्तं स्त्रीयुक्तमित्यर्थः। जनं उत्कण्ठयन्ति उत्सुकयन्ति। एतत् किं वियद् आकाशं किंलक्षणं वियत् उपचितमेघं उपचिता वृद्धा मेघा जलधरा यस्मिंस्तत्। एवंविधं आकाशं दृष्ट्वोत्कण्ठा सर्वेषां जायते इत्यर्थः पुनः एतत्किं भूमयः पृथिव्यश्च किंलक्षणाः कन्दलिन्यः कन्दलानि हरितृणानि लता विशेषा वा विद्यन्ते यासु तास्तथा। पुनः एतत्किं। गन्धवाहा वायवः नवकुटजकदम्बामोदिनः। कुटजस्यं पुष्पाणि कुटजानि कदम्बस्य नीपस्य पुष्पाणि कदम्बानि नवानि कुटजानि च कदम्बानि च तेषां आमोदः परिमलो विद्यते येषु ते तथा पुनः किं। वनान्ताः वनप्रदेशाः किंलक्षणाः वनान्ताः। शिखिकुलकलकेकारावरम्याः शिखिकुलानां मयूरसमूहानां कला मधुराश्च ते केकारवाः केका शब्दाश्च ते रम्याः रमणीयाः॥ ९१॥

तरुणी सैषा दीपितकामा विकसितजातीपुष्पसुगन्धिः।
उन्नतपीनपयोधरभारा प्रावृषि कुरुते कस्य न हर्षम्॥ ९२॥

[१ रा. मू. 'सुगन्धिनः' २ रा. टी. 'तनुते']

एषा तरुणी नवयौवना स्त्री प्रावृषि वर्षाकाले कस्य हर्षं न तनुते। न कुरुते। अपि तु सर्वस्य जनस्य हर्षं तनुते इत्यर्थः। अथवा तरुणीवेत्यायकं पदम्। किंलक्षणा तरुणीवेषादीपितकामा तरुणीवेषेण नवयौवनाङ्गनासंबन्धिशृङ्गारेण आसमन्ताद्भावेन दीपितः वर्धितः कामो मदनो यया सा तथा। पुनः किंलक्षणा विकसितजातीपुष्पसुगन्धिः विकसितैः प्रफुल्लैः जातीपुष्पैः यूथिकाकुसुमैः सुशोभनो गन्धः परिमलो यस्याः सा तथा। पुनः किंलक्षणा। उन्नतपीनपयोधरभारा उन्नतयोः उच्चयोः पीनयोः मांसलयोः पयोधरयोः कुचयोर्भारोऽतिशयो यस्याः सा तथा। एवंविधा स्त्री वर्षाकाले कस्य मुदं न वर्धयतीत्यर्थः॥ ९२॥

आसारेण न हर्म्यतः प्रियतमैर्यातुं बहिः शक्यते
शीतोत्कम्पनिमित्तमायतदृशा गाढं समालिङ्ग्यते।
जालैः शीकरशीतलाश्च मरुतो रत्यन्तखेदच्छिदो
धन्यानां बत दुर्दिनं सुदिनतां याति प्रियासंगमे॥९३॥

बतेति हर्षे। धन्यानां भाग्यवतां प्रियासंगमे प्रियायाः संगमः सुरतं तस्मिन् सति दुर्दिनं मेघतिमिरच्छन्नं दिनं सुदिनतां सु शोभनं दिनं सुदिनं तस्य भावस्तत्ता। तां शोभनदिवसत्वं याति प्राप्नोति। शब्दच्छलेन दुः अपकृष्टं दिनं दुर्दिनं दुर्दिवसः सुदिवसत्वं प्राप्नोतीत्याश्चर्यं तदेवाह। यदा आसारेण वेगवद्वर्षणेन हेतुना प्रियतमैः कान्तैर्हर्म्यतः धवलगृहाद्बहिः अन्यत्र गन्तुं यातुं न शक्यते न पार्यते तदा आयतदृशा दीर्घलोचनया

कान्तया शीतोत्कम्पनिमित्तं, शीतेन जाड्येन यदुत्कम्पनं तन्निमित्तं तदर्थं । यथा स्वस्य कान्तस्य च शीतोत्कम्पो न भवतीत्यर्थः । तथा गाढं दृढं यथा भवति तथा समालिङ्गचते समालिङ्गनं विधीयते । कान्तेन सहेति शेषः । चान्यत् । यदा मरुतो वायवः जालैः गवाक्षैः आयान्तीति शेषः । किंलक्षणा मरुतः शीकरैः अम्भः कणैः शीतलाः शीताः । पुनः किंलक्षणाः वायवः । अत एव रत्यन्तस्वेदच्छिदः । रतीनां सुरतानां अन्ते अवसाने यः स्वेदः श्रमः तं छिन्दन्ति नाशयन्ति ते तथा । रत्यन्ते हि वायुसलिलादिसेवनं बलवर्धनं सेवहरं च भवतीति वैद्यके प्रसिद्धम् ॥ ९३ ॥

अर्धं नीत्वा निशायाः सरभससुरतायाससंश्लेषयोगैः
प्रोद्भूतासह्यतृष्णो मधुमदनिरतो हर्म्यपृष्ठे विविक्ते ।
संभोगक्लान्तकान्ताशिथिलभुजलतावर्जितं कर्करीतो
ज्योत्स्नाभिन्नाच्छधारं न पिबति सलिलं शारदं मन्दभाग्यः॥९४॥

यः पुरुषः एवं भूतं शारदं शरदि ऋतौ भवं शरत्संबन्धि वा सलिलं पानीयं न पिबति न पयति सः मन्दभाग्यः मन्दपुण्यः अतपा इत्यर्थः । किंलक्षणं सलिलं । विविक्ते विजने हर्म्यपृष्ठे चन्द्रशालायां कर्करीतः गलन्तिकाया 'गर्गरीति' लोके प्रसिद्धायाः । कर्कर्यामूर्णोलन्तिकेत्यमरः । गर्गर्या संभोगक्लान्तकान्ताशिथिलभुजलतावर्जितं । संभोगेन सुरतेन क्लान्ता श्रान्ता या कान्ता प्रेयसी तस्याः शिथिला निःसहा या भुजलता बाहुवल्ली तया आवर्जितं नामितं कान्तानामितस्य पानीयस्यातिस्वाद( दु ?)मत्वादित्यर्थः । पुनः किंलक्षणं पानीयं ज्योत्स्नाभिन्नाच्छधारं ज्योत्स्नया कौमुद्या भिन्ना संमिलिता अच्छा निर्मला धारा प्रवाहो यस्य तत्तथा चन्द्रिकासंमिश्रं । किं कृत्वा न पिबति । निशायाः रात्रेः अर्धं नीत्वा अतिवाह्य । किंलक्षणः यः सरभससुरतायाससंश्लेषयोगैः सरभसं सवेगं यत्सुरतं संभोगः तेन यः आयासः श्रमः तेनापि यः संश्लेषः आलिङ्गनं तस्य योगाः करणानि तैः कृत्वा प्रोद्भूतासह्यतृष्णः प्रोद्भूता प्रकर्षेणोत्पन्ना असह्या अहनीया तृष्णा पिपासा यस्य स तथा अर्धं लुप्त्वा शयित्वेति वा पाठः । सरभससुरतायास 'सञ्जलधाङ्' इति वा पाठः । सरभसं यत्सुरतं तेन य आयासः तेन सञ्जं व्याप्तं श्लथं शिथिलं भग्नं शरीरं यस्य स तथा । पुनः किंलक्षणः मधुमदनिरतः मधुना कृतो मदः तत्र निरतः क्षीव इत्यर्थः अथ हेमन्तविलासाः कथ्यन्ते ॥ ९४ ॥

प्रोद्यत्प्रौढप्रियंगुद्युतिभृति विदलत्कुन्दमाद्यद्द्विरेफे
काले प्रालेयवातप्रचलविकसितोद्दाममन्दारदाम्नि ।
येषां नो कण्ठलग्ना क्षणमपि तुहिनक्षोददक्षा मृगाक्षी
तेषामायामियामा यमसदनसमा यामिनी याति यूनाम् ॥९५॥

तेषां यूनां तरुणानां एवंविधे काले यामिनी रात्रिः यमसदनसमा यमस्य सदनं उपचारात् यमसदनं नरकमुच्यते । तेन समा नरकतुल्या याति गच्छति । यथा नरकस्य दुःसहत्वाद्दुःखान्तो न लभते एवं रात्रेरपि दुःसहत्वाद् दुःखान्तो न लभ्यते इत्यर्थः । किंलक्षणे काले । प्रोद्यत्प्रौढप्रियङ्गुद्युतिभृति । प्रियङ्गूणां फालगीनां पुष्पाणि प्रियंगवः । प्रोद्यन्तः उद्गच्छन्तः प्रौढाः महान्तो ये प्रियङ्गवः तैः कृत्वा द्युतिं शोभां बिभर्ति धारयतीति । प्रोद्यत्प्रौढप्रियङ्गुद्युतिभृत् । तस्मिन् । राशीकृतपुष्पैः शोभमाने इत्यर्थः । पुनः किंलक्षणे विदलत्कुन्दमाद्यद्द्विरेफे विदलन्तो विकसन्तो ये कुन्दाः कुसुमानि तेषु माद्यन्तः मदं प्राप्नुवन्तो द्विरेफा भ्रमरा यस्मिन् स तथा तस्मिन् । यत्र काले कुन्देषु भृङ्गाः गुञ्जन्तीत्यर्थः । पुनः किंलक्षणे काले । प्राठेयवातप्रचलित(प्रचल) विकसितोद्दाममन्दारदाम्नि । प्राठेयः शीतलो यो वातः समीरणः तेन प्रचलानि प्रकर्षेण चञ्चलानि विकसितानि प्रफुल्लानि उद्दामानि अमर्यादीनि बहूनीत्यर्थः । मन्दाराणां द्रुमाणां दामानि श्रेणयः यस्मिन् स तथा तस्मिन् । प्राठेयवातेन किल मन्दारद्रुमाः प्रफुल्ला भवन्तीति स्वभावः । तेषां केषां मृगाक्षी मृगनयना स्त्री क्षणमपि एकं स्वल्पकालमपि येषां पुरुषाणां कण्ठलग्ना न कण्ठे गले लग्ना । संश्लिष्टा न भवति । किंलक्षणा मृगाक्षी । तुहिनक्षोदक्षा तुहिनस्य हिमस्य क्षोदो नाशः तत्र दक्षा समर्था । यस्यामाश्लिष्टायां शीतं नश्यतीत्यर्थः ॥ ९५ ॥

हेमन्ते दधिदुग्धसर्पिरशना माञ्जिष्ठवासोभृतः
काश्मीरद्रवसान्द्रदिग्धवपुषः खिन्ना विचित्रैः रतैः ।
वृत्तोरुस्तनकामिनीजनकृताश्लेषा गृहाभ्यन्तरे
ताम्बूलीदलपूगपूरितमुखा धन्याः सुखं शेरते ॥९६॥

हेमन्ते ऋतौ गृहाभ्यन्तरे मन्दिरोदरे एवंभूताः सन्तः धन्याः भाग्यवन्तः पुरुषाः सुखं सानन्दं यथा स्यात्तथा शेरते स्वपन्ति । किंलक्षणास्ते । दधिदुग्धसर्पिरशनाः दधि द्रप्सं च दुग्धं पयश्च सर्पिर्घृतं च तानि दधिदुग्धसर्पींषि । अश्नन्ति भुञ्जन्ति ते तथोक्ताः । दध्यादि भक्षयन्त इत्यर्थः । पुनः किंलक्षणाः । माञ्जिष्ठवासोभृतः । मञ्जिष्ठया समङ्गया रक्तानि माञ्जिष्ठानि । एवंभूतानि वासांसि वच( स )नानि बिभ्रति ते तथोक्ताः । माञ्जिष्ठं हि वासः शीतकाले सोष्म भवतीति लोकप्रसिद्धिः । पुनः किंलक्षणास्ते । काश्मीरद्रवसान्द्रदिग्धवपुषः । काश्मीरस्य केसरस्य द्रवेण रसेन सान्द्रं निबिडं यथा भवति तथा दिग्धानि लिप्तानि वपूंषि शरीराणि यैस्ते तथोक्ताः । पुनः किंलक्षणास्ते धन्याः । विचित्रैः नानाप्रकारैः रतैः ऐभघेनुककमार्जारादिभिः संभोगैः खिन्नाः परिश्रान्ताः । पुनः किंलक्षणाः वृत्तोरुस्तनकामिनीजनकृताश्लेषाः । वृत्ताः वर्तुलाकाराः

उरवो महान्तः स्तनाः पयोधरा येषां ते वृत्तोरुस्तनाः एवंभूताश्च ते कामिनीजनाः कान्ताश्लोकाश्च तैः कृतो विहितः आश्लेष उपगूहनं येषां ते तथोक्ताः । पुनः किंलक्षणास्ते ताम्बूलीदलपूगपूरितमुखाः । ताम्बूलानां नागवल्लीनां दलैः पर्णैः पूगैः क्रमुकैश्च पूरितं भृतं मुखं वदनं यैस्ते तथा । हेमन्ते धन्या एवंभूता भवन्तीत्यर्थः ॥ ९६ ॥

चुम्बन्तो गण्डभित्तीरलकवति मुखे सीत्कृतान्यादधाना
वक्षःसूत्कञ्चुकेषु स्तनभरपुलकोद्भेदमापादयन्तः ।
ऊरूनाकम्पयन्तः पृथुजघनतटाच्छंसयन्तोऽशुकानि
व्यक्तं कान्ताजनानां विटचरितभृतः शैशिरा वान्ति वाताः॥९७॥

अथ शिशिरविलासा वर्ण्यन्ते । शैशिराः शिशिरर्तौ भवाः वाताः समीरणाः वान्ति प्रसरन्ति । किंलक्षणाः वाताः व्यक्तं प्रकटं यथा भवति तथा विटचरितभृतः विटानां स्त्रिग्धानां चरितं आचरणं बिभ्रति धारयन्ति ते तथा । यथा स्त्रिग्धाः कुर्वन्ति तथा कुर्वन्त इत्यर्थः । किंलक्षणाः । कान्ताजनानां स्त्रीवर्गाणां गण्डभित्तीः । गण्डा एव भित्तयः ताः गण्डस्थलीः चुम्बन्तः धयन्तः स्पृशन्त इत्यर्थः। विटा अपि परस्त्रीणां गण्डभित्तीश्चुम्बन्ति । पुनः किंलक्षणाः अलकवति प्रलम्बालके । तदा हि शीतबाधायाः पुनः पुनः अभ्यङ्गस्नानाभावाद्बम्बालकत्वमुक्तं। सीत्कृतानि सीत्कारानादधानाः आदधते आरोपयन्ति ते तथोक्ताः। अर्थात् स्त्रीणां मुखे । पुनः किंलक्षणाः । वक्षःसु उरःसु स्तनभरपुलकोद्भेदं आपादयन्तः स्तनभरयोः कुचतटयोः पुलकानां रोमाञ्चानां उद्भेदः उद्गमः तं प्रापयन्तः विटा अपि मुखे सीत्कृतानि आरोपयन्ति । तथा वक्षस्सु । स्तनभरपुलकोद्भेदं आपादयन्ति च । किंलक्षणेषु वक्षःसु । उत्कञ्चुकेषु उत्कृष्टाः श्रेष्ठाः कञ्चुकाः वारवाणाः उरःप्रसेविका येषु तानि तथा तेषु । पुनः किंलक्षणाः । ऊरू सक्थीन् (नि) आकम्पयन्तः प्रेरयन्तः । शिशिरवातेन हि ऊरवः कम्पन्ते । विटा अपि परस्त्रीणां ऊरून् आकम्पयन्ति । पुनः किंलक्षणाः स्तनजघनतटात् कुचजघनास्थलात् अंशुकानि वसनानि श्रंसयन्तः अधः पातयन्तः । विटा अपि स्तनजघनतटादंशुकानि श्रंसयन्तीति समानम् ॥ ९७ ॥

केशानाकुलयन्मुहुर्मुकुलयन्वासो बलादाक्षिप-
न्नातन्वन्पुलकोद्गमं प्रकटयन्नावेगकम्पं गतेः ।
वारं वारमुदारसीत्कृतकृतो दन्तच्छदान्पीडय-
न्प्रायः शैशिर एष संप्रति मरुत्कान्तासु कान्तायते ॥९८॥

संप्रति इदानीं । एषः शैशिरः । शिशिरर्तुसंबन्धी मरुत् वायुः । कान्तासु स्त्रीषु कान्तायते । कान्त इवाचरतीति तथा । प्रिय इव भवतीत्यर्थः । यथा कान्तः पतिः स्त्रीषु कान्तायते

प्रवर्तते तथा प्रवर्तते इत्यर्थः । तदेव तयोः साम्यमाह । किं कुर्वन् मरुत् । केशान् शिरोरुहान् आकुलयन् चालयन् । कान्तोऽपि केशानाकुलयति । पुनः किं कुर्वन् । दृशौ नयने मुकुलयन् कुड्मलयन् । संकोचयन्नित्यर्थः । कान्तोऽपि दृशौ मुकुलयति । पुनः किं कुर्वन् बलात् वेगात् वासः वस्त्रं आक्षिपन् आकर्षन् । कान्तोऽपि बलात् वासः आक्षिपति । पुनः किं कुर्वन् । पुलकोद्गमं रोमाञ्चोद्भेदं आतन्वन् विस्तारयन् । कान्तोऽपि पुलकोद्भेदं आतनोति । पुनः किं कुर्वन् गतेः । गमनस्यावेगकम्पं आवेगे आटोपे कम्पः कम्पनं प्रकटयन् । शैशिरे वाते हि वाति सति गतेः आटोपे कम्पो भवति । कान्तोऽपि गतेः आवेगकम्पं प्रकटयति । पुनः किं कुर्वन् दन्तच्छदान् दन्तान्दशनान् छदयन्ति आच्छादयन्ति ते दन्तच्छदाः अधरास्तान्पीडयन् व्यथयन् किंलक्षणान्दन्तच्छदान् । वारं२(वारं) मुहुः २(मुहुः) उदारसीत्कृतकृतः उदाराणि सुन्दराणि सीत्कृतानि सीत्कारान्कुर्वन्ति ते तथोक्ताः तान् । कान्तोऽपि वारं२(वारं) अधरान्पीडयति ॥ ९८ ॥

राजते राजमानाया एष बिम्बाधरव्रणः ।
सुधां पीत्वेव कान्तेन स तच्छेषः समुद्धृतः ॥ ९९ ॥

स एष प्रत्यक्षो राजमानायाः शोभमानायाः सुन्दर्याः बिम्बाधरव्रणः बिम्बमिव फलं बिम्बं तदेव अधरः बिम्बाधरः तस्य व्रणः क्षतं । राजते शोभते । किंलक्षणो व्रणः उत्प्रेक्ष्यते । कान्तेन भर्त्रा सुधां तद्वतममृतं पीत्वा प्रपीय समुद्धृतः मुक्तः तच्छेष इव तस्याः सुधायाः शेषः उर्वरितो भाग इव ॥ ९९ ॥

वैराग्यं संश्रयत्येको नीतौ भ्रमति चापरः ।
शृङ्गारे रमते कश्चिद्रुचिभेदात्परस्परम् ॥ १०० ॥

परस्परं अन्योन्यस्य रुचिभेदात् । प्रीतिभेदेन एकः पुमान् वैराग्यं निर्वेदं संश्रयति आश्रयति प्रीतिवशेन वैराग्ये एव रक्तो भवति । च अन्यत । अपरः अन्यः नीतौ नये संसारव्यवहारमार्गे भ्रमति प्रवर्तते । मार्गभ्रष्टो हि भ्रमति । कश्चित् कोऽपि पुमान् शृङ्गारे रसे भूषणधारणस्त्रीसेवनादिके रमते क्रीडति । तदासक्तो भवतीत्यर्थः । एतेन यस्य २ (यस्य) यथा २ (यथा) रुचिः स स तथा तथा प्रवर्तत इत्यर्थः ॥ १०० ॥

यद्यस्य नाभिरुचितं न तत्र तस्य स्पृहा मनोऽज्ञेऽपि ।
रमणीयेऽपि सुधांशौ नलिनी नानुरागमाधत्ते ॥ १०१ ॥

यस्य जनस्य यत् वस्तु न अभिरुचितं न रोचते तत्र तस्मिन् वस्तुनि मनोज्ञे मनोहरेऽपि तस्य जनस्य स्पृहा वाञ्छा न भवति । स तत्र विद्वेष्टीति इत्यर्थः । अर्था-

न्तरम्यासः । रमणीयेऽपि संजीवकत्वाह्लादकत्वाद्यनेकगुणैः रमणीयेऽपि अतिश्रेष्ठत्वेन मयोहरेऽपि सुधांशौ सुधारूपाः जगज्जीवका अंशवः किरणा यस्य स तथा तस्मिन् अमृतकिरणे चन्द्रमसि नलिनी श्रीसूर्यवल्लभकमलिनी अनुरागं प्रेम न आधत्ते न आद-धाति । तं नावलोकयतीत्यर्थः । एतेन नीतिशृङ्गारवैराग्येषु मध्ये यस्य यत् अभिरुचितं स तत्रासक्तो भवतीत्यर्थः ॥ १०१ ॥

इति श्रीमहाकविचक्रचूडामणिना भर्तृहरिणा विरचितं शृङ्गारशतं द्वितीयं संपूर्णम् ।

---

*इति शृङ्गारशतकं द्वितीयं समाप्तिं पफाण ।
श्रीरस्तु । शि । कल्याणसौभाग्य । पठनकृते लिखितम् ।

[ *रा. मू. पुष्पिका नास्ति ]

( रामर्षिकृतविवृतिसहिते भर्तृहरिशतकत्रये वैराग्यशतकम् । )

*श्रीरस्तु । श्रीगणेशाय नमः ।

---

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥ १ ॥

[* अ. कोशे अर्हं इत्यारभ्यते । १ अ. °नाथाय]

तेजसे वर्चसे नमः नमस्कारोऽस्तु । किंच्छणाय तेजसे दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तये । दिक्षु च काष्ठश्च दिशाश्च । वेदान्तिनां मते व्यापकौ पदार्थौ तदादिभिः अनवच्छिन्ना न अवच्छिन्ना न क्रोडीकृता । अविषयीकृतेत्यर्थः । अनन्ता पारशून्या चिन्मात्रा ज्ञानरूपा मूर्तिः स्वरूपं यस्य तत्तथा तस्मै । पुनः किंच्छणाय तेजसे स्वानुभूत्येकमानाय । स्वानुभूतिः आत्मानुभव एव एकं मानं प्रमाणं यस्य तत्तथा तस्मै यत्स्वानुभवेन ज्ञायते इत्यर्थः । पुनः किंच्छणाय शान्ताय शान्त्यविद्या येन तत्तस्मै । परमान्त्यरूपायेत्यर्थः ॥ १ ॥

बोद्धारो मत्सरग्रस्ताः प्रभवः स्मयदूषिताः ।
अबोधोपहताश्चान्ये जीर्णमङ्गे सुभाषितम् ॥ २ ॥

[१ रा. टी. अबोधोः]

अङ्गे शरीरे एव सुभाषितं जीर्णं जी( शी! )र्ण मनस्येव विनष्टमित्यर्थः । कुत इत्यत्र आह । यतः बोद्धारो बुध्यन्ते इति तथा ज्ञातारः मत्सरग्रस्ताः मत्सरेण ईर्षेण ग्रस्ताः मत्सराधीनाः । अहो वयमेव जानीमहे किमेते कथयन्तीति ईर्षाकुला इत्यर्थः । तथा प्रभवः स्वामिनः स्मयदूषिताः स्मयेन गर्वेण दूषिता वैकृत्यं प्रापिताः । ते हि प्रभुत्वगर्वेण न किंचिच्छृण्वन्तीत्यर्थः । च अन्यत् अन्ये बोद्धृप्रभुभ्योऽपरे अबोधेनाज्ञानेन उपहताः आक्रान्ता नष्टप्रायाः कृता इत्यर्थः ॥ २ ॥

न संसारोत्पन्नं चरितमनुपश्यामि कुशलं
विपाकः पुण्यानां जनयति भयं मे विमृशतः ।
महद्भिः पुण्यौघैश्चिरपरिगृहीताश्च विषया
महान्तो जायन्ते व्यसनमिव दातुं विषयिणाम् ॥३॥

संसारोत्पन्नं संसारे विषये संसाराद्वा उत्पन्नं जातं चरितं । चर्यते स्म क्रियते स्म तच्चरितं कर्म । कुशलं सुखकारि आ ( अ )र्षात् आत्मनः न अनुपश्यामि न

जानामि । ननु संसारोत्पन्नं पापं कर्म कुशलाय मास्तु । परं पुण्यं कर्म तु कुशलाय भविष्यतीत्याशङ्क्याह । यत् पुण्यानां सुकृतानामपि विपाकः परिणामः । पर्यवसानमित्यर्थः । सोऽपि विभृशतः विचारयतः सतः मे मम भयं साध्वसं जनयति उत्पादयति । विचार्यमाणे सति सुकृतपरिपाकोऽपि दुःखाय भवतीत्यर्थः । यतः विषयाः अवन्वनवनिताया वा विषयिणां विषयवतां महान्तः अतिगुरवो भवन्ति । किं कर्तुं । उत्प्रेक्षते । व्यसनं आपदं दातुमिव । एतेन ते विषया यथा यथा महान्तो भवन्ति तथा तथा व्यसनानि भवन्तीत्यर्थः । किंलक्षणाः विषयाः महद्भिः अतिगुरुभिः पुण्यौघैः सुकृतसमूहैः कृत्वा चिरपरिगृहीताः चिरेण बहुकालेन परिगृहीताः स्वीकृताः । एतेन चिरकालं पुण्यानि विधाय प्राप्ता इत्यर्थः ॥ ३ ॥

भ्रान्त्वा देशमनेकदुर्गविषमं प्राप्तं न किंचित्फलं
त्यक्त्वा शीलकुलाभिमानमुचितं सेवाकृता निःफला ।
भुक्तं मानविवर्जितं परगृहेष्वाशङ्क्या काकव-
त्तृष्णे वैरिणि पापकर्मनिरते नाद्यापि संतुष्यसि ॥ ४ ॥

[१ अ. °ष्यति°]

हे तृष्णे । हे लोभाक्रान्ते हे वैरिणि अनुचितकर्मकारिणित्वात् हे शत्रुभूते हे पापकर्मनिरते हे पापकर्मकारिणि पापकर्मसु निरतः पुमान् यया सा पापकर्मनिरता तत्सम्बोधने हे पापकर्मनिरते । यथाक्रान्तः पमान् पापकर्म करोतीत्यर्थः । त्वं अद्यापि अद्य न संतुष्यसि न संतुष्टा भवसि । मां न मुञ्चसीत्यर्थः । यतः कारणात् मया त्वदधिष्ठितेन सता अनेकदुर्गविषमं अनेकैर्बहुभिः दुर्गैः दुःप्रवेशैरास्पदैर्विषमं कठिनं देशं विषयं भ्रान्त्वा परिभ्रम्य किंचिदपि फलं स्वल्पमपि धनं न प्राप्तं न लब्धम् । तथा त्वदधिष्ठितेन मया निःफला दुःकुलानां मोघा सेवा उपास्तिः कृतावहिता । किं कृत्वा उचितं योग्यं शीलकुलाभिमानं शीलं चारित्रविद्याभा(भ्या)सादि कुलं सद्वृत्तं तयोः संबन्धिनं अभिमानं त्यक्त्वा । अहो मच्छीलकुलवान् किं निन्द्यं कर्म करोतीत्यहंकारं परित्यज्य । तथा मया परगृहेषु परेषां गृहेषु आवासेषु आशङ्कया भयेन । किमयं मां भोक्तुं न दास्यतीति साध्वसेनेत्यर्थः। मानविवर्जितं मानेन पूजया अहंकारेण वा विवर्जितं रहितं यथा भवति तथा भुक्तं अभ्यवहृतं किंवत् काकवत् वायसवत् । यथा वायसः आशङ्कया मुद्भुके । परगृहे स्वाशङ्कया काकवदिति वा पाठान्तरे तत्र मया परगृहे मानरहितं यथा स्यात्तथा भुक्तं स्मातं किंवत् काकवत् । निःस्नानमन्त्रसंस्कारमित्यर्थः । कया स्वाशङ्कया स्वस्य धनस्याशङ्कया कदापि अस्माद्धनं प्राप्नुयां इति भावेनेत्यर्थः ॥ ४ ॥

उत्खातं निधिशङ्क्या क्षितितलं ध्माता गिरेर्धातवो
निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संतोषिताः ।
मन्त्राराधनतत्परेण मनसा नीताः श्मशाने निशाः
प्राप्तः काणवराटकोऽपि न मया तृष्णे सकामा भव ॥५॥

[१ अ. 'स्मसाने' रा. 'श्मसाने' इति प्रायः]

हे तृष्णे हे लौल्यजनने हे आशे त्वं सकामा भव कृतार्था एषि। यतः कारणात् त्वदधिष्ठितेन मया निधिशङ्कया निधीनां निधानानां शङ्का अभिलाषः तया हेतुना अस्मान्निधानं प्रादुर्भविष्यतीत्यभिलाषेण। क्षितितलं अवनितलं उत्खातं उत्कीर्णं खनितमित्यर्थः। तथा मया गिरेः पर्वतस्य धातवः लोहताम्राद्याः निधिशङ्कया ध्माताः अग्निना दग्धाः। तथा सरितां पतिः सागरः निधिशङ्कया निस्तीर्णः उत्तीर्णः। नौभिः सागरमुत्तीर्य परं पारं गतः इत्यर्थः। तथा यत्नेन सावधानतया आ(अ)स्मान्निधिं प्राप्स्यामीति मनोरथेन नृपतयः राजानः संतोषिताः आराधिताः। तथा मन्त्राराधनतत्परेण मन्त्राणामाराधनाय एकाग्रेण मनसा चित्तेन कृत्वा उपलक्षितेन मया श्मशाने पितृकानने निशाः रात्रयो नीताः। अतिवाहिताः। श्मशाने मन्त्राञ्जप्त्वा देवता आराध्य निधिं प्राप्स्यामीति भावेन रात्रयो निर्गमिता इत्यर्थः। तथापि इदानीं यावत् मया काणवराटकोऽपि भग्नवामिकापि न प्राप्तः न लब्धः त्वदधिष्ठितेन मया एतानि शून्यानि विदधता मया किंचिदपि न प्राप्तं अतस्त्वं सकामा भवा मां पराभूय कृतार्था भव मत्तो निर्गच्छेति भावः॥ ५॥

खलोल्लापाः सोढाः कथमपि तदाराधनपरै-
र्निगृह्यान्तर्वाष्पं हसितमपि शून्येन मनसा।
कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि
त्वमाशे मोघाशे किमपरमतो नर्तयसि माम्॥ ६॥

हे आशे हे आयततृष्णे हे मोघाशे हे निःफलमनोरथे निःफलविशे वा त्वं अतः परं अस्मादधिकं नो अस्मान् किं नर्तयसि किं नाट्यमारचयसि किं नाट्यं कारयिष्यसीत्यर्थः। यतः अस्माभिः खलोल्लापाः खलानां दुर्जनानां उल्लापाः सोल्लुण्ठवचनानि रेकारतुंकाररेफिकप्रभृतिव्या(वा)क्यानीत्यर्थः। सोढाः क्षान्ताः कथं सोढाः कथमपि महता कष्टेन किंलक्षणैः अस्माभिः तदाराधनपरैः तेषां खलानां आराधनं संतोषणं तत्र पराः आसक्ताः तैः। सदा खलसंतोषणायोद्युक्तैरित्यर्थः। तथा हे तृष्णे अस्माभिः हसितमपि हास्यं कृतमपि। तर्हि संतुष्टा भविष्यथेत्याह—न पुनः किंलक्षणैर्नः। शून्येन निःसंज्ञेन मनसा चित्तेन उपलक्षतेः संज्ञां विना विलक्षवदनेन हसितमित्यर्थः। किं कृत्वा अन्तर्मध्ये बाष्पं अश्रु निगृह्य स्तम्भयित्वा आगच्छदपि रोदनं हित्वा तृष्णाकुलतया शून्येन चित्तेन हसितमित्यर्थः। पुनः वित्तस्तम्भप्रतिहतधियां वित्तं धनमेव स्तम्भः स्थाणुः तेन प्रतिहता भग्ना धीर्बुद्धिर्येषां ते तथा तेषां धनस्थाणुभग्नमतीनां अतिगृद्धीनामित्यर्थः। दुर्जनानां अञ्जलिः करसंपुटमपि कृतः तान्प्रसादयितुं प्रणामायाञ्जलिर्विहित इत्यर्थः। अतः परं कानि कानि शिल्पानि कारयिष्यसीति भावः॥ ६॥

गात्रैर्गिरा च विकलश्चदुमीश्वराणां
कुर्वन्नयं प्रहसनस्य नटः कृतोऽसि।
तं त्वां पुनः पलितकर्णकभाजमेनं
नाट्येन केन नटयिष्यति दीर्घमायुः॥ ७॥

[१ रा. मु. 'त्वं' टीकायामपि प्रायः]

हे जन अयं त्वां प्रहसनस्य प्रकर्षहासाय नटः नर्तयिता कृतः विहितोऽसि अर्थाद्दीर्घेणायुषा किं कुर्वन् ईश्वराणां प्रभूणां अन्नवसनवासादिदातॄणामित्यर्थः । चटुं कुर्वन् प्रियं वाक्यं वदन् । किंलक्षणस्त्वं । गात्रैः देहावयवैर्हस्तपादादिभिर्विकलः चलनादि कर्तुमशक्तः श्लथद्गात्र इत्यर्थः । पुनः किंलक्षणः त्वं च पुनर्गिरा वाण्या विकलः असमर्थः । वक्तुमशक्तः स्खलद्वाणीक इत्यर्थः । नटोऽपि स्खलद्गात्रः सन् तथा स्खलद्वाणिकः सन् जनान्प्रहासयति । पुनः अतः परं दीर्घं प्रलम्बं अतिमहदित्यर्थः आयुर्जीवितं एनं एवंभूतमित्यर्थः त्वां केन नाट्येन नर्तनविधिना नटयिष्यति नर्तयिष्यति कानि कानि कर्माणि कारयिष्यतीत्यर्थः । त्वं जीवन्बहूनि निन्द्यकर्माणि करिष्यसीत्यर्थः । किंलक्षणं त्वां पलितकर्णकभाजं पलितौ जरसा युक्तकेशौ कर्णकौ कर्णपाल्यौ भजते दधातीति पलितकर्णभाक् तं पलितकर्णमित्यर्थः ॥ ७ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवितं
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते ।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ८ ॥

[ १ रा. मू. °मयं ]

इदं जगत् विश्वं मोहमयीं अज्ञानरूपां प्रमादमदिरां । प्रमाद एव मदिरा तां । प्रमादोऽनवधानता असावधानता । एवं मद्यं पीत्वा प्रपीय असावधानतां प्राप्येत्यर्थः । उन्मत्तभूतं वर्तते । उन्मत्तेन मदाविष्टेन भूतं समं अस्ति । उन्मत्ततुल्यमित्यर्थः । यतः आदित्यस्य श्रीसूर्यस्य अहरहः प्रतिदिवसं गतागतैः गतानि च आगतानि च तैः । उदयास्तमनैरित्यर्थः । जीवितं आयुः संक्षीयते क्षीणं भवति । नश्यतीत्यर्थः । उन्मत्तोऽपि आदित्यस्य गतागतानि तथा क्षीयमाणं आयुश्च न जानाति । प्रमूढत्वादित्यर्थः । तथा व्यापारैः व्याप्रियन्ते आरभ्यन्ते ते व्यापाराः आरम्भाः । तैः कालो वर्तमानादिरवसरो न ज्ञायते कथमस्मि कथमासीत् किं भविष्यतीति न जानातीत्यर्थः । किंलक्षणैर्व्यापारैः । बहुकार्यभारगुरुभिः बहूनि अनेकानि यानि कार्याणि करणीयानि कर्माणि तेषां भारोऽतिशयस्तेन गुरवः महान्तस्तैः । भूरिकार्यातिशयेन दुर्वहैरित्यर्थः । च पुनः जन्मजराविपत्तिमरणं जन्म अवतरणं च जरा वृद्धत्वं च विपत्तिर्वियोगरूपा परमापत् च मरणं मृत्युश्च तेषां समाहारः जन्मजराविपत्तिमरणं दृष्ट्वा त्रासं भयं न उत्पद्यते । उन्मत्तोऽपि कालं न जानाति कृतश्चन न बिभेतीत्यर्थः ॥ ८ ॥

दीना दीनमुखैः सदैव शिशुकैराकृष्टजीर्णाम्बरा
क्रोशद्भिः क्षुधितैर्नरैर्न विधुरा दृश्येत चेद्गेहिनी ।
याच्ञाभङ्गभयेन गद्गदगलत्त्रुट्यद्विलीनाक्षरं
को देहीति वदेत्स्वदग्धजठरस्यार्थे मनस्वी पुमान् ॥ ९ ॥

[ १ अ. 'गलत्त्रु° ' ]

कः मनस्वी प्रशस्तचेताः पुमान् पुरुषः स्वदग्धजठरस्यार्थे स्वस्य दग्धं सदैव क्षुधा-तापनाकुलं यत् जठरं उदरं तस्य अर्थे प्रयोजने । तदर्थमित्यर्थः । इति एवं वदेत् ब्रूयात् । इतीति किं । देहि मह्यं दत्तादिति कथं यया भवति तथा याच्ञाभङ्गभयेन याच्ञायाः प्रार्थनायाः भङ्गः अप्रत्यर्पणं तस्माद्भयं साध्वसं तेन । अयं न दास्यतीति भयेन गद्गद-गलद्भ्रुट्यद्विलीनाक्षरं गद्गदानि विसंस्थुलानि अत एव त्रुट्यन्ति अन्तरा भङ्गं प्राप्नुवन्ति तथा विलीनानि अज्ञायमानानि अक्षराणि वर्णाः यत्र यस्यां क्रियायां तयथा भवति तथा । प्रार्थनाभङ्गभयात् सगद्गदं स्खलदक्षरमित्यर्थः। चेत् यदि नरैः एवंभूता गेहिनी स्वगृहस्वामिनी भार्या न हृश्येत नोपलक्ष्येत । एवंभूता स्त्री न भवेदित्यर्थः । किंलक्षणा गेहिनी । दीना कृपाविषया यतः पुनः किंलक्षणा शिशुकैः शिशवः शिशुकाः तैः बालकैः आकृष्टजीर्णा-म्बरा आकृष्टं आगृहीतं जीर्णं दरिद्रवशात् शीर्णं अम्बरं वसनं शाटको यस्याः सा तथा पुनः किंलक्षणा । अत एव विधुरा विह्वला आकुलेत्यर्थः। किंलक्षणैः शिशुकैः सदैव अनवरतं दीनमुखैः प्रातराशान्नायभावेन दीनवदनैः अतः एव पुनः किंलक्षणैः शिशुकैः क्रोशद्भिः आक्रन्दयद्भिः पुनः किंलक्षणैः यतः क्षुधितैः एतेन दीनत्वादिविशे-षणविशिष्टैः बालकैः पराभूयमाना स्वभार्या न दृश्येत तर्हि कः कं याचेदिति भावः ॥ ९ ॥

निवृत्ता भोगेच्छा पुरुषबहुमानो विगलितः
समानाः स्वर्यातः सपदि सुहृदो जीवितसमाः ।
शनैर्यष्ट्युत्थानं घनतिमिररुद्धे च नयने
अहो धृष्टः कायस्तदपि मरणापायचकितः ॥ १० ॥

[ १ रा. मू. यष्ट्युत्थानं २ अ. दृष्टः ]

अहो आश्चर्ये । धृष्टः निर्लज्जः कायो देहः तदपि तथापि मरणापायचकितो वर्तते । मरणमेव मृत्युरेव अपायो नाशः तस्माच्चकितो भीतस्तिष्ठति । तत् इति तथार्थेऽव्ययं । वर्हीति कथं यद्यपि भोगेच्छा भुज्यते अनुभूयन्ते भोक्तव्यन्ते इत्यर्थः । ते भोगाः विषयाः आहारास्वादादयो वा तेषां इच्छा अभिलाषः निवृत्ता शान्ता न विषयान् अभिल-षतीत्यर्थः । तथा पुरुषबहुमानः पुरुषसंबन्धी पुरुषाणां पूनां यो भवतीत्यर्थः । सबहुमानो भूरिहंकारः स विगलितः भ्रष्टः बुद्धो हि निरहंकारं वक्ति कर्म करोतीत्यर्थः । पुनः जीवि-तसमाः प्राणतुल्याः सुहृदः संबन्धिनो मित्राणि च यद्यपि स्वर्याताः स्वर्गं याताः गताः मृता इत्यर्थः । तथा समानाः तुल्यकालीनाः लोकाश्च स्वर्याताः पुनः यद्यपि शनैः मन्दं यथा स्यात्तथा यष्ट्या काष्ठदण्डेन उत्थानं उत्थित्वा चलनं भवति पुनः यद्यपि नयने लोचने घनतिमिररुद्धे घनान्धकाररुद्धाते भवतः । यद्येवमवस्थानुभूयते तथापि मरणात्तस्मो वैराग्यं नोपयातीति भावः ॥ १० ॥

हिंसाशून्यमयत्नलभ्यमशनं धात्रा मरुत्कल्पितं
व्यालानां पशवस्तृणाङ्कुरभुजः सृष्टाः स्थलीशायिनः ।
संसारार्णवलङ्घनक्षमधियां वृत्तिः कृता सा नृणां
यामन्वेषयतां प्रयान्ति सततं सर्वे समाप्तिं गुणाः ॥ ११

धात्रा सृष्टिकर्त्रा व्यालानां स्वभावदुष्टानां सर्पाणामपि मरुत् वायुः अशनं भोजनं कल्पितं । किंलक्षणं अशनं हिंसाशून्यं हिंसया परोपद्रवेण शून्यं रहितं । यस्मिन्नशने विधीयमाने न कश्चिद्दोषो भवतीत्यर्थः । पुनः किंलक्षणमशनं अयत्नलभ्यं यत्नं उद्यमं विनापि लभ्यते प्राप्यते तत् अयत्नलभ्यं । वायोः सर्वत्र संचारित्वेन सुलभमित्यर्थः । तथा धात्रा ब्रह्मणा पशवः गवाद्याः अज्ञजीवा अपि तृणाङ्कुरभुजः । तृणानां यवसानामङ्कुराः अग्राणि तान्भुञ्जन्ति अदन्ति इति ते तथा सृष्टाः निर्मिताः । तेषां अज्ञानामपि अशनं सुलभं निर्दोषं चेत्यर्थः । किंलक्षणाः पशवः स्थलीशायिनः । स्थल्यां भूमौ शेरते स्वपन्ति ते स्थलीशायिनः । येषां शयनेऽपि न कश्चिद्दोष इत्यर्थः । पुनः धात्रा नृणां मनुष्याणां सा वृत्तिः जीविका कृता विहिता । किंलक्षणानां नृणां संसारार्णवलङ्घनक्षमधियां । संसार एव अर्णवः समुद्रस्तस्य लङ्घने व्युत्क्रम्य गमने क्षमाः(मा) समर्थाः(र्था) योग्या या धीर्बुद्धिर्येषां ते तथा तेषां । संसाराम्बुधिं तरीतुमिच्छूनां ज्ञानिनामित्यर्थः । सा का वृत्तिः यां वृत्तिं अन्वेषयतां गवेषयतां प्राप्तुमिच्छूनामित्यर्थः । सर्वे सकलाः गुणाः विज्ञत्वमानित्वोदारसत्त्वादयो विशेषाः सततं समाप्तिं पूर्णतां नाशमित्यर्थः । प्रयान्ति प्राप्नुवन्ति । यामन्नवसनशयनवासादिवृत्तिं प्राप्तुमितस्ततो नीचस्थलेष्वप्युद्यच्छमानानां न कश्चिदपि गुणस्तिष्ठतीत्यर्थः ॥ ११ ॥

न ध्यातं पदमीश्वरस्य विधिवत्संसारविच्छित्तये
स्वर्गद्वारकपाटपाटनपटुर्धर्मोऽपि नोपार्जितः ।
रामापीनपयोधरोरुयुगलं स्वप्नेऽपि नालिङ्गितं
मातुः केवलमेव यौवनवनच्छेदे कुठारा वयम् ॥१२॥

वयं केवलमेव एकमेव मातुः जनन्याः यौवनवनच्छेदे यौवनं तारुण्यमेव वनं काननं तस्य छेदः नाशनं तत्र तदर्थमित्यर्थः । कुठाराः परशवः स्मः । यथा कुठारेणारण्यं छिद्यते तथा संताने जाते मातुर्यौवनं नश्यतीत्यर्थः । चतुर्वर्गरहितत्वेन निरर्थकं जाता इति भावः । यतः अस्माभिः संसारविच्छित्तये संसारस्य भवस्य विच्छित्तिर्नाशः तस्यै । मोक्षायेत्यर्थः । विधिवत् वेदोक्तप्रकारेण ईश्वरस्य प्रभोः जगत्कर्तुः परमेश्वरस्य पदं

चरणः न ध्यातं न स्मृतं । एतेन मोक्षाय नोद्युक्त इति भावः । तथा धर्मोपि सुकृतमपि न उपार्जितः न संचितः । किंलक्षणो धर्मः स्वर्गद्वारकपाटपाटनपटुः स्वर्गस्य देवलोकस्य द्वारं प्रतीहारः तस्य कपाटमररं तस्य पाटनं उद्घाटनं तत्र पटुः समर्थः । एतेन स्वर्गलोकगमनस्यान्तरायभूतानि पापानि नाशयित्वा स्वर्गपददातेत्यर्थः । तथा स्वप्नेऽपि स्वप्नावस्थायामपि रामापीनपयोधरोरुयुगलं रामायाः सुन्दरनार्याः पीनं मांसलं । अतिस्थूलमित्यर्थः । पयोधरयोः स्तनयोः ऊर्वोश्च सक्थ्नोश्च युगलं युग्मं नालिङ्गितं न आश्लिष्टं । एतेन कामरसोपभोगोऽपि नानुभूत इत्यर्थः ॥ १२ ॥

भोगा न भुक्ता वयमेव भुक्तास्तपो न तप्तं वयमेव तप्ताः ।
कालो न यातो वयमेव यातास्तृष्णा न जीर्णा वयमेव जीर्णाः ॥ १३ ॥

अस्माभिर्भोगा विषया न भुक्ता न अनुभूताः । तर्हि किं वयमेव भुक्ताः । विष्टिकरणेन पामरजनैः पराभूता इत्यर्थः । पुनरस्माभिः तपः तपस्या स्वधर्म इत्यर्थः । न तप्तं न आचरितं । तर्हि किं वयमेव तप्ताः । दुःखेन दग्धा इत्यर्थः । पुनश्च कालोऽनेहा न यातः न गतः स नित्यत्वात् सदा स्थित इत्यर्थः । तर्हि किं वयमेव याताः । गतसत्त्वा अभूमेत्यर्थः । पुनश्च तृष्णाः धनाशा न जीर्णाः न उपरता तर्हि किं वयमेव जीर्णाः जीर्णाः धनमिच्छन्त एव वृद्धत्वं प्राप्ता इत्यर्थः ॥ १३ ॥ ( १२ ) ॥

क्षान्तं न क्षमया गृहोचितसुखं त्यक्तं न संतोषतः
सोढा दुःसहशीतवाततपनक्लेशा न तप्तं तपः ।
ध्यातं वित्तमहर्निशं नियमितप्राणैर्न शंभोः पदं
तत्तत्कर्म कृतं यदेव मुनिभिस्तैस्तैः फलैर्वञ्चिताः ॥ १४ ॥

अस्माभिः तत्तत्कर्म आचरणं कृतं विहितं एव निश्चितं यत् मुनिभिः तपस्विभिः कृतं परं तु तैः तैः मुनिकृततपसः फलैर्लाभैः वयं वञ्चिताः रहिताः । तत्तपःफलं न अलभामहीत्यर्थः । तदेव कर्माह । अस्माभिः क्षान्तं क्षमितं परं क्षमया क्षान्त्या न । मुनयो हि क्षान्त्या क्षमया क्षमन्ते । अस्माभिर्न तथेति भावः । पुनः अस्माभिः गृहोचितसुखं गृहेषु आश्रमेषु यदुचितं योग्यं सुखं मधुरखाद्यपानश्लक्ष्णवसनपरिधानमनोहररथाश्वादिधनरमणीयाङ्गनाविलासादिजनितं सुखं त्यक्तं उज्झितं परं तु संतोषतः न । वैराग्येण अनुभूतं बहु अलमनेनेति संतोषणेनेत्यर्थः । ऋषिभिस्तु सुखं त्यक्तं तैस्तु संतोषेण वैराग्येण । अस्माभिर्न तथेति भावः । पुनः अस्माभिः दुःसहशीतवाततपनक्लेशाः दुःसहाः सोढुमशक्याः ये शीतं जाड्यं वातः समीरणः तपनः आतपः तैर्जनिताः क्लेशाः वसनगृहाद्यावरणाद्यातपत्राद्यभावेन दुःखानि सोढाः क्षमिताः । परं तु तपः न तप्तं न तपोबुद्ध्येत्यर्थः । मुनयस्तु

तपोबुद्ध्या क्लेशान्सहन्ते अस्माभिस्तु न तथेति भावः। तथास्माभिः अहर्निशं सदैव वित्तं धनं ध्यातं कदा बहु प्राप्स्यामीति चिन्तितं परं तु शंभोः श्रीमहादेवस्य पदं चरणं न ध्यातं किंलक्षणैः अस्माभिः नियमितप्राणैः नियमिताः ध्यानवशात् धनैकचित्तत्वेन निश्चलत्वं प्रापिताः प्राणाः श्वासा इन्द्रियाणि वा यैस्ते तथा तैः। लोभातिशयवशेन मनो निश्चलीकृत्य धनं ध्यायद्भिरित्यर्थः। मुनयो हि नियमितप्राणाः सन्तः श्रीमहादेवस्य चरणौ ध्यायन्ति वयं तु न तथेति भावः॥ १४॥

वलीभिर्मुखमाक्रान्तं पलितैरङ्कितं शिरः।
गात्राणि शिथिलायन्ते तृष्णैका तरुणायते॥ १५॥

अस्माकं अन्यस्य यस्य कस्यापि मुखं वदनं मुदा हर्षेण खनति दशति संभोगावसरेऽङ्गना तन्मुखं इति नाम। अत्र साभिप्रायं अतिमनोहरं श्लक्ष्णं सुबद्धं चेत्यर्थः। वलीभिः शिथिल(लि)तत्वग्भिः आक्रान्तं व्याप्तं तथा पलितैः जरसा शुक्लकेशैः शिरः मस्तकं अङ्कितं चिह्नितं। शिरः पलितधवलं जातमित्यर्थः। तथा गात्राणि हस्तपादाद्यवयवाः शिथिलायन्ते शिथिला भवन्ति। शिथिला इव आचरन्ति तानि शिथिलायन्ते। परं एका केवला तृष्णा धनाशा तरुणायते युवा तद्वदाचरतीति तथा। एतेन देहे जरसा व्याप्यमानेऽपि तृष्णा अतिमहती भवतीत्यर्थः॥ १५॥

येनैवाम्बरखण्डेन संवीतो निशि चन्द्रमाः।
तेनैव च दिवा भानुः पश्य दौर्गत्यमेतयोः॥ १६॥

येनैव अम्बरखण्डेन आकाशप्रदेशेन निशि रात्रौ चन्द्रमाः निशाकरः संवीतो वर्तते आवृतोऽभवत्। च पुनः तेनैव अम्बरखण्डेन दिवा दिवसे भानुः श्रीसूर्यः संवीत आवृतोऽस्ति। अहो इत्याश्चर्ये। हे जन त्वं एतयोः प्रसिद्धयोः तेजस्विनोर्महाग्रहयोश्चेत्यर्थः। दौर्गत्यं दुर्गतस्य दुःखितस्य भावः दौर्गत्यं दुःखस्थत्वं दुःखितत्वमित्यर्थः। पश्य अनवरतपरिभ्रमणे तयोरपि सुखं नास्तीति विलोकय जानीहीत्यर्थः। श्लेषे तु दौर्गत्यं दरिद्रत्वं 'अम्बरं व्योम्नि वासती'ति अमरोक्तेः। न अम्बरखण्डेन वस्त्रशकलेन कश्चित्संवीतो भवेत् तेनैव वस्त्रखण्डेनापरः यदा संवीतः आवृतो भवति तदा तयोर्दरिद्रत्वं दृश्यते इत्यर्थः। एतेन यदा देवेश्वरयोर्महातेजसोर्ग्रहनाथयोश्च दुर्ग(त)त्वं भवति तर्हि अन्यस्य दरिद्रत्वे किमाश्चर्यमिति भावः॥ १६॥

अवश्यं यातारश्चितरमुषित्वापि विषया
वियोगे को भेदस्त्यजति न जनो यस्त्वयममून्।
व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः
स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधते॥ १७॥

[ १ रा. टी. °धति ]

अवश्यं निश्चितं विषया विषि(सि)न्वंति बन्धयन्ति आसक्त्या जीवानिति विषया भोगाः चिरतरं अतिबहुकालं उषित्वा स्थित्वापि यातारः यान्ति गच्छन्तीत्येवंशीलाः गमिष्यन्ति। विनाशं प्राप्स्यन्तीत्यर्थः। यदा एवं वियोगो(गे)अवश्यं भाविनि सति यत् जनो जीवः स्वयमात्मनैव अमून्विषयान् त्यजति जहाति तदापि विषयवियोगे सति को भेदः को विशेषः स्वयं गतः स्वयं त्यक्तविषयाणां वियोगे विरहे किमन्तरं इत्यर्थः। स्वयंगतेषु विषयेषु विषयविरहः कथ्यते स्वयं त्यक्तेषु च विषयेषु विषयविरहः कथ्यते इति भावः। परं तु वियोगयोरयमेव विशेष इत्याह। ते विषयाः स्वातन्त्र्याद् स्वेच्छयैव व्रजन्तो गच्छन्तः त्यजन्त इत्यर्थः। मनसश्चित्तस्य अतुलपरितापाय अतुलोऽतिशयवान् यः परितापः खेदस्तस्मै भवन्ति। स्वयंगता विषयाः मनसि खेदं जनयन्तीत्यर्थः। हि निश्चितं एते विषयाः स्वयमात्मना त्यक्ताः उज्झिताः सन्तः अनन्तं अपरिमितं शमसुखं शान्तिरूपं सुखं विदधति कुर्वन्ति स्वयंत्यक्ताः विषयाः आत्मनः सुखाय भवन्तीत्यर्थः॥ १७॥

कृशः काणः खञ्जः श्रवणरहितः पुच्छविकलो
व्रणी पूयक्लिन्नः कृमिकुलशतैरावृततनुः।
क्षुधाक्षामो जीर्णः पिठरककपालार्पितगलः
शुनीमन्वेति श्वा हतमपि च हन्त्येष मदनः॥ १८॥

एष मदनः कामहतमपि पराभूतमपि हन्ति पराभवति यतः मदनेन पराभूतः एवंविधोऽपि श्वा सारमेयो अपि शुनीं स्वकान्तामन्वेति संभोगाय अनुसरति। तर्हि अन्यस्य नरस्य का कथेति भावः। किंलक्षणः श्वा कृशः दुर्बलः क्षीणमांस इत्यर्थः। पुनः किंलक्षणः श्वा काणः एकाक्षः। पुनः किंलक्षणः श्वा खञ्जः अङ्घ्रिविकलः। खोड इत्यर्थः। पुनः किंलक्षणः श्वा श्रवणरहितः श्रवणाभ्यां कर्णाभ्यां रहितः विनाकृतः वटछिन्नकर्ण इत्यर्थः। पुनः किंलक्षणः पुच्छविकलः। पुच्छेन लाङ्गूलेन विकलः रहितः छिन्नपुच्छ इत्यर्थः। पुनः किंलक्षणः श्वा व्रणी व्रणानि क्षि(क्ष)मयो विद्यन्ते यस्य स तथा। लोकैर्दृषदादिभिः प्रहृत्य कृतव्रण इत्यर्थः। पुनः किंलक्षणः श्वा पूयक्लिन्नः पूयेन परिजतरुधिरेण क्लिन्न आर्द्रः पुनः किंलक्षणः श्वा कृमिकुलशतैः कृमीणां कीटानां कुलानि समूहाः तेषां शतानि सहस्राणि तैः आवृततनुः आवृता व्याप्ता तनुः शरीरं यस्य स तथा। व्याप्तदेह इत्यर्थः। पुनः किंलक्षणः क्षुधाक्षामः क्षुधया बुभुक्षया क्षामः दुर्बलः भग्नः। क्षीणसत्त्व इत्यर्थः। पुनः किंलक्षणः श्वा जीर्णः वयसा वृद्धः। पुनः किंलक्षणः श्वा पिठरककपालार्पितगलः। पिठरकस्य भाण्डघटादेः कपालं कण्ठं अर्पितं आरोपितं गले ग्रीवायां यस्य स तथा कु त्रचित् केनापि प्रस्तावेन घटादिकण्ठकपालं गले बिभ्रदित्यर्थः। एतेन एवंदुरवस्थोऽपि श्वा तुच्छप्रशुरपि शुनीं कामभोगोपसेवया अनुगच्छति तर्हि सुखावस्थो दक्षश्च पुमान् कामाक्रान्तः सन् भार्यामनुगच्छति तत्र किमाश्चर्यमिति भावः॥ १८॥

भिक्षाशनं तदपि नीरसमेकवारं
शय्या च भूः परिजनो निजदेहमात्रम् ।
वस्त्रं विशीर्णपटखण्डमयी च कन्था
हा हा तथापि विषया न परित्यजन्ति ॥ १९ ॥

[ १ अ. विषयाश्च ]

अशनं भोजनं भिक्षाः याचनार्जितं जलं वर्तते तदपि नीरसं रज्जवर्जितं । अत्यादुरित्यर्थः । तदपि एकवारं न भूरित्वेन बहुवारमित्यर्थः । महादरिद्रस्य पुरुषस्येत्यर्थः । च पुनः भूः पृथिवी शय्या शयनं वर्तते । एतेन भिक्षामटित्वा भुक्ते भूमौ च शेते इत्यर्थः । तथा तस्य निजदेहमात्रं स्वशरीरमेव परिजनः परिवारः एतेनैकाकीत्यर्थः । च पुनः विशीर्णपटखण्डमयी विशीर्णाः जीर्णाः ये पटाः वस्त्राणि तेषां खण्डाः शकठानि तन्मयी तैर्विरचिता कन्था चीरखण्डोत्थकन्थुकः वस्त्रं परिधानं । एतेन कन्थां परिधत्ते इत्यर्थः । हा हा इति खेदे तथापि विषयाः भोगाद्यक्तयः पुरुषान्न परित्यजन्ति । एतेन महादरिद्रो दुरवस्थामनुभवन्नपि विषयान्मोक्तुमिच्छतीत्यर्थः ॥ १९ ॥

स्तनौ मांसग्रन्थी कनककलशावित्युपमितौ
मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।
स्रवन्मूत्रक्लिन्नं करिवरकरस्पर्धिजघनं
मुहुर्निन्द्यं रूपं कविजनविशेषैर्गुरु कृतम् ॥ २० ॥

अहो इत्याश्चर्ये नारीणां निन्द्यं अतिविगर्हं रूपं कामिनविशेषैः कविजनानां श्रेष्ठकवीनां विशेषैः विशेषवचनैः गुरु श्रेष्ठं कृतं वर्णितं । यतः स्तनौ कुचौ इति अमुना प्रकारेण उपमितौ उपमा जाता ययोस्तौ । तथा कृतोपमावित्यर्थः । इतीति किं कनककलशौ इति सुवर्णकुम्भाविति किंलक्षणौ स्तनौ मांसग्रन्थी मांसस्य पिशितस्य ग्रन्थी । संघातरूपौ पिण्डावित्यर्थः । तथा मुखं वदनं तदपि शशाङ्केन चन्द्रमसा तुलितं समीकृतं किंलक्षणं वदनं श्लेष्मागारं श्लेष्मणः कफस्यागारमाश्रयः श्लेष्ममयमित्यर्थः । तथा जघनं जङ्घाद्वयपुरोभागः इत्यर्थः । करिवरकरस्पर्धि करिवरस्य श्रेष्ठमतङ्गजस्य करेण शुण्डादण्डेन स्पर्धते संघृष्यतीति तथा रमणीयत्वेन वर्तुलायतत्वेन च मतङ्गजहस्तेन स्पर्धमानं किंलक्षणं जघनं स्रवन्मूत्रक्लिन्नं स्रवत् सर्वदा क्षरत् यन्मूत्रं प्रस्रावः तेन क्लिन्नं आर्द्रं उच्चारार्द्रमित्यर्थः । एतेनातिमेध्यमनोहरकनकमृगाङ्गकरिकरैः सह नारीणां स्तनवदनजघनानि तुल्यतया वर्णयन्तः कवयोऽतिविमूढचित्ताज्ञानान्विषयेषु प्रवर्तयन्तो निन्द्या इति भावः ॥ २० ॥

फलमलमशनाय स्वादु पानाय तोयं
शयनमवनिपृष्ठं वल्कले वाससी नुं
नवधनमधुपानभ्रान्तसर्वेन्द्रियाणा-
मविनयमनुमन्तुं नोत्सहे दुर्जनानाम् ॥ २१ ॥
[१ अ. तु.]

अहं दुर्जनानां खलानां अविनयं दुर्वचनाद्यविवेकं अनुमन्तुं अङ्गीकर्तुं सोढुमित्यर्थः । न उत्सहे न शक्नोमि । सोढुममर्थोऽस्मीत्यर्थः । किंलक्षणानां दुर्जनानां नवधनमधुपान भ्रान्तसर्वेन्द्रियाणां नवं नूतनं यद्धनं द्रविणप्राप्तिः तदेव मधुपानं मदिरापानं तेन भ्रान्तानि स्थानाच्चलितानि विमूढानीत्यर्थः । सर्वाणि सकलानि इन्द्रियाणि मनश्चक्षुःश्रोत्रादीनि येषां ते तथा तेषां । यतः "अवंशपतितो राजा मूर्खपुत्रो हि पण्डितः । निर्धनश्च धनं प्राप्तस्तृणवन्मन्यते जगत्" ॥ १ ॥ इति कारणात् नवधनप्राप्त्या अतिगर्वितानामित्यर्थः । ननु तान्विहाय भोजनपानशयनवसनादि । कोऽन्यो ददातीति चेत्तत्राह । यतः अशनाय भोजनाय फलं वृक्षादिजनितं बीजादि अलं पर्याप्तं । फलमित्युपलक्षणं तेन मूलपत्रपुष्पबीजादि गृह्यते । अशनं तु वृक्षादिभ्यः प्राप्यते इत्यर्थः । तथा पानाय पीतये स्वादु मधुरं तोयमुदकं अलं । स्थाने स्थाने पर्याप्तं । तथा शयनं शय्या अवनिपृष्ठं भूतलं वर्तते । पृथिव्यां शय्यते (शीयते) इत्यर्थः । वल्कले तरुत्वचौ वाससी वस्त्रे भवतः । ननु निश्चितं ॥ २१ ॥

अजानन्दाहात्म्यं पततु शलभस्तीव्रदहने
स मीनोऽप्यज्ञानाद्बिडिशयुतमश्नातु पिशितम् ।
विजानन्तोऽप्येते वयमिह विपज्जालजटिला-
न्न मुञ्चामः कामानहह गहनो मोहमहिमा ॥ २२ ॥

शलभः पतङ्गः दाहात्म्यं दहति भस्मीकरोतीति दाहः दाहः दाहकः आत्मा स्वरूपं यस्य सः दाहात्मा दाहात्मनो भावः दाहकत्वमजानन् अविदन् सन् अज्ञानादित्यर्थः । तीव्रदहने दुःसहवैश्वानरे पततु पतत्तात् । अत्र लिङर्थे लोट् पतेदिति संभावना । सः प्रसिद्धः मीनोऽपि मत्स्योऽपि निश्चितं पिशितं मांसं अश्नातु अश्नीतात् भक्षयतु अत्रापि संभावनायां लोट् । कुतः अज्ञानात् मरणायेदं मांसमित्यविवेकादित्यर्थः । किंलक्षणं पिशितं बिडिशयुतं बिडिशेन मत्स्यबन्धनेन सुलोहकण्टकेन अन्वितं । एते वयं इह संसारे कामान्विषयान्विपज्जालजटिलान् विषदां कष्टानां जालेन समूहेन जटिलाः उद्बद्धाः तान् एवंविधान् विजानन्तोऽपि विशेषेण विदन्तोऽपि न मुञ्चामः न

स्वजामः । अपिशब्देन पतङ्गमीनाभ्यामपि वयमधमा इत्यर्थः । तौ तु अज्ञानिनौ सन्तौ विषयान्वेवन्ते वयं तु जानाना अपि सेवेमहे ( सेवामहे ) अतो मन्दा इति भावः ॥ २२ ॥

विपुलहृदयैर्धन्यैः कैश्चिज्जगज्जनितं पुरा
विधृतमपरैर्दत्तं चान्यैर्विजित्य तृणं यथा ।
इह हि भुवनान्यन्ये धीराश्चतुर्दश भुञ्जते
कतिपयपुरस्वाम्ये पुंसां क एष मदज्वरः ॥ २३ ॥

कैश्चिद्धन्यैर्महाभाग्यैः तथा विपुलहृदयैः विपुलं महत् हृदयं चित्तं येषां ते तथा तैर्महोदारैरित्यर्थः । पुरुषैः पुरा पूर्वं जगत् विश्वं जनितमुत्पादितं । तथा अपरैर्धन्यैः विश्वं विधृतं पालितमित्यर्थः । च अन्यत् अन्यैर्धन्यैः तृणं यथा तृणमिव विजित्य जित्वा दत्तं अर्थिभ्योऽर्पितं । हि निश्चितं अन्ये अपरे धीराः धीमन्तः धीरा वा चतुर्दश चतुर्भिरधिकानि दश भुवनानि विश्वानि भुञ्जते स्वयं प्रभुत्वेनानुभवन्ति तर्हि कतिपयपुरस्वाम्ये कतिपयानां पुराणां नगराणां ग्रामाणां वा स्वाम्ये स्वामित्वे सति पुंसां पुरुषाणां कः एष मदज्वरः मद एव ज्वरः रोगः । एतेन केपि पुरुषा जगज्जनयितारः केचित्पालयितारः अभवन् केचिद्धारयितारश्च अभवन् । केचिद्भोक्तारोऽभवन् भवन्ति च । तर्हि कतिपयग्रामाणां स्वामित्वे पुंसां को गर्व इति भावः ॥ २३ ॥

त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नताः
ख्यातस्त्वं विभवैर्यशांसि कवयो दिक्षु प्रतन्वन्ति नः ।
इत्थं मानद नातिदूरमुभयोरप्यावयोरन्तरं
यद्यस्मासु पराङ्मुखोऽसि वयमप्येकान्ततो निःस्पृहाः॥२४॥

त्वं राजा नृपोऽपि चेत् तर्हि वयमपि उपासितगुरुप्रज्ञाभिमानोन्नताः उपासिताः सेविता गुरवः उपाध्यायाः यैस्ते उपासितगुरवः तथा प्रज्ञायाः बुद्धेः अभिमानेन उन्नताः उच्चाः उपासितगुरवश्च ते प्रज्ञाभिमानोन्नताश्च ते तथा । गुरूनुपास्य प्रज्ञागर्वेण महान्त इत्यर्थः । त्वं राजत्वान्महान् वयमपि विद्वत्तया महान्त इत्यर्थः । तथा त्वं विभवैः समृद्धिभिः ख्यातः प्रसिद्धः नो अस्माकमपि यशांसि कीर्तीः कवयः कोविदाः विद्वांसश्च दिक्षु दिशासु विषये प्रतन्वन्ति विस्तारयन्ति । एतेन त्वं धनैः प्रसिद्धः वयमपि विद्वत्तया दिक्षु प्रसिद्धा इत्यर्थः । हे मानद हे महन् इत्यमनुना प्रकारेण आवयोः उभयोरपि द्वयोरपि अन्तरं विशेषः नातिदूरं न अतिभेदेन । आवयोर्भेदो नास्तीत्यर्थः । यदि चेत् अस्मासु विषये त्वं पराङ्मुखः असि असंमुखः वर्तसे तर्हि वयमपि एकान्ततः निश्चयेन निःस्पृहाः गतस्पृहाः स्मः यदि त्वं अस्मान्प्रति पराङ्मुखः असि तर्हि वयमपि विशेषेण पराङ्मुखा इत्यर्थः ॥ २४ ॥

अभुक्तायां यस्यां क्षणमपि न यातं नृपशतै-
र्भुवस्तस्या लाभे क इव बहुमानः क्षितिभुजाम् ।
तदंशस्याप्यंशे तदवयवलेशेऽपि पतयो
विषादे कर्तव्ये विदधति जडाः प्रत्युत मुदम् ॥ २५ ॥

क्षितिभुजां राज्ञां तस्या भुवः लाभे सति प्राप्तौ सत्यां क इव बहुमानः अतिगर्वः क इव भवति । तस्याः कस्याः यस्यां पृथिव्यां नृपशतैः राज्ञां सहस्रैः क्षणमपि अभुक्तायां अनुपभुक्तायां सत्यां न यातं न गतं । यां बहवो राजानः सेवन्ते इत्यर्थः । यद्वा नृपशतैः यस्यां अभुक्तायां सत्यां न यातं । अपि तु यातमेव यां पूर्णां अनुपभुज्यैव नृपसहस्रैर्मृतमित्यर्थः । तत्तस्मात्कारणात् अस्याः भुवः अंशेऽपि भागमात्रेऽपि तथा तदवयवलेशेऽपि तस्य अंशस्य अवयवः एकदेशः तस्य लेशः कश्चिदपि उर्वरितो( तः ) सन् तस्मिन्नपि पतयः स्वामिनो जडाः विषादे खेदे कर्तव्ये करणीये सति जडाः मूर्खाः प्रत्युत वैपरीत्येन मुदं आनन्दं विदधति कुर्वन्ति । विशेषेण धारयन्तीत्यर्थः । ये किल समग्रां पृथिवीं अभुञ्जन् तेऽपि कालेनोपसंहृताः । ये तु तदंशांशलेशे प्रभुत्वमनुभवन्ति तेऽसंपूर्णभूभोगेऽपि आनन्दधारणात् मूर्खा इति भावः ॥ २५ ॥

मृत्पिण्डो जलरेखया परिवृतः सर्वोऽप्ययं नन्वणु-
स्त्वंशीकृत्य स एव संयुगशतै राज्ञां शतैर्भुज्यते ।
ते दद्युर्ददतेऽथ वा न किमपि क्षुद्रा दरिद्रा भृशं
धिग्धिक्तान्पुरुषाधमान्धनकणं वाञ्छन्ति तेभ्योऽपि ये॥२६॥

[१ अ. 'स्त्वङ्गीकृत्य']

अयं मृत्पिण्डः मृत्तिकासंघातः भूमिरित्यर्थः । जलरेखया समुद्रोदकराज्या सर्वोऽपि वलयितः परिवेष्टितः वर्तते ननु निश्चितं स एव मृत्पिण्डः राज्ञां गणैः भूपतीनां समूहैः अंशीकृत्य विभागीकृत्य संयुगशतैः संग्रामसहस्रैः कृत्वा भुज्यते । भूपतयः संग्रामान् विधाय यं विभज्य भुञ्जतीत्यर्थः । ते राजानः केभ्य इति शेषः । किमपि दद्युः विश्राणनं कुर्युः । अथ पश्चात्ते केभ्योऽपि किंचिद्ददते अर्पयन्ति वा अथवा न अर्पयन्ति तेन किमपि केऽपि न भवन्ति अतितुष्टा इत्यर्थः । अत एव ते क्षुद्राः तुच्छाः अत एव भृशं अत्यर्थं दरिद्राः दुर्विधा भवन्ति । तेभ्योऽपि ये पुरुषाः धनकणं धनलेशं वाञ्छन्ति अभिलषन्ति तान्पुरुषाधमान् नरापसदान् धिक् धिगस्तु ते इति । निन्द्या भवन्त्वित्यर्थः ॥ २६ ॥

न नटा न विटा न गायना न परद्रोहकृतैकबुद्धयः ।
स्तनभारानमिता न योषितो नृपसद्मसु नाम के वयम् ॥२७॥

[१ रा. मु. 'विगायना' अ. शोधनात्पूर्वं तथा.]

नाम इति निश्चितं संबोधने वा नृपसभासु भूपतिमन्दिरेषु वयं के अपि तु न केऽपि अत्यन्तपर्यन्तत्वेन तुच्छत्वात् कथापि मात्रया न गणनीया इत्यर्थः । अथ वा राजमण्डलस्यातितुच्छत्वाद्वयं सभ्याः के राजमण्डलस्यायोग्यत्वाद्वयमसदृशा इत्यर्थः । तदेवाह यतः वयं नटाः नाट्यकर्तारः न भवामः चेन्नटा भवेम तर्हि राजकुलयोग्याः स्मः अतो न तद्योग्याः स्म इत्यर्थः । अथ विटाः स्निग्धाः वयं न पुनः गायनाः गेयकर्तारोऽपि न । च पुनः परप्रोक्तकवुद्धयः परेषां अन्येषां जीवानां द्रोहाय उपद्रवाय कृता निश्चिता एका अव्यभिचारिणी बुद्धिर्मतिर्येषां ते तथा । परेषां द्रोहाय मतिं न दद्म(ध्म) इत्यर्थः । तथा स्तनभरेण कुचगौरवेण आ ईषत् नमिताः नम्राः स्तनभारानमिताः योषितः रम्यस्त्रियोऽपि न भवेम येन राजकुलयोग्याः स्मः इत्यर्थः । एतेन राजकुलस्य पापरूपत्वाद्वयमयोग्या इत्यर्थः ॥ २७ ॥

स जातः कोऽप्यासीन्मदनरिपुणा मूर्ध्नि धवलं
कपालं यस्योच्चैर्विनिहितमलंकारविधये ।
नृभिः प्राणत्राणप्रवणमतिभिः कैश्चिदधुना
नमद्भिः कः पुंसामयमतुलदर्पज्वरभरः ॥ २८ ॥

स कोऽपि अनिर्वचनीयचरित्रः जातः उत्पन्न आसीत् बभूव । स कः यस्य धवलं उज्ज्वलं कपालं शिरः मदनरिपुणा श्रीमहादेवेन उच्चैः अतिशयेन मूर्ध्नि मस्तके अलंकारविधये अलंकारस्य शृङ्गारस्य विधिः करणं तस्मै विभूषणकरणाय विनिहितं आरोपितं आसीत् । यदान्यानां जितेन्द्रियाणां सत्यसंधानां शूराणां च युद्धे निहि(ह)तानां शिरांसि श्रीमहादेवः शिरसि बिभर्तीत्यागमः । एतेनैवंविधोऽपि कश्चिदासीत् यस्य शिरो भगवान् श्रीमहादेवोऽपि आभरणाय मस्तके बिभर्तीत्यर्थः । पुनः प्राणत्राणप्रवणमतिभिः प्राणानां असूनां त्राणाय रक्षणाय प्रवणा एकाग्रा मतिर्बुद्धिर्येषां तथा तैः प्राणरक्षणपरायणैः औदा(द)रिकैरित्यर्थः । नृभिः पुरुषैः अधुना इदानीं नमद्भिः नमस्कुर्वद्भिः सेवयद्भिरित्यर्थः । सद्भिः पुंसां पुरुषाणां अयमतुलदर्पज्वरभरः अतुलो महान् यो दर्पो गर्वः स एव ज्वरो व्याधिः तस्य भरोऽतिशयः अतिगर्वज्वरः कः किमर्थं भवति इति शेषः । एतेन तेषां महतां अग्रे अल्पेश्वर्याः पुंमांसः के इति भावः ॥ २८ ॥

अशीमहि वयं भिक्षामाशावासो वसीमहि ।
शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः ॥ २९ ॥
[ १ रा. टी. अशीमहि ]

वयं भिक्षां सद्द्विजप्रार्थितान्नादि अश्नीमहि अथाम चेदिति शेषः । तथा वयं चेत् आशावासः आशा दिक्ष्व एव वासः वसनं वसीमहि परिदध्याम । दिगम्बरा जाता इत्यर्थः । तथा महीपृष्ठे भूतले शयीमहि स्वप्याम तर्हि वयं ईश्वरैः आढ्यैः प्रभुभिर्वा किं कुर्वीमहि किं कुर्याम किं प्रयोजनं । एतेन विमुक्तदेहाभिमानानां शान्तानामात्मारामाणां च किं विषयोपभोगैरिति भावः ॥ २९ ॥

अर्थानामीशिषे त्वं वयमपि च गिरामीश्महे वावदूकां
शूरस्त्वं वाग्मिदर्पज्वरशमनविधावक्षयं पाटवं नः ।
सेवन्ते त्वां मदान्धा मतिमलहतये मामपि श्रोतुकामा
मय्यप्यास्था न ते चेत्त्वयि मम सुतरामेष राजन्गतोऽस्मि॥३०॥

हे राजन् नृपते त्वं अर्थानां धनानां ईशिषे ईश्वरोऽसि चेत्तर्हि वयमपि गिरां वाचीनां शास्त्राणामित्यर्थः । ईश्महे ईश्वराः स्मः यावत् साकल्येनेत्थममुना प्रकारेण त्वं शूरः वीरोऽसि तर्ह्यपि आवयोस्तुल्यत्वमस्तीत्याह यतः न अस्माकं वाग्मिदर्पज्वरशमनविधौ वाग्मिनां वावदूकानां विदुषां दर्पो गर्व एव ज्वरः रोगः तस्य शमनं नाशनं तस्य विधिः विधानं तस्मिन्विषये अक्षयं न क्षयो नाशो यस्य तत् अविनश्वरं पाटवं पटोर्भावः समर्थत्वं । तथा मदान्धाः मदेन उन्मत्तत्वेन अज्ञानेनेत्यर्थः । अन्धाः जडाः त्वां सेवन्ते उपासते चेत्तर्हि श्रोतुकामाः श्रोतुं कामोऽभिलाषो येषां ते तथा शास्त्रश्रवणेप्सवः मामपि सेवन्ते किमर्थं मतिमलहतये मतेः बुद्धेः मलः कालुष्यं हृतिर्विनाशस्तस्यै बुद्धिवैशद्यायेत्यर्थः । चेत् यदि ते तव मयि विषये आस्था न आदरो न वर्तते तर्हि त्वयि सुतरां अतिशयेन आस्था नास्ति । एवं सति हे राजन् एषः अहं गतोऽस्मि निर्गतोऽस्मि । आगतोऽस्मीति वा । एतेन त्वं यथेच्छं कुर्वित्यर्थः । एतेन निःस्पृहाः विद्वांसश्च प्रभवश्च रमाना एवेति कृत्वा विदुषां निःस्पृहाणां च किं प्रभुभिर्भवतीत्यर्थः ॥ ३० ॥

यदा किंचिज्ज्ञोऽहं गज इव मदान्धः समभवं
तदा सर्वज्ञोऽस्मीत्यभवदवलिप्तं मम मनः ।
यदा किंचित्किंचिद्बुधजनसकाशादवगतं
तदा मूर्खोऽस्मीति ज्वर इव मदो मे व्यपगतः ॥ ३१ ॥

यदा यस्मिन्समये अहं किंचिज्ज्ञः किंचिदल्पं जानातीति तथा । समभवं संजातः तदा तस्मिन्समये मदान्धः मदेन ज्ञानधनयौवनाभिजननविधानेश्वर्यजनितेन अन्धः अन्ध इव अचक्षुरिव अन्धः । अविवेकीत्यर्थः । समभवं क इव गज इव मतङ्ग इव यथा स मदान्धो भवति तदा मम मनः चित्तं इति अमुना प्रकारेण अवलिप्तं सगर्वं अभवत् । इतीति किं सर्वज्ञोऽस्मीति सर्वं श्रुतिशास्त्रार्थं जानाति वेत्तीति तथा । अहमेव सर्वशास्त्रार्थवेत्तेत्यर्थः । पुनः मया यदा बुधजनसकाशात विद्वज्जनेभ्यः गुरुभ्यः अवगतं किंचित्किंचिदिति स्तोकं स्तोकं शान्तिवैराग्यप्रतिपादकं शास्त्रमित्यर्थः । ज्ञातं तदा इति कृत्वा मे मम मदः सर्वज्ञोऽस्मि इत्याभिमानः व्यपगतः नष्टः क इव ज्वर इव । रुद्रकोपोद्भवश्चापिरिव स यथा नश्यति तद्वदित्यर्थः ॥ ३१ ॥

धाने म्लायिनि खण्डिते च वसुनि व्यर्थं प्रयातेऽर्थिनि
क्षीणे बन्धुजने गते परिजने नष्टे शनैर्यौवने ।
युक्तं केवलमेतदेव सुधियां यज्जह्नुकन्यापयः-
पूतग्रावगिरीन्द्रकन्दरदरीकुञ्जे निवासः क्वचित् ॥ ३२ ॥

सुधियां सुबुद्धीनां विवेकिनामित्यर्थः पुरुषाणां एव निश्चितं एतत् इदं कर्म केवलं युक्तं युक्तं योग्यं । एतत् किं यत् क्वचित् कस्मिंश्चित् जह्नुकन्यापयःपूतग्रावगिरीन्द्रकन्दरदरीकुञ्जे जह्नुकन्यायाः जाह्नव्याः गङ्गायाः पयसा जलेन पूताः पवित्रिताः ग्रावाणो यत्रत्यः येषां ते जह्नुकन्यापयःपूतग्रावाणः एवंविधाश्च ते गिरीन्द्राः महागिरयः हिमाळयाः तत्रत्य कन्दरा गह्वरप्रदेशाः दर्यो गुहाश्च तथा कुञ्जाः लतादिपिहितोदरप्रदे(दे)शाश्च तेषां समाहारः कन्दरदरीकुञ्जं जह्नुकन्यापयःपूतग्रावगिरीन्द्राणां कन्दरदरीकुञ्जं तस्मिन्विषये निवासः निवसनव्यं तदटते इत्यर्थः । क्व सति माने अहं दाता शूरः गुणी सुन्दरः कुलीनः श्लाघ्य इत्याद्यभिमाने ग्लाने वार्धक्येनाशक्त्या च नष्टप्राये सति पुनः क्व सति वसुनि धने खण्डिते भ्रातृपुत्रादिभिर्विभज्य गृहीते च सति पुनः क्व सति अर्थिभिर्याचकैर्ब्राह्मणवन्दिप्रभृतिभिर्व्यर्थं निःफलं यथा स्यात्तथा किंचिदपि अप्राप्येत्यर्थः । प्रयाते गते सति पुनः क्व सति बन्धुजने बन्धूनां सुहृदां ज्ञातीनां संबन्धिनां जने समूहे अथवा बन्धुलोके क्षीणे नष्टत्वे सति बन्धुजनानां नष्टधनत्वे सति स्वयं किमपि दातुमशक्तेस्ततो गृहाद्गमनमेवातिश्रेय इत्यर्थः । पुनः क्व सति परिजने सेवकजने गते जीवितुं कुत्रापि याते सति । ननु तर्हि पुनरुद्यमं विधाय द्रविणमर्जयित्वा बन्धुजन्याचकादिजनान्तमुद्धरेदित्याशङ्क्याह । पुनः क्व सति यौवने यूनो भावः यौवनं तस्मिन् तारुण्ये शनैः मन्दं मन्दं प्रत्यहमित्यर्थः नष्टे नाशं प्राप्ते सति ॥ ३२ ॥

परेषां चेतांसि प्रतिदिवसमाराध्य बहुधा
प्रसादं किं नेतुं विशसि हृदय क्लेशकलिलम् ।
प्रसन्ने त्वय्यन्तःस्वयमुदितचिन्तामणिगुणे
विमुक्तः संकल्पः किमभिलषितं पुष्यति न ते ॥ ३३ ॥

हे हृदय हे चित्त त्वं परेषां अन्येषां लोकानां चेतांसि चित्तानि प्रसादं प्रसन्नतां नेतु किं विशसि किं प्रविशसि अन्योऽपि चूर्णादिः पदार्थः जलानि प्रसादं नेतुं अन्तः प्रविशति किं कृत्वा विशसि प्रतिदिवसं अहरहः बहुधा बहुभिः प्रकारैः आराध्य सेवित्वा संतोष्येत्यर्थः । किंलक्षणं त्वां क्लेशकलिलं क्लेशेन परचित्तारधनजनितदुःखेन कलिलं व्याप्तं बहुदुःखाकुलमित्यर्थः । पुनः हे चित्त त्वयि भवति स्वयं अन्तर्मध्ये प्रसन्ने गतरागादिकषायमले सति विमुक्तः त्यक्तः संकल्पः मानसं कर्म स एव मलः ते तव किमभिलषितं

न पुष्यति कं अभिलाषं न पुष्णाति । किंलक्षणे त्वयि उदितचिन्तामणिगुणे उदितः उत्पन्नः चिन्तामणेः चिन्तारत्नस्य स्वभावो यस्य तत्तथा तस्मिन् यद्रत्नं हि चिन्तितमात्रेण सर्वान्मनोरथान्पूरयति तथा त्वयि प्रसन्ने मम सर्वे मनोरथा आनन्दसंतोषाधिगमाढ्याः प्राप्ताः भविष्यन्ति ॥ ३३ ॥

अनावर्ती कालो व्रजति स वृथा तन्न गणितं
दशास्तास्ताः सोढा व्यसनशतसंपातविधुराः ।
कियद्वा वक्ष्यामः किमिव बत नात्मन्यपकृतं
त्वया यावत्तावत्पुनरपि तदेव व्यवसितम् ॥ ३४ ॥

हे हृदय त्वया तद् न गणितं तत् न विचारितं तत्किं यत् अनावर्ती पुनरनागच्छन् कालः क्षणमुहूर्तप्रहरदिवारात्रपक्षमासर्त्वयनसंवत्सरादिः । अवसरः व्रजति गच्छतीति कथं व्रजति वृथा व्यर्थं यथा तथा दानदमदयाभगवद्भजनाद्यकरणेन निरर्थकमित्यर्थः । तथा त्वया ताः ताः अतिप्रसिद्धत्वेनानुभूताः दश अवस्थाः सोढाः क्षान्ताः तर्हि दशाः समीचीनाः भविष्यन्ति न । किंलक्षणाः दशाः व्यसनशतसंपातविधुराः व्यसनानां पुत्रकलत्रद्रविणादिवियोगोत्थकष्टानां शतानि सहस्राणि तेषां संपातः आगमनं तेन विधुराः विधुरयन्ति दुःखयन्ति ताः विधुराः अतिदुःसहा इत्यर्थः । वा अथवा कियद्वक्ष्यामः अत्र वर्तमानार्थे भविष्यत्प्रयोगः कियद्वदामः. बतेति खेदे त्वया आत्मनि स्वस्मिन् किमिव किमु न अपकृतं कः अपकारः न कृतः कथं यावत्साकल्येन तावत्प्रथमं त्वया पुनरभूयोऽपि तदेव आत्मनि अपकृतमेव व्यवसितं कर्तुमारब्धं अतस्त्वं मूढमित्यर्थः ॥ ३४ ॥

अमीषां प्राणानां तुलितविशिनीपत्रपयसां
कृते किं नास्माभिर्विगलितविवेकैर्व्यवसितम् ।
यदाढ्यानामग्रे द्रविणमदनिःसंज्ञमनसां
कृतं वीतव्रीडैर्निजगुणकथापातकमपि ॥ ३५ ॥

अस्माभिः अमीषां एतेषां प्राणानां असूनां कृते तदर्थं प्राणरक्षणार्थमित्यर्थः । किं न व्यवसितं किं न कर्तुमारब्धं किंलक्षणैरस्माभिः विगलितविवेकैः विगलितः गतः विवेकः तत्त्वबोधः येभ्यस्ते विगलितविवेकास्तैः अज्ञातैरित्यर्थः । तर्हि प्राणाः अविनश्वराः स्थिराश्च भविष्यन्तीत्याह । किंलक्षणानां प्राणानां तुलितविशिनीपत्रपयसां । तुलितं चलत्वेन समीकृतं विशिनीपत्रस्य कमलिनीपर्णस्य पयः उदकं यैस्ते तुलितविशिनीपत्रपयसस्तेषामस्थिरत्वेन कमलिनीदलजलसदृशानामित्यर्थः । कमलिनीदलाज्जलं हि सद्यः अधः पतति तत्सदृशानां । यत् यस्मात्कारणात् आढ्यानां अग्रे धनवतां पुरस्तात् वीतव्रीडैः वीता गता व्रीडा

ऊर्ध्वा वेभ्यस्ते तथा तैः एवंभूतैरस्माभिः निजगुणकथापातकमपि निजाः आत्मीयाः ये गुणाः वैदुष्यौदार्यशौर्यचातुर्यप्रभृतयः तेषां कथा कथनं तदेव पातकं पापं अपि कृतं विहितं स्वमुखा गुणाः पापाय भवन्ति यतः स्वयं कीर्तिता गुणाः युवतीकुचाश्च न शोभन्ते इति भावः किंक्षणानां आढ्यानां द्रविणमदनिःसंज्ञमनसां द्रविणमदेन धनमदेन निःसंज्ञं गतज्ञानं मनश्चित्तं येषां ते तथा तेषां धनजनितमदेन मतविवेकानामित्यर्थः ॥ ३५ ॥

भ्रातः कष्टमहो महान्स नृपतिः सामन्तचक्रं च त-
त्पार्श्वे तस्य च सापि राजपरिषच्चाश्चन्द्रबिम्बाननाः ।
उद्रिक्तः स च राजपुत्रनिवहस्ते वन्दिनस्ताः कथाः
सर्वं यस्य वशादगात्स्मृतिपदं कालाय तस्मै नमः ॥ ३६ ॥

हे भ्रातः हे सखे तस्मै जगद्भक्षकत्वेनातिप्रसिद्धाय कालाय नमः नमस्कारोऽस्तु तस्मै कस्मै इति चेदुच्यते । यस्य वशात् क्रीडीकरणात् बलादित्यर्थः । एतत्सर्वं सकलं पदार्थजातं स्मृतिपदं स्मृतेः स्मरणस्य वार्तामात्रस्य पदं स्थानं वार्तामात्रेण कथ्य(था) भावेन कथ्यमानत्वमित्यर्थः । जगात् गतं प्राप्तमित्यर्थः । अनुभवविषयाः पदार्थाः स्मरणीयाः जाताः । मृता इत्यर्थः सर्वं किं अहो इति आश्चर्ये । स महान् सैन्यधनादिभिरतिसमृद्धः स नृपतिः भूपतिः कुत्रापि गत इति शेषः । च पुनः तत् अतिशोभास्पदं सामन्तचक्रं सामन्तानां पार्ष्णिग्राहाक्रन्दवातव्यादीनां तन्निकटवर्तिनामित्यर्थः चक्रं मण्डलं कुत्रापि गतं च अन्यत् तस्य नृपतेः पार्श्वे सा च प्रसिद्धा राजपरिषत् विद्वद्गणघनाढ्यत्वात् (!) जनावृपलक्षिता राजसभा च कुत्रापि गतेति शेषः अन्यच्च ताः सौन्दर्यचातुर्यसौगन्ध्यावृपलक्षिताः चन्द्रबिम्बाननाः चन्द्रमण्डलसदृशवदनाः स्त्रियश्च कुत्रापि गताः च अन्यत् स राजपुत्रनिवहः राजपुत्राणां नृपतितनयानां क्षात्रियविशेषाणां वा निवहः समूहः कुत्रापि गतः । किंक्षणः राजपुत्रसमूहः उद्रिक्तः क्रीडातशेन उच्छृङ्खलः उत्कटो वा पुनः ते कवित्वकृतत्वेनातिप्रसिद्धाः वन्दिनः स्तावकाः वैतालिकचारणादयः कुत्रापि गताः । पुनस्ताः शुक्लारवीरकरुणाद्भुतहास्यभयानकाः बीभत्सरौद्रादिरसैरुत्कृष्टरमणीयत्वेनातिप्रसिद्धाः कथाः कथानकानि तत्र सभायां क्रियमाणाः वार्ताः कुत्रापि न भूयन्ते इत्यर्थः । एतेनातिमहान्काल इति भावः ॥ ३६ ॥

वयं येभ्यो जाताश्चिरमपगता एव खलु ते
समं यैः संवृद्धाः स्मृतिविषयतां तेऽपि गमिताः ।
इदानीमेते स्मः प्रतिदिवसमासन्नपतना
गतास्तुल्यावस्थां सिकतिलनदीतीरतरुभिः ॥ ३७ ॥

खलु निश्चितं वयं येभ्यः पितृमात्राद्रिभ्यः जाता उत्पन्नाः अभूम ते चिरं चिरकालादेव अपगता एव कुत्रापि गताः । मृता इत्यर्थः । पुनः येः सम सह संवृद्धाः वृद्धिं प्राप्ताः क्रीडिता इत्यर्थः तेऽपि स्मृतिविषयतां स्मृतेर्विषयः स्मृतिविषयः तस्य भावस्तत्तां तां स्मरणीयत्वं वार्तामात्रशेषत्वामित्यर्थः । गमिताः प्रापिताः कालेनेति शेषः । इदानीं अधुना वयं एते स्मः भवामः जीवाम इत्यर्थः । किंलक्षणा वयं प्रतिदिवसं प्रतिदिनं आसन्नपतनाः आसन्नं निकटवर्ति पतनं मरणं येषां ते तथा मरिष्यन्त इत्यर्थः । अत एव पुनः किंलक्षणाः सिकतिलनदीतीरतरुभिः सिकतिलं वालुकामयं यत् नदीतीरं तरङ्गिणीतटं तत्र वर्तमाना ये तरवो वृक्षाः तैस्तुल्यावस्थां तुल्या सदृशी चासौ अवस्था दशा च तां सदृशदशत्वं गताः प्राप्ताः सिकतिलसरित्तीरतरवो हि प्रतिदिवसं वारिरयेण दीर्यमाणासु मूलवालुकासु सतीषु आसन्नपतनाः स्वल्पकालेन पातिनो भवन्ति तथा वयमपि प्रतिक्षणं कालेनायुषि छिद्यमाने सति निकटवर्तिमरणा भवाम इत्यर्थः ॥ ३७ ॥

**यत्रानेकाः क्वचिदपि गृहे तत्र तिष्ठत्यथैकों**
**यत्राप्येकस्तदनु बहवस्तत्र चान्ते न चैकः ।**
**इत्थं चेमौ रजनिदिवसौ दोलयन्द्वाविवाक्षौ**
**कालः काल्या सह बहुकलः क्रीडति प्राणिसारैः ॥ ३८ ॥**

कालः वर्तमानादिः क्षणादिसमयो वा इत्थममुना प्रकारेण इमौ रजनिदिवसा निशावासरौ दोलयन् भ्रामयन् परिवर्तयन्नित्यर्थः । सन् काल्या शक्त्या सह प्राणिसारैः प्राणिनः एव साराः । क्रीडनकाष्ठविशेषाः तैः कृत्वा देहिक्रीडनकैः कृत्वा क्रीडति रमते किंलक्षणः कालः बहुकलः बहव्यः भूयः कलाः सुखदुःखदातृत्वादिकरणविशेषाः यस्य स तथा कदाचित्सुखं ददाति कदाचित्कर्मवशेन दुःखं ददातीत्यर्थः । रजनिदिवसौ कौ इव द्वौ अक्षौ पासका इव यथा कश्चित्काल्या कस्य सुखस्य आली श्रेणी यस्याः सा तथा भूतया क्रान्तया सह द्वौ अक्षौ पासको :( कौ ! ) दोलयन् आवर्तयन् भ्रामयन् सन् सारैः क्रीडनकाष्ठैः कृत्वा क्रीडति सोऽपि बहुकलः बहव्यः कलाः क्रीडानैपुण्यवञ्चनपाशकपाताद्याः कलाः विद्याविशेषा वा यस्य स तथा इत्यमिति कथं यतः यत्र यस्मिन् क्वचिदपि कस्मिन्नपि गृहे सद्मनि अनेके बहवः प्राणिसाराः प्राणिषु ये साराः श्रेष्ठाः उत्तमा जना इत्यर्थः । अभवन् अथ पश्चात्तत्र गृहे एकः केवलः प्राणी जनस्तिष्ठति कदाचिज्जीवति तदनु पश्चात् यत्र गृहे एकोऽपि केवलोऽपि अभवत् तत्र बहवः अनेके भवन्ति । च पुनः तत्र गृहे अन्ते पश्चात् एकोऽपि जनो न भवेत् । एतेन कालवशात् गृहेषु जनभूय एकत्वाद्विचित्र्यं भवतीति भावः । साराः क्रीडति कान्यपि सर्वक्रीडास्पदेषु बहुत्वैकत्वादिवैचित्र्यं प्राप्नुवन्तीत्यर्थः ॥ ३८ ॥

तपस्यन्तः सन्तः किमधिनिवसामः सुरनदीं
गुणोदारान्दारानुत परिचरामः सविनयम् ।
पिबामः शास्त्रौघानुत विविधकाव्यामृतरसा-
न्न विद्मः किं कुर्मः कतिपयनिमेषायुषि जने ॥ ३९ ॥

[१ रा. मू. ' °काया° ']

वयं तत् न विद्मः न जानीमः यत्कुर्मः कुर्वीमहि क्व सति जने जन्यते उत्पद्यते इति जनो देहः । तस्मिन् कतिपयनिमेषायुषि सति कतिपयाः कतिसंख्याकाः निमेषाः उन्मेषाः तानभिव्याप्य तदवधीत्यर्थः । आयुर्जीवितकालः यस्य सः कतिपयनिमेषायुः तस्मिन्सति शरीरे । अनिश्चितजीवितव्यकाले इत्यर्थः । किं न जानीथ इति चेत्तत्राह यत् वयं तपस्यन्तः तपः आचरन्ति तपस्यन्ति । तपस्यन्ति ते तपस्यन्तः सन्तः । तपः कुर्वन्त इत्यर्थः सुरनदीं जाह्नवीं किं अधिनिवसामः अधितिष्ठामः । गङ्गायां वसेम इत्यर्थः । एतेन किं धर्ममोक्षावेव सेवेमेति भावः । केवलं धर्ममेव वा सेवेम इत्यनेन पदेन ध्वनितम् । उत अथवा दारान् स्त्रियः सविनयं विनीतत्ववुक्तं यथा स्यात्तथा । तान्प्रसादयेत्यर्थः । किं परिचरामः किमु सेवेम । दारान् अभीष्टवस्त्रादिदानमानादिभिः सानन्दान्विधाय तैः सह संभोगं कुर्म इत्यर्थः । किंलक्षणान्दारान् गुणोदारान् सौन्दर्यचातुर्यसौगन्ध्यप्रभृतयो गुणाः विशेषपदार्थाः उदारा महान्तो येषां ते तथा तान् अतिप्रसिद्धगुणानित्यर्थः । एतेन किं काममेव सेवेमेति भावः । उत अथवा शास्त्रौघान् बहूनर्थान्शास्त्रान्ति ( ति ) उपदिशन्ति तानि शास्त्राणि वेदान्तमीमांसाप्रभृतीनि तेषां ओघान् समूहान् किं पिबामः किं शृणुमः । किंलक्षणान्शास्त्रौघान् । विविधकाव्यामृतरसान् विविधा धर्मार्थकाममोक्षवर्णनैः अनेकप्रकाराः काव्यामृतानां श्लोकप्रबन्धामृतानां रसाः आस्वादाः उत्कृष्टश्रवणजनितानन्दवशेन आसक्तयो वा येषां ते तथा तान् । प्रमिताक्षरामालिनीरथोद्धताप्रहर्षिणीद्रुतविलम्बितप्रभृतिच्छन्दोभिर्बहुविधश्लोकामृतरसवन्त इत्यर्थः । एतेनार्थं सेवेम मोक्षं वा सेवेम इति भावः । विद्वत्तया धनमुपार्ज्यते अथ वा शास्त्रार्थावगाहनेन तत्त्वज्ञानान्मोक्षं प्राप्नुयामिति वेति भावः ॥ ३९ ॥

गङ्गातीरे हिमगिरिशिलाबद्धपद्मासनस्य
ब्रह्मध्यानाभ्यसनविधिना योगनिद्रां गतस्य ।
किं तैर्भाव्यं मम सुदिवसैर्यत्र ते निर्विशङ्काः
कण्डूयन्ते जरठहरिणाः शृङ्गमङ्गे मदीये ॥ ४० ॥

[ १ अ. ' यदीये ' ]

मम किं तैः सुदिवसैः शोभनदिनैः भाव्यं । किमु भविष्यते ते उत्तमा दिवसा मया किमु प्राप्स्यन्ते इत्यर्थः । तैः कैः यत्र येषु दिवसेषु ते सदा वनचरत्वेन प्रसिद्धाः जरठहरिणाः वृद्धमृगाः वृद्धाः हरिणा हि अतिभीतिमन्तो भवन्तीति तेषां मयि विश्वास-कथनाय वृद्धपदग्रहणं । मदीये अङ्गे मम शरीरे शृङ्गं विषाणं कण्डूयन्ते खर्जूयन्ते विषाणकण्डूं विनोदयन्तीत्यर्थः । कालस्याखण्डदण्डायमानत्वेन कण्डूयन्ते इति वर्तमान प्रयोगः । कण्डूयिष्यन्ते इत्यर्थः । किंलक्षणा जरठहरिणाः निर्विशङ्काः निर्गतभयाः मयि विश्वसतीत्यर्थः । किंलक्षणस्य मम गङ्गातीरे गङ्गातटप्रदेशे हिमगिरिशिलाबद्धपद्मा-सनस्य हिमगिरेः हिमाचलस्य शिलायां पाषाणे बद्धं रचितं धृतमित्यर्थः पद्मासनं स्वस्ति-कासनविशेषो येन स तथा तस्य हिमाद्रौ गङ्गातटे पद्मासनं धृत्वोपविष्टस्येत्यर्थः । पुनः किंल-क्षणस्य मम ब्रह्मध्यानाभ्यसनविधिना । ब्रह्मणः परमात्मनः परमेश्वरस्येत्यर्थः । ध्यानं स्मरणं तस्याभ्यसनं आसक्त्या सेवनं तस्य विधिः विधानं प्रकारो वा तेन कृत्वा योग-निद्रां योगेन समाधिना निद्रामिव निद्रां नैश्चल्यं ( ? ) गतस्य प्राप्तस्य । समाधि-मास्थाय सुस्थिरदेहस्येत्यर्थः एतेन संसिद्धस्य मम निर्विकारचित्तत्वेन समदर्शिता कदा भविष्यतीत्यर्थः ॥ ४० ॥

स्फुरत्स्फारज्योत्स्नाधवलिततले क्वापि पुलिने
सुखासीनाः शान्तध्वनिषु रजनीषु व्युसरितः ।
भवाभोगोद्विग्नाः शिव शिव शिवेत्यार्त्तवचसः
कदा स्यामानन्दोद्गतबहुलबाष्पप्लुतदृशः ॥४१॥

[ १ रा. मू. ' °द्विघ्नाः '. २ रा. मू. °त्यार्त°. ]

वयं एवंभूताः कदा कस्मिन्नवसरे स्याम भवेम । किंलक्षणाः दिवः स्वर्गस्य सरित् नदी व्युसरित् तस्याः व्युसरितः गङ्गायाः क्वापि कस्मिन्नपि यत्र कुत्रापीत्यर्थः । पुलिने तटे सुखासीनाः सुखं यथा भवति तथोपविष्टाः । किंलक्षणे पुलिने स्फुरत्स्फारज्योत्स्नाधव-लिततले । स्फुरन्त्यः उल्लसन्त्यः स्फाराः भूरयश्च ताः ज्योत्स्नाः चन्द्रकान्तयश्च ताभिः धवलितं श्वेतं कृतं तलं स्वरूपं यस्य तत्तथा तस्मिन् । पुनः किंलक्षणाः वयं रजनीषु रात्रिषु इत्येवं आत्तवचसः आत्तं गृहीतं वचो वचनं यैस्ते तथा । इतीति किं शिव शिव शिवेति । शिवयति आनन्दयति जगन्ति इति शिवः भगवान् भगवन् शिवेतीत्यर्थः । किंल-क्षणासु रजनीषु शान्तध्वनिषु शान्ताः उपरताः ध्वनयः श्वापदहंसचक्रवाकादीनां शब्दा यासु तास्तथा तासु । तदा न केऽपि प्राणिनो वदन्तीत्यर्थः मध्यरात्रे हि न केऽपि प्राणिनो वदन्तीत्यागमः । तदा हि निःसंचारजनीषु भगवत्स्मरणस्यैकाग्र्यत्वेन सुखकरणी-यत्वादिति भावः । पुनः किंलक्षणा वयं । यतः भवाभोगोद्विग्नाः भवानां जन्मनां आ-भोगेन परिपूर्णतया उद्विग्नाः त्रस्ता बहुदुःखजन्मपरंपराभीता इत्यर्थः । यतः " सकृदुच्चरितं

येन शिव इत्यक्षरद्वयम् । बद्धः परिकरस्तेन मोक्षाय गमनं प्रती "ति स्मृतेः । पुनः किंलक्षणा वयं । आनन्दोद्गतबहलबाष्पप्लुतदृशः । आनन्देन श्रीशिवध्यानहर्षेणोद्गतानि च तानि बहुलानि बाष्पानि ( णि ) हर्षाश्रूणि तैः प्लुताः दृशो येषां ते तथा वयमिति बहुत्वं हर्षेण ॥ ४१ ॥

* शिरः शार्वं स्वर्गात्पशुपतिशिरस्तः क्षितिधरं
गिरीन्द्रादुत्तुङ्गादवनिमवनेश्चापि जलधिम् ।
अधोधो गङ्गेयं पदमुपगता स्तोकमथवा
विवेकभ्रष्टानां भवति विनिपातः शतमुखः ॥ ४२ ॥

[ *अ. कोशे ४२,४३ श्लोकौ व्यतिषाते. १ अ. रा. टी. ' °दुत्तङ्गा° ' ]

इयं प्रसिद्धा जगत्पावनी गङ्गा भागीरथी अधः अधः नीचैः नीचैः पदं स्थानं उपगता प्राप्ता शब्दच्छलेन अधोऽधः अतितुच्छं पदं प्राप्ता अथवा स्तोकं स्वल्पं पदं प्राप्ता तदेवाह । आदौ गङ्गा स्वर्गात् श्रीविष्णुलोकात् शार्वं शर्वस्य श्रीमहादेवस्येदं शिरः मस्तकं उपगता विष्णुलोकात् श्रीशिवशिरः अध इत्यर्थः । पुनः सा गङ्गा पशुपतिशिरस्तः पशुपतेः श्रीमहादेवस्य शिरो मस्तकं तस्मात् क्षितिधरं हिमालयं पर्वतं उपगता । पुनः सा गङ्गा उत्त(त्तु)ङ्गात् अत्युन्नतात् गिरीन्द्रात् हिमाचलात् अवनिं भूमिं उपगता अभवत् । च अन्यत् सा गङ्गा अवनेः पृथिव्याः सकाशात् अपि जलधिं सागरं उपगता अभवत् इति क्रमेण गङ्गापि नीचपदत्वं प्राप्ता । अत्रार्थान्तरन्यासः । विवेकभ्रष्टानां विवेकात् ज्ञानात् च्युतानां विनिपातः अनर्थः शतमुखः शतं बहु मुखानि आगमनमात्रा यस्य स तथाविधो भवति । ये विवेकाद्भ्रष्टाः अविवेकाः तान्प्रति अनर्थाः बहुभिर्मार्गैरागच्छन्तीत्यर्थः । यतो गङ्गापि उच्चपदेभ्यः पतन्ती क्रमेण नीचैः पदं गता तर्हि अन्येषां जीवानां विवेकाद्भ्रंशे सति नीचपदत्वं भवतीति भावः । नीचशब्देन निम्नं अधमश्च ॥ ४२ ॥

आशा नाम नदी मनोरथजला तृष्णातरङ्गाकुला
रागग्राहवती वितर्कविहगा धैर्यद्रुमध्वंसिनी ।
मोहावर्तसुदुस्तरातिगहना प्रोत्तुङ्गचिन्तातटी
तस्याः पारगता विशुद्धमनसो नन्दन्ति योगीश्वराः॥४३॥

[१ अ. ' चिन्ताटवी ' २ अ. °मनसा ']

या आशामामनन्ती आशा तृष्णापि सायतेत्यभरः । आशा अतितृष्णा नाम अभिधानं यस्याः सा आशानामा एवंभूता चासौ नाम नदी तरङ्गिणी च वर्तते तस्याः आशानद्याः पारगताः पारं तीरं प्राप्ताः आशां त्यक्त्वा स्थिता इत्यर्थः । योगीश्वराः योगिनः

नन्दन्ति हृष्यन्ति यथा अन्येऽपि जनाः नदीं तीर्त्वा पारगताः सन्तः हृष्टा भवन्ति । क्लिन्नक्षणाः योगीश्वराः विशुद्धमनसः निर्मलचेतसः अविद्यामुक्तान्तःकरणा इत्यर्थः । क्लिष्टक्षणा आशानदीति प्रसिद्धनदीरूपकेणाह । किंभूता मनोरथजला मनोरथाः इदं कृतं इदं करिष्यामि पश्चादिदं भविष्यतीति अभिलाषाः ते एव जलानि पानीयानि यस्यां सा तथा । आशायां हि मनोरथाः सन्तीति भावः । नद्यामपि जलेर्भाव्यं । पुनः किं० तृष्णातरङ्गाकुला तृष्णाशब्देन अतिलौल्यं असंतोष इत्यर्थः । ता एव तरङ्गाः कल्लोलाः तैराकुला व्याप्ता । यत्राशा भवति तत्रासंतोष इत्यर्थः । प्रसिद्धनद्यपि तरङ्गाकुला भवति । पुनः किंलक्षणा आशानामनदी रागग्राहवती रञ्जयन्ति स्वभावान्तरं प्रापयन्ति ते रागाः कामक्रोधादय एव ग्राहाः मकरतिमिशिशुमारादयः । जलजीवविशेषा विद्यन्ते यस्यां सा तथोक्ता । एतेन यत्रासौ तत्र रागादयो भवन्तीत्यर्थः । नद्यामपि ग्राहैर्भवितव्यं । पुनः किंलक्षणा । वितर्कविहगा अस्मिन्कृते इदं भविष्यति न भविष्यतीति वै(चे)त्यादय ऊहाः त एव विहगाः पक्षिणो यस्यां सा तथा । एतेन यत्राशा तत्र वितर्का भवन्तीति भावः । नद्यामपि पक्षिणो मरालचक्रवाकबकाद्या भवन्ति । पुनः किंलक्षणा । धैर्यद्रुमध्वंसिनी धैर्यं धीरत्वं निर्विकारचित्तत्वमित्यर्थः । तदेव द्रुमा वृक्षाः तान्ध्वंसयति पातयतीति तथा । प्रसिद्धनद्यपि तटस्थद्रुमान्पातयति । एतेन यत्राशा भवति तत्र धैर्यं न भवतीत्यर्थः । पुनः किंलक्षणा । मोहावर्तसुदुस्तरा मोहा अज्ञानान्येव । परमार्थज्ञानशून्यत्वमित्यर्थः आवर्ताः भवसां भ्रमाः तैः कृत्वा सुतरां अतिशयेन दुस्तरा न तरीतुं शक्या त्यक्तुं न शक्यते इत्यर्थः । एतेन यत्राशा तत्र मोहो भवतीत्यर्थः । प्रसिद्धनद्यामपि आवर्तैर्भवितव्यं । पुनः किंलक्षणा आशानदी अत एव अतिगहना अतिशयेन गहना दुरुत्तरा तरीतुं न शक्यते इत्यर्थः । प्रसिद्धमहानद्यपि दुरुत्तरा अतिगहना भवति पुनः किंलक्षणा आशानदी । प्रोत्तुङ्गचिन्तातटी प्रोत्तुङ्गा अतिमहत्यः चिन्ताः अस्मिञ्जाते सति किं करिष्यामि किं भविष्यति पुत्रकलत्रादीन् कथं भवि(रि)ष्यामीत्याद्याः आत्मनो हीनत्वप्रतिपादिकाः ता एव तटानि तीराणि यस्याः सा तथोक्ता । एतेन यत्राशा भवति तत्र महत्यश्चिन्ता भवन्तीत्यर्थः । प्रसिद्धनद्यामपि तटैर्भवितव्यम् । आशाया हि अनवच्छिन्नप्रवाहरूपत्वेन नद्या सहोपमेयता ॥ ४३॥

आसंसारं त्रिभुवनमिदं चिन्वतां तात तादृ-
ङ्नैवास्माकं नयनपदवीं श्रोत्रवर्त्मागतो वा ।
योऽयं धत्ते विषयकरिणीगाढरूढाभिमान-
क्षीवस्यान्तःकरणकरिणः संयमालानलीलाम् ॥ ४४ ॥

हे तात हे पूज्य । तातः पितरि पूज्ये चेत्यमरः । आसंसारं संसारात् आ इत्यासंसारं संसारप्रवृत्तिं मर्यादीकृत्य इदं त्रिभुवनं त्रैलोक्यं चिन्वतां गवेषयतां सतां विचारयमाणानामित्यर्थः । अस्माकं नयनपदवी नयनयोः नेत्रयोः पदवीं मार्गं दृष्टिमार्गमित्यर्थः । तादृक् तादृशः पुरुषः कर्ता न आगतः न प्राप्तः । अस्माभिस्तादृक् पुरुषो न दृष्ट इत्यर्थः । वा

अथवा श्रोत्रवर्त्म श्रोत्रयोः कर्णयोर्वर्त्म मार्गं न आगतः। तादृक् न श्रुत इत्यर्थः। तादृगिति कः। यः अयं पुमान् अन्तःकरणकरिणः अन्तःकरणं चित्तमेव करी हस्ती तस्य मनोरूपगजस्य संयमालानलीलां संयमो नियम एव आलानं बन्धनं तस्य लीलां विलासं नियमरूपगजबन्धनविलासं तद्बन्धनरूपत्वमित्यर्थः। किं धत्ते धारयति किंलक्षणस्य अन्तःकरणकरिणः विषयकरिणीगाढरूढाभिमानक्षीवस्य विषयाः गन्धस्पर्शरूपरसशब्दाद्याः ते एव करिण्यो हास्तिन्यः तासु गाढः अतिशयवान् रूढः उत्पन्नो योऽभिमानः अभिनतिः अस्मदीयत्वमिति वा। तेन क्षीवस्य मत्तस्य। अज्ञानिन इत्यर्थः। करिण्यभिनिवेशेन मत्तस्य हि करिणः आलानेन भवितव्यम् ॥ ४४ ॥

ये वर्तन्ते धनपतिपुरः प्रार्थनादुःखदीर्घा
ये चाल्पत्वं दधति विषयाक्षेपपर्यस्तबुद्धेः।
तेषामन्तः स्फुरितहसितं वासराणां स्मरेयं
ध्यानच्छेदे शिखरिकुहरग्रावशय्यानिषण्णः ॥ ४५ ॥

अहं तेषां वासराणां दिवसानां ध्यानच्छेदे ध्यानस्य समाधेः छेदे विरामे सति। समाधिव्युत्थाने सतीत्यर्थः। अन्तर्मनसि स्फुरितहसितं दिवसानां स्फुरणमेव हासं वदेत्यध्याहारः। स्मरेयं स्मरिष्ये किंलक्षणोऽहं शिखरिकुहरग्रावशय्यानिषण्णः। शिखरी हिमगिरिः अपरः पर्वतो वा तस्य कुहरं गुहा तस्य तस्मिन् वा ग्रावा पाषाणः स एव शय्या पर्यङ्कः तत्र निषण्णः उपविष्टः। एतेन गिरिगुहान्तः दृषच्छय्योपविष्टः ध्यानं मुक्त्वा दिवसानां स्फुरत्तेज एव हास्यं स्मरेयमिति तात्पर्यं तेषां केषां ये वासराः। धनपतिपुरःप्रार्थनादुःखदीर्घाः धनपतीनां धनवतां पुरः अग्रे प्रार्थना याचनं तेन दुःखं तेन दीर्घाः प्रलम्बाः। धनपतिं याचमानस्य धन(ना)लाभेन दुःखितस्य च सतः ये दिवसाः अनवसाना भवन्तीत्यर्थः। एवंविधा वर्तन्ते। च अन्यत् ये दिवसाः मम अल्पत्वं स्तोकपरिमाणत्वं दधति धारयति किंलक्षणस्य मम। विषयाक्षेपपर्यस्तबुद्धेः विषयाणां गन्धस्पर्शरसादीनां आक्षेपः आनयनं तस्मै पर्यस्ता परिक्षिप्ता व्यापारितेत्यर्थः। बुद्धिश्चित्तं येन स तथा तस्य विषयानयनाय व्यापारितचेतसः सतः(न्तः) अत्यल्पा भवन्तीति भावः ॥ ४५ ॥

विद्या नाधिगता कलङ्करहिता वित्तं च नोपार्जितं
शुश्रूषापि समाहितेन मनसा पित्रोर्न संपादिता।
आलोलायतलोचना युवतयः स्वप्नेऽपि नालिङ्गिताः
कालोऽयं परपिण्डलोलुपतया काकैरिव प्रेषितः ॥४६॥
[ १ रा. टी. 'प्रेरितः' ]

अस्माभिः विद्याः पुराणन्यायप्रभृतयः न अधिगताः न प्राप्ताः किंलक्षणाः विद्याः कलङ्करहिताः कलङ्कं अप्रतिभानरूपं तेन रहिताः त्यक्ताः। स्फुरट्टया इत्यर्थः यं

अन्यत् वित्तं धनं च न उपार्जितं न आयत्तीकृतं तथा समाहितेन एकाग्रेण श्रद्धावतेत्यर्थः। मनसा पित्रोः मातृजनकयोः शुश्रूषा परिचर्यापि न संपादिता न प्रापिता। तथा युवतयः तरुण्यः स्त्रियः स्वप्नेऽपि स्वप्नदशायामपि न आलिङ्गिताः न आश्लिष्टाः। किंलक्षणाः युवतयः आलोलायतलोचनाः। आसमन्ताद्भावेन लोले चपले आयते दीर्घे लोचने नयने यासां तास्तथा। अतः कारणात् अस्माभिः अयं कालः आयुषोपलक्षितः समयः प्रेरितः प्रेषितः निरर्थकमतिवाहितत्वेन हारित इत्यर्थः,। कया परपिण्डलोलुपतया परेषां अन्येषां पिण्डः अन्नकवलः तत्र लोलुपता लौल्यं तया परान्नकवललोलतया। कदा परेभ्यः अन्नं प्राप्स्ये इति लौल्येनेत्यर्थः। कैरिव काकैः बलिपुष्टैरिव, यथा काकैः परेभ्यः पिण्डलोलुपतया कालः क्षिप्यतेऽवमतैरेव निरर्थकं धर्मभोगादिभ्यतिरिक्तं आयुरतिवाह्यते तथेति समानम् ॥ ४६ ॥

वितीर्णे सर्वस्वे तरुणकरुणापूर्णहृदयाः
स्मरन्तः संसारे विगुणपरिणामा विधिगतीः।
वयं पुण्येऽरण्ये परिणतशरच्चन्द्रकिरणे
त्रियामा नेष्यामो हरचरणचित्तैकशरणाः ॥ ४७ ॥

वयं पुण्ये पावने अरण्ये तपोवने त्रियामा रात्रीः नेष्यामः अतिवाहयिष्यामः। तत्र वत्स्याम इत्यर्थः। क सति सर्वस्वे अन्नपश्वादिसर्वधने यथायथमर्थिभ्यः वितीर्णे दत्ते सति। सर्वस्वमर्थिभ्यो दत्वेत्यर्थः। किंलक्षणाः वयं यतः तरुणकरुणापूर्णहृदयाः तरुणी महती या करुणा दया तया आसमन्ताद्भावेन पूर्णं निभृतं हृदयं चित्तं येषां ते तथा। पुनः किंलक्षणाः वयं संसारे इह भवे विविगतीः कर्मगतीः विगुणपरिणामाः विगुणः दुःखरूपः परिणामो विपाको यासां तास्तथा। स्मरन्तः ध्यायन्तः। संसारे कर्मपरिपाकान्दुःखरूपान् जानन्त इत्यर्थः। किंलक्षणेऽरण्ये परिणतशरच्चन्द्रकिरणे। परिणताः वृद्धिं प्राप्ताः शरच्चन्द्रस्य शारदीनशशाङ्कस्य किरणा मयूखा यस्मिंस्तत्तथा। अरण्यस्य पवित्रतयोज्ज्वलस्वरूपत्वेन तत्र चन्द्रकिरणा अपि वृद्धिं प्राप्नुवन्तीत्यर्थः। पुनः किंलक्षणा वयं हरचरणचित्तैकशरणाः हरस्य श्रीमहादेवस्य चरणवर्ति यच्चित्तं मनः तदेव एकं शरणं गृहं येषां ते तथा। श्रीमहादेवचरणशरणाचित्तगृहमवलम्ब्य स्थिता इत्यर्थः। ये किल वने वसन्ति तेऽपि पर्णकुटीमधिष्ठाय सुखेन चिन्तारहिता भवन्ति अत्र चित्तमेव गृहं आश्रित्य च स्थीयतामित्यर्थः ॥ ४७ ॥

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषः।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान्को दरिद्रः ॥ ४८ ॥

इह विश्वस्मिन्वयं वल्कलैः तरुत्वग्भिः परितुष्टाः संतुष्टा वर्तामहे त्वं च लक्ष्म्या समृद्धया संतुष्टोऽसि इह अनयोरर्थयोः विषये परितोषः संतोषः समः सदृशः। संतोषत्वसामान्यवृत्त्या द्वौ संतोषौ एवेत्यर्थः। अत्र विशेषः अन्तरं भेद इत्यर्थः। निर्विशेषः अनाधिक्यः अत्र विशेषे अन्तरं नास्तीत्यर्थः। तु पुनः स दरिद्रः दुर्गतः मन्दभाग्य इत्यर्थः। स कः यस्य पुरुषस्य विशाला अतिमहती तृष्णा लौल्यं वर्तते । च अन्यत् मनसि अन्तःकरणे परितुष्टे संतोषवति सति अर्थवान् धनवान् कः वा दरिद्रो निःस्वः कः दरिद्रत्वधनिकत्वादि सर्वं मनःकल्पितमित्यर्थः ॥ ४८ ॥

यदेतत्स्वाच्छन्द्यं विहरणमकार्पण्यमशनं
सहार्यैः संवासः श्रुतमुपशमैकव्रतफलम् ।
मनो मन्दस्पन्दं बहिरपि चिरस्यापि विमृश-
न्न जाने कस्यैषा परिणतिरुदारस्य तपसः ॥ ४९ ॥

अहं चिरस्यापि चिरकालमपि विमृशन् विचारयन्सन् इति न जाने न जानामि यत् एषा इयं प्रसिद्धा कस्य कृतस्य उदारस्य अनशनकृच्छ्रादिकरणेन महतः तपसः तपस्यायाः परिणतिः परिपाकः वर्तते । एषा का यत् एतत् स्वाच्छन्द्यं स्वच्छन्देन स्वेच्छया प्रवर्तमानं स्वाधीनमित्यर्थः । विहरणं प्रवर्तनं चलनमित्यर्थः। भवति स्वेच्छया गमनमिति भावः। पुनः किं यत् एतत् अकार्पण्यं कृपणत्वेन विना लभ्यं अशनं भोजनं भवति । दीनतया विना भोजनं लभ्यत इत्यर्थः। तथा पुनः तत्किं यत् आर्यैः श्रेष्ठचरितैः साधुभिः सह सार्धं संवासः निवसतिर्भवति तथा यच्छ्रुतं अध्ययनं भवति. किंलक्षणं श्रुतं उपशमैकव्रतफलं । उपशमः शान्तिरेव एकं मुख्यं व्रतं आचरणं फलं साध्यं यस्य तत्तथाभूतं । शान्तियुक्तमित्यर्थः। तथा पुनः किं यत् मनः चित्तं बहिरपि विषयेष्वित्यर्थः । मन्दस्पन्दं मन्दः अल्पः स्पन्दश्चलनक्रिया यस्य तत्तथा भवति। मनः विषयैरनाकुष्टमित्यर्थः। एतानि वस्तूनि महातपसः फलानीति भावः ॥ ४९ ॥

पाणिः पात्रं पवित्रं भ्रमणपरिगतं भैक्ष्यमक्षय्यमन्नं
विस्तीर्णं वस्त्रमाशादशकमपमलं तल्पमस्वल्पमुर्वी ।
येषां निःसङ्गताङ्गीकरणपरिणतिस्वान्तसंतोषिणस्ते
धन्याः संन्यस्तदैन्यव्यतिकरनिकराः कर्म निर्मूलयन्ति ॥५०॥

ते पुरुषाः धन्याः सुभाग्याः कर्म क्रियते तत्कर्म शुभाशुभाचरणजनितफलं उन्मूलयन्ति निर्मूलयन्ति नाशयन्तीत्यर्थः। ते के येषां पुरुषाणां पाणिः करतलं पवित्रं सदा क्षालनवशात्पूतं पात्रं अमत्रं वर्तते। पाणिपात्रेण भुञ्जन्तीत्यर्थः। तथा येषां भ्रमणपरिगतं भ्रमणेन

अटनेन परिगतं लब्धं भैक्ष्यं भिक्षाप्राप्तं वस्तु अन्नं भोजनं वर्तते। ये भिक्षान्नेन जीवन्तीत्यर्थः। तथा येषां च विस्तीर्णं विशालं तथा अपगतं गतमलं निर्मलं आशादशकं आशानां दिशां दशकं पञ्चकद्वयं वस्त्रं वसनं वर्तते। ये दिगम्बरा भवन्तीत्यर्थः। अम्बरेणापि विस्तीर्णेन निर्मलेन च सदृशेन च भवितव्यम्। तथा च येषां नराणां उर्वी पृथिवी अस्वल्पं न स्वल्पं अस्वल्पं। महन्मूल्यमित्यर्थः। तल्पं शय्या वर्तते। ये भूमौ जीवनिरुपद्रवं शेरते इत्यर्थः। किंलक्षणास्ते निःसङ्गताङ्गीकरणपरिणतिस्वान्तसंतोषिणः निःसङ्गता संगराहित्यं एकान्तशीलत्वमित्यर्थः। तस्या अङ्गीकरणं स्वीकारः सदा तत्परत्वमित्यर्थः। तस्य परिणतिः परिपाको यस्य तत् निःसङ्गताङ्गीकरणपरिणति एवंभूतं च तत् स्वान्तं अन्तःकरणं च तेन संतोषः आनन्दो येषां ते तथा निःसङ्गताऽचिपरिपाकान्तःकरणेन संतोषवन्त इत्यर्थः। पुनः किंलक्षणास्ते संन्यस्तदैन्यव्यतिकरनिकराः संन्यस्तः त्यक्तः दैन्यस्य दीनत्वस्य व्यतिकरः संपर्कः तस्य निकरः समूहो येषां ते तथा। परित्यक्तदीनत्वा इत्यर्थः। ये एवमुक्तलक्षणा पाणिपात्रा उदरमात्रा भिक्षाहाराः दिगम्बराः भूमिशयनाः निःक्लिष्टेन स्वसंतोषिणः आत्मारामाः त्यक्तदीनत्वास्ते धन्या इति भावः ॥ ५० ॥

दुराराध्यः स्वामी तुरगचलचित्ताः क्षितिभुजो
वयं तु स्थूलेच्छाः सुमहति पदे बद्धमनसः।
जरा देहं मृत्युर्हरति दयितं जीवितमिदं
सखे नान्यच्छ्रेयो जगति विदुषोऽन्यत्र तपसः ॥५१॥

स्वामी प्रभुर्यः सेव्(व्य)ते स इत्यर्थः। दुराराध्यः दुःखेनाराध्यते संतोष्यत इति तथा। तथा क्षितिभुजो भूपतयः तुरगचलचित्ताः वर्तन्ते। तुरगवत् अश्ववत् चलं चपलं चित्तं मानसं येषां ते तथा। अनवस्थितान्तःकरणा इत्यर्थः। तु पुनः वयं स्थूलेच्छाः स्थूला सुमहती इच्छा धनाश्वादिप्राप्त्यभिलाषो येषां ते तथा। पुनः किंलक्षणाः वयं। महति गुरुणि पदे राजाद्यधिकारे बद्धमनसः आसक्तचित्ताः। एवमुक्तलक्षणेभ्योपि राजभ्यो पदादि वाञ्छाम इत्यर्थः। पुनः जरा वृद्धत्वं च देहं शरीरं हरति नाशयति। विरूपं करोतीत्यर्थः। मृत्युर्मरणं च इदं दयितं अतिप्रियं जीवितं प्राणान् हरति नाशयति। अतः कारणात् हे सखे हे मित्र जगति विश्वस्मिन् विदुषः विवेकिनः पुरुषस्य तपसः अन्यत्र तपस्यायाः विना अन्यत् इतरत् श्रेयः कल्याणवस्तु न अस्ति। एतेनाभयं पदं तपसैव लभ्यते इत्यर्थः ॥ ५१ ॥

भोगा मेघवितानमध्यविलसत्सौदामिनीचञ्चला
आयुर्वायुविघट्टिताभ्रपटलीलीनाम्बुवद्भङ्गुरम् ।
लोला यौवनलालना तनुभृतामित्याकलय्य द्रुतं
योगे धैर्यसमाधिसिद्धिसुलभे बुद्धिं विदध्वं बुधाः ॥५२॥

हे बुधाः बुध्यन्ते संसारतत्त्वं जानन्ति इति तथा । हे विवेकिनः यूयं तनुभृतां शरीरधारिणां इति इमानि वस्तूनि आकलय्य परिकलयित्वा निश्चित्येत्यर्थः । द्रुतं वेगेन योगे यमनियमासनप्राणायामप्रत्याहारध्यानध्येयधारणारूपे समाधौ बुद्धिं मतिं विदध्वं कुरुध्वं । किंलक्षणे योगे धैर्यसमाधिसिद्धिसुलभे धैर्यस्य निर्विकारचित्तस्य समाधिधारणं तस्य सिद्धिर्निःपति( निष्पत्तिः )तया सुलभः सुप्रापः तस्मिन् निर्विकारचित्तत्वेन सुप्रापे इत्यर्थः । इतीति किं । तनुभृतां भोगाः विषयाः स्वच्छन्दनवनिताद्याः मेघवितानमध्यविलसत्सौदामिनीचञ्चलाः मेघानां जलदानां वितानं मण्डलं तस्य मध्यं अन्तर्भागः तत्र विलसन्ती प्रस्फुरन्ती या सौदामिनी विद्युत् तद्वत् चञ्चलाः चपलाः । अत्यस्थिरा इत्यर्थः । तथा आयुर्जीवितकालः भङ्गुरं क्षणाद्भज्यते हीयते तथा लयनशीलं नश्वरमित्यर्थः । किंवत् । वायुविघट्टिताभ्रपटलीलीनाम्बुवत् वायुना वातेन विघट्टिता आस्फालिता या अभ्रपटली जलदमण्डली तस्यां लीनं वर्तमानं यत् अम्बु पानीयं तद्वत् तत्तुल्यं तथा यौवनलालना यौवनस्य तारुण्य( स्य )लालना धारणा लोला चपला । तारुण्यमपि अवश्यं गमिष्यतीत्यर्थः । अत एव देहिनां तप एव परमं शरणमिति भावः ॥ ५२ ॥

पुण्ये ग्रामे वने वा महति सितपटच्छन्नपालीं कपाली-
मादाय ज्ञानगर्भाद्विजहुतहुतभुग्धूमधूम्रोपकण्ठम् ।
द्वारं द्वारं प्रवृत्तो वरमुदरदरीपूरणाय क्षुधार्तो
मानी प्राणी स धन्यो न पुनरनुदिनं तुल्यकुल्येषु दीनः॥५३॥

[ १ रा. टी. 'न्याय' ]

सः प्राणी जन्तुः मानी अभिमानवान् सन् धन्यः सनाथः महानित्यर्थः । स वरं श्रेष्ठं मनाङ् प्रियमित्यर्थः । किंलक्षणः प्राणी क्षुधा आर्तः बुभुक्षया पीडितः सन् उदरदरीपूरणाय उदरं जठरं तदेव दरी कन्दरः तस्याः पूरणं भरणं तस्मै । दुर्भरजठरभरणायेत्यर्थः । पुण्ये पवित्रे उषितः साधुजने इत्यर्थः । ग्रामे लोकनिवासे वा अथवा महति विशाले वने कानने तपोवने इत्यर्थः । कपालीं नालिकेरशकलं तुम्बीफलशकलं वा आदाय गृहीत्वा द्वारं द्वारं द्वारि द्वारि प्रवृत्तः वर्तमानः । अन्नलब्धये द्वारि द्वारि भ्रमन्नित्यर्थः । किंलक्षणां कपालीं सितपटच्छन्नपालीं सितेन उज्ज्वलेन शुचिनेत्यर्थः । पटेन वसनेन च्छन्ना आच्छादिता पाली उपरिदेशो यस्याः सा तथा तां । सितशुचिवाससमा(सा)च्छादयेत्यर्थः । किंलक्षणं द्वारं

न्यायगर्भद्विजहुतहुतभुग्धूमधूम्रोपकण्ठं । नयन्ति परमं पदं प्रापयन्ति विवेकेनेति न्यायाः श्रुतिशास्त्रस्मृत्यादयः ते गर्भे चित्ते येषां ते न्यायगर्भाः वेदादिविदः एवंभूताश्च ते द्विजा ब्राह्मणाश्च तैर्हुतं हवनं यस्मिन् स न्यायगर्भद्विजहुतः । एवंभूतो यो हुतभुक् वैश्वानरः तस्य धूमः छायाकेतुः तेन धूम्रं धूसरं उपकण्ठं समीपं यस्य तत्तथा । एतेनाग्निहोतृद्विजकुले प्रतीहाराय भ्रान्तं श्रेष्ठमित्यर्थः । पुनः पुमान् अनुदिनं प्रतिदिवसं तुल्यकुल्येषु तुल्याः वयोवृत्तविद्यावृत्त्यादिभिः समानाश्च ते तुल्याः सुकुलभवाः तेषु मध्ये दीनः कृपणः कृपापात्रमित्यर्थः । न वरं न श्रेष्ठः समानवंशेषु कृपणत्वेनान्नादि प्राप्नुवन्नपि न वरमित्यर्थः ॥ ५३ ॥

**चण्डालः किमयं द्विजातिरथवा शूद्रोऽथ किं तापसः**
**किं वा तत्त्वनिवेशपेशलमतिर्योगीश्वरः कोऽपि किम् ।**
**इत्युत्पन्नविकल्पजल्पमुखरैः संभाव्यमाना जनै-**
**र्न क्रुद्धाः पथि नैव तुष्टमनसो यान्ति स्वयं योगिनः ॥५४॥**

योगिनः योगीश्वराः स्वयं स्वेनैव रूपेण आनन्दवन्त इत्यर्थः । यान्ति गच्छन्ति । पथि मार्गे जनैर्लोकैः इत्यमुना प्रकारेण संभाव्यमाना वितर्क्यमाणाः संभाष्यमाणा इति पाठे उच्यमानाः । किंलक्षणाः योगिनः न क्रुद्धाः न कुपिताः । च पुनः तुष्टमनसः न संतुष्टा अपि नेत्यर्थः । किंलक्षणैर्जनैः उत्पन्नविकल्पजल्पमुखरैः । उत्पन्ना उदिता विकल्पजल्पाः वितर्कवचनानि येषां ते उत्पन्नविकल्पजल्पाः । अत एव मुखराः दुर्मुखाः अबद्धवचनाः तैः । इतीति किं किमिति वितर्केऽयं मुरोवर्ती चण्डालः किं बुष्कसो(?)भविष्यति अथवा किमयं द्विजातिः ब्राह्मणादिः अथवेति वितर्केऽयं किंशूद्रवर्णापसदो वा । किमिति तापसः तपस्वी वा । वा अथ वा तत्त्वनिवेशपेशलमतिः तत्त्वनिवेशेन तत्त्वज्ञानेन पेशला सुकुमारा करुणार्द्रा मतिर्बुद्धिर्यस्य स तथाभूतः कोऽपि भविष्यति वा अथ वा योगीश्वरः योगः समाधिर्विद्यते येषां ते योगिनः । तेषां ईश्वरः तेषु श्रेष्ठः कोऽपि किं भविष्यतीति किमयं चण्डालः शूद्रश्चेत्यादिवचनश्रवणेन न क्रुद्धाः भवन्ति । अयं किं द्विजातिस्तापसः किं योगीश्वरः किमित्यादिवचनश्रवणेन न तुष्टमनसश्चेत्यर्थः ॥ ५४ ॥

**एतस्माद्विरमेन्द्रियार्थगहनादायासकादाश्रय**
**श्रेयोमार्गमशेषदुःखशमनव्यापारदक्षं क्षणात् ।**
**शान्तं भावमुपेहि संत्यज निजां कल्लोललोलां गतिं**
**मा भूयो भज भङ्गुरां भवरतिं चेतः प्रसीदाधुना ॥५५॥**

हे चेतः हे मनः त्वं एतस्मात् अतिप्रसिद्धात् इन्द्रियार्थगहनात् इन्द्रियार्था विषयाः त एव गहनं दुःप्रवेशवनं तस्माद्विरम अपसर दूरस्थो भव । मा सेव-

स्वेत्यर्थः । किंलक्षणात् इन्द्रियार्थगहनात् आयासकात् आयासयति खेदयतीति आयासकं तस्मात्परिणामे दुःखदादित्यर्थः । पुनश्च श्रेयोमार्गं श्रेयः सुकृतं तदेव मार्गः पन्थाः तं आश्रय भज पुण्यमुपार्जयेत्यर्थः । किंलक्षणं श्रेयोमार्गं क्षणात् क्षणमेव अशेषदुःखशमनव्यापारदक्षं अशेषाणि समग्राणि यानि दुःखानि अशर्माणि तेषां शमनव्यापारः शान्तिकरणं तत्र दक्षोऽतिनिपुणः तं यः क्षणेन नानादुःखानि शमयतीत्यर्थः । यथान्योऽपि कश्चिद्दुःखदं गहनं वनं परित्यज्य निरुपद्रवं मार्गं भजति । पुनः शान्तं भावं शान्तत्वं उपेहि प्राप्नुहि । शान्तं भवेत्यर्थः । पुनः निजां आत्मीयां कल्लोललोलां कल्लोलवत् जलतरङ्गवत् लोला चपला तां तरङ्गचञ्चलां गतिं स्वभावं संत्यज जहीहि स्वकीयं चापल्यदोषं परित्यज्य स्वस्थं भवेत्यर्थः । तथा भूयः पुनरपि भवगतिं भवे संसारे रतिः प्रीतिः तां संसारासक्तिं इत्यर्थः । मा भज न सेवस्व ज्ञाननिष्ठं भवेत्यर्थः । अधुना इदानीमपि प्रसीद प्रसन्नं भव प्रसादं कुरुष्वेत्यर्थः । एतेन निर्गताविर्यं भूत्वा पूर्वोक्तलक्षणं भवेति भावः ॥५५॥

पुण्यैर्मूलफलैः प्रियैः प्रणयिनीं वृत्तिं कुरुष्वाधुना
भूशय्या तृणवल्कलैरकरुणैरुत्तिष्ठ यामो वनम् ।
क्षुद्राणामविवेकमूढमनसां यत्रेश्वराणां सदा
वित्तव्याधिविकारविह्वलगिरां नामापि न श्रूयते ॥५६॥

हे सखे चित्त त्वं उत्तिष्ठ उद्यतं भवाऽयं वनं काननं यामः गच्छामः । तत्र त्वं अधुनेदानीं पुण्यैः पावनैर्मूलफलैः मूलानि च फलानि च मूलफलानि तैः सह प्रणयिनीं स्नेहवतीं वृत्तिं व्यवहारं कुरुष्व विधेहि तानि त्वं सेवयेत्यर्थः । किंलक्षणैः मूलफलैः प्रियैः तव अभीष्टैः पुनः भूशय्यातरुवल्कलैः भूरेव पृथिव्येव शय्या पर्यङ्कः तरुवल्कलानि च वृक्षत्वचश्च तैः सह प्रणयिनीं वृत्तिं कुरुष्व । तानि च सेवयेत्यर्थः । पुनः किंलक्षणैः अकरुणैः न करुणा दीनत्वं येषु तानि अकरुणानि तैः दीनत्वं विनापि सुलभैः स्वेच्छाप्राप्यैरित्यर्थः । तत्र क्रुत्र यत्र वने क्षुद्राणां किंपचानां कदर्याणामित्यर्थः । ईश्वराणां प्रभूणां नामापि अभिधानमपि न श्रूयते यत्र कदर्याः प्रभवो न सन्तीत्यर्थः किंलक्षणानां प्रभूणां अविवेकमूढमनसां अविवेकेन अज्ञानेन मूढं स्तब्धं मनो येषां ते तथा तेषां पुनः किंलक्षणानां प्रभूणां सदा निरंतरं । वित्तव्याधिविकारविह्वलगिरां वित्तं धनमेव व्याधिः रोगः तेन विकारः विक्रिया तेन विह्वला विकला स्खलन्ती गीर्वाणी येषां ते तथा तेषां धनमदविकारेण विकलं वदतामित्यर्थः । विकारेण हि विफला गिरो भवन्ति । एतेन कदर्यप्रभुसेवनात् वनवासोऽपि श्रेष्ठ इति भावः ॥ ५६ ॥

मोहं मार्जय तामुपाश्रय रतिं चन्द्रार्धचूडामणौ
चेतः स्वर्गतरङ्गिणीतटभुवामासङ्गमङ्गीकुरु ।
को वा वीचिषु बुद्बुदेषु च तडिल्लेखासु च स्त्रीषु च
ज्वालाग्रेषु च पन्नगेषु च सरिद्वेगेषु च प्रत्ययः ॥५७॥

[ १ अ. 'कः' ]

हे चेतः हे मनः त्वं मोहं अविवेकं मार्जय स्फेटय परिहरेत्यर्थः । तथा चन्द्रार्धचूडामणौ चन्द्रार्धशेखरे श्रीमहादेवे तां प्रसिद्धां परमसुखानन्ददायिनीं रतिं प्रीतिं उपार्जय संचिनु । जपनस्मरणादिभिस्तं प्रसन्नं कुरु इत्यर्थः । पुनस्त्वं स्वर्गतरङ्गिणीतटभुवां स्वर्गतरङ्गिण्याः जाह्नव्याः याः तटभुवः तीरप्रदेशाः तासां आसङ्गं संबन्धं प्रीतिमित्यर्थः । अङ्गीकुरु स्वीकुरु तत्र निवसेत्यर्थः । ननु स्त्र्यादिभोगान्विहाय कथमेतत्पूर्वोक्तं विधीयते इति चेत्तत्राह वा अहो एतेषु वस्तुषु कः प्रत्ययः को विश्वासः इमे ईदृशा भवन्तीति निर्णय इत्यर्थः । एतेषु केषु वीचीषु ऊर्मिषु । इमाः स्थास्यन्तीति विश्वासः कः । न तिष्ठन्तीत्यर्थः । तथा बुद्बुदेषु नीरादिदिण्डीरेषु इमे नशिष्यन्तीति कः प्रत्ययः । इमे नश्यन्त्यर्थः । तथा च पुनः तडिल्लेखासु विद्युल्लतासु स्थिरत्वे को विश्वासः । इमा अस्थिरा भवन्त्यर्थः । च पुनः स्त्रीषु अङ्गनासु अकामचपलत्वे कः प्रत्ययः तासु कामेन चपलता भवतीत्यर्थः । च पुनः ज्वालाग्रेषु ज्वालानां कीलानां अग्राणि शिखराणि तेषु अदाहकत्वे कः प्रत्ययः । ताः किल दहन्तीत्यर्थः । च पुनः पन्नगेषु सर्पेषु अदंशकत्वे कः प्रत्ययः । सर्पाः दशन्तीत्यर्थः । च पुनः सरिद्वेगेषु सरितां नदीनां वेगाः प्रवाहास्तेषु अव्रोढकत्वे (?) कः प्रत्ययः । ते किल सरिद्वेगाः सेवयितारं निमज्जयन्तीत्यर्थः । एते च पदार्थाः सेवयितॄन् तथा तथा कुर्वन्तीति भावः । दृष्टान्तेन नित्यमानन्दरूपं श्रीमहेशं भजेति भावः ॥ ५७ ॥

अग्रे गीतं सरसकवयः पार्श्वतो दाक्षिणात्याः
पृष्ठे लीलावलयरणितं चामरग्राहिणीनाम् ।
यद्यस्त्येवं कुरु भवरसास्वादने लम्पटत्वं
नो चेच्चेतः प्रविश सहसा निर्विकल्पे समाधौ ॥ ५८ ॥

हे चेतः हे मनः यदि चेत् एवमस्ति इति भवति तर्हि भवरसास्वादने लम्पटत्वं कुरु । भवः संसारः तस्मिन्ये रसा विषयाः स्त्रगवनितास्तेषामास्वादने भोगे लम्पटो लोलः तस्य भावः लम्पटत्वं लौल्यं विधेहि । एवं कथमिति चेत्तत्राह । चेत अग्रे पुरस्तात् गीतं गानं भवति । गायका गायन्तीत्यर्थः । तथा पार्श्वतः उभयोः पार्श्वयोः दाक्षिणात्या दाक्षिणवेशोत्पन्नाः दाक्षिणात्यकवयो हि अतिशयगम्भीरार्थाः प्रकटनप्रबन्धनशीला भवन्तीत्यर्थः । सरसकवयः

सरसाः शृङ्गारादिरसान्वर्णयन्तः । एवंभूताः कवयो भवन्ति । तथा पृष्ठे पश्चात्प्रदेशे चामरग्राहिणीनां चामराणि प्रकीर्णकानि गृह्णन्ति वीजयन्तीति चामरग्राहिण्यस्तासाम् । व्यजनहस्ताङ्गनानामित्यर्थः । लीलावलयरणितं लीला शोभा विलासो वा तदर्थं धृतानि वलयानि कङ्कणानि । तेषां रणितं शब्दितं रणरणत्कार इत्यर्थः । भवति । एवमस्ति चेत्तर्हि विषयान् मुञ्चेति भावः । हे चेतः चेत् यदि नो एवं न भवति तर्हि सहसा अविचारेण । निश्चिन्त्येत्यर्थः । निर्विकल्पे समाधिना सर्वं संपद्यते इति निश्चिते समाधौ यमनियमादिरूपे योगे प्रविश प्रवेशं कुरु । योगमनुतिष्ठेत्यर्थः । योगमास्थाय विहिते तपसि सति उक्तरूपं अग्रे गीतमित्यादिविलासकदम्बकं प्राप्यते इति भावः ॥ ५८ ॥

विरमत बुधा योषित्सङ्गात्सुखात्क्षणभङ्गुरा-
त्कुरुत करुणामैत्रीप्रज्ञावधूजनसंगमम् ।
न खलु नरके हाराक्रान्तं घनस्तनमण्डलं
शरणमथ वा श्रोणीबिम्बं रणन्मणिमेखलम् ॥ ५९ ॥

बुध्यन्ति अनित्यत्वेन तुच्छत्वेन च संसारतत्त्वं जानन्तीति बुधाः । तत्संबोधने हे तथा हे विवेकिपुरुषाः । यूयं योषित्सङ्गात् योषितां स्त्रीणां सङ्गः संभोगः तस्मात् हेतोः यत्सुखं आनन्दः तस्माद्विरमत विरता भवत । तत्सुखं त्यजतेत्यर्थः । ननु इष्टानुपमं सुखं कथं त्यज्यते इति चेत्तत्राह । हेतुगर्भं विशेषणं क्षिलक्षणात्सुखात् क्षणभङ्गुरात् क्षणादल्पकालाद्भज्यते विनश्यते तत्तथा तस्मात् क्षणविनाशिन इत्यर्थः । पश्चात्किं कर्तव्यमिति चेत्तत्राह । करुणामैत्रीप्रज्ञावधूजनसंगमं करुणा दया मैत्री सर्वभूतेषु मित्रत्वं प्रज्ञा शास्त्रबुद्धिः ता एव वधूः(ध्वः)रमणीयाङ्गनास्तासां जनः समूहः तेन सह संगमं संयोगः संबन्धं कुरुत विद(ध)ध्वं करुणामैत्र्यादि सेवतेत्यर्थः । तत्कृतः खलु यस्मात्कारणान्नरके निरये यस्मिन्यतिष्यथ तस्मिन्नित्यर्थः । घनस्तनमण्डलं घनं निबिडं कठिनमित्यर्थः । स्तनमण्डलं कुचमण्डलं शरणं न रक्षकं न भवति तत्रापतद्दुःखं कुचमण्डलेन न निषिध्यते इत्यर्थः । किंलक्षणं स्तनमण्डलं हाराक्रान्तं हारेण एकावल्यादिना आक्रान्तं निर्भृतं शोभितमित्यर्थः । अथ वा पक्षान्तरे श्रोणीबिम्बं कटिमण्डलं भगमण्डलं इत्यर्थः । शरणं रक्षितृ न भवति । किंलक्षणं श्रोणीबिम्बं । रणन्मणिमेखलं रणन्ती शब्दायमाना मणीनां इन्द्रनीलपद्मरागप्रभृतीनां मेखला रशना दोरक इत्यर्थः । यस्मिंस्तत्तथा विलसद्रत्नदोरमित्यर्थः । एतेन क्षणध्वंसि स्त्र्यादिसुखमपहाय नित्यानन्दपदप्राप्ति करुणामैत्र्यादि सेवतेति भावः ॥ ५९ ॥

प्राण्याघातान्निवृत्तिः परधनहरणे संयमः सत्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।

तृष्णास्रोतोविभङ्गो गुरुषु च विनयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतगतिः श्रेयसामेष पन्थाः ॥६०॥

[१ रा. मू. '°विधिः']

सर्वशास्त्रेषु सर्वाणि च तानि शास्त्राणि आगमाः तेषु। अथ वा सर्वेषु शास्त्रेषु षण्मतीप्रतिपादकेषु आगमेषु एषः अयं श्रेयसां कल्याणानां सामान्यः साधारणपन्थाः मार्गो भवति। अनेन पथा श्रेयांसि प्राप्यन्त इत्यर्थः। किंलक्षणः यथा अनुपहतगतिः न उपहता स्खलिता गतिः प्रसारो यस्मिन्स तथा। यः सुखेन गम्यते क्रियते इत्यर्थः। श्रेयान् पन्था अपि सुखेन गम्यते। किंलक्षणः पन्थाः सामान्यः साधारणः षड्दर्शनेषु कुत्रापि न कश्चिद्विशेष इत्यर्थः। एषः कः शास्त्रेषु पन्थाः यत्र प्राण्याघातात् प्राणिनां जन्तूनां आघातः हनन तस्मान्निर्वृ(वृ)त्तिः निवर्तनं यज्जीवान्न हिंसेदित्यर्थः। तथा यत्परधनहरणे परेषामन्येषां धनहरणं द्रविणादिस्तेयं तस्मिन्संयमः नियमः। नियमेन परधनं न ग्रहणीयमित्यर्थः। पुनः किंल०। तथा यत्सत्यवाक्यं सत्यं अवितथं च तद्वाक्यं वचनं च। कदाचिदपि असत्यं न भाषणीयमित्यर्थः। पुनः कः पन्थाः यत्काले अवसरे शक्त्या स्वसामर्थ्यानुसारेण प्रदानं वितरणं। समये चित्य(त्त) शाठ्यविवर्जितं दानमित्यर्थः। पुनः कः पन्थाः यत्परेषामन्येषां युवतिजनकथामूकभावः। युवतिजनानां परस्त्रीजनानां कथायां वार्तायां मूकस्य जडस्य भावः मूकत्वं। परस्त्रीकथायामपि तूष्णींभावः इत्यर्थः। पुनः कः यत् तृष्णास्रोतोविभङ्गः। तृष्णायाः धनादिलौल्यस्य श्रोतः प्रवाहः अनवच्छिन्नतेत्यर्थः। तस्य विभङ्गः नाशः। यत्सदा संतोषं बिभृयादित्यर्थः। च पुनः गुरुषु मान्येषु तत्त्वोपदेष्टृष्वित्यर्थः। विनयः विनीतत्वं। गुरून्प्रति यद्विनीतः स्यादित्यर्थः। पुनः कः पन्थाः। यत् सर्वभूतानुकम्पा सर्वेषु निखिलेषु तारतम्यवर्जितमित्यर्थः। भूतेषु जीवेषु स्थावरजङ्गमेषु अनुकम्पा अनुकम्पनं एषु दुःखं मा स्यादिति भावनेत्यर्थः॥ ६०॥

मातर्लक्ष्मि भजस्व कंचिदपरं मत्काङ्क्षिणी मा स्म भू-
र्भोगेभ्यः स्पृहयालवस्तव वशे का निःस्पृहाणामसि।
सद्यःस्यूतपलाशपत्रपुटिकापात्रे पवित्रीकृते
भिक्षासक्तुभिरेव संप्रति वयं वृत्तिं समीहामहे॥ ६१॥

[१ 'अ. वशा. शोधनात्पूर्वं वशे.']

हे मातः हे जगज्जननि हे लक्ष्मि हे पद्मालये त्वं अपरं मत्तः अन्यं कंचिज्जनं भजस्व सेवस्व। परं मत्काङ्क्षिणी मां काङ्क्षते इच्छतीति मत्काङ्क्षिणी। मदभिलाषुकेत्यर्थः। मा स्म भूः मा भव। मां मा प्राप्नुहीत्यर्थः। यतः कारणात् भोगेभ्यः विषयेभ्यः स्पृहयालवः विषयेप्सवः पुरुषाः तव वशे त्वदायत्ता वर्तन्ते। पुनस्त्वं निःस्पृहाणां निर्गताभिलाषाणाम्। मोक्षेप्सुत्वात् आत्मारामाणामित्यर्थः। का असि का भवसि। तेषां पुरस्तात्त्वं

कथापि गजमया न गण्यसे इत्यर्थः । वयं संप्रतीदानीं भिक्षासक्तुभिरेव भिक्षया पात्रेण स्थाः सक्तवः अजकवलाः यवादिधानापिण्डानि वा तैरेव वृत्तिं जीविकां समीहामहे वाञ्छामः । एतेनेदानीं वयं भिक्षिताशार्थिनो नतु त्वयार्थिनः इत्यर्थः । किंलक्षणैः भिक्षासक्तुभिः सद्यः स्यूतपलाशपत्रपुटिकापात्रे सद्यः तत्क्षणमेव स्यूतानि संपटितानि सीवितानीत्यर्थः । यानि पलाशानां ब्रह्मवृक्षाणां पत्राणि पर्णानि तेषां पुटिका पुटः सा एव पात्रं अमत्रं तत्र स्थितैरिति शेषः । तेन पात्रेणानीतैरित्यर्थः । किंलक्षणे पात्रे पवित्रीकृते जलप्लावनेन पावित्रे ॥ ६१ ॥

यूयं वयं वयं यूयमित्यासीन्मतिरावयोः ।
किं जातमधुना येन यूयं यूयं वयं वयम् ॥ ६२ ॥
[ १ ज. रा. मू. ' यूयं यूयं वयं यूयं ' ]

ये सखे आवयोः त्वं च अहं च आवां तयोः आवयोः । तव च मम चेत्यर्थः । इति एवं मतिर्बुद्धिरासीत् बभूव । इतीति किं के यूयं भवन्तः ते वयं तथा ये वयं ते यूयं भवन्तः स्नेहमतिशयवशेन वयं एके इव अभिन्ना इव अभूमेत्यर्थः । अधुना इदानीं किं एवं जातं किमभवत् येन कारणेन यूयं यूयं भवन्तः भवन्त एव । वयं वयमेव यूयं वयमिति यद्भवं पुत्रशिष्यपरिजनपरिग्रहाभिप्रायेण । एतेनात्मीयत्वपरकीयत्वादि सर्वं स्वार्थलाभाभ्यामेव संपद्यते इति भावः । तदुक्तं श्रीभारते । श्रीकृष्णेन भगवता धृतराष्ट्रं प्रति स्वार्थोपक्षेपप्रसङ्गात् । तथा । वयमेव परं यूयं यूयमेव परं वयम् । इदानीमेव संबन्धाद्यूयं यूयं वयं वयमिति ॥ वयमेव परं केवलं यूयमित्यभवत् यूयमेव परं केवलं वयमित्यभवत् । यावत्स्वार्थलाभप्रयोजनं नाभवदित्यर्थः । अधुनार्थसंबन्धात् । स्वप्रयोजनलाभाभावात् यूयं तु यूयं वयं तु वयं एतेन यदा यस्य येन प्रयोजनं न संपद्यते तदा तस्य भिन्नत्वं भवतीत्यर्थः । एतेन स्वार्थलाभे सर्वः सर्वस्य प्रियः नान्यथेति भावः ॥ ६२ ॥

रम्यं हर्म्यतलं न किं वसतये श्रव्यं न गेयादिकं
किं वा प्राणसमासमागमसुखं नैवाधिकं प्रीतये ।
किंतूद्दामश्रान्तपतत्पतंगपवनव्यालोलदीपाङ्कुर-
च्छायाचञ्चलमाकलय्य सकलं सन्तो वनान्तं गताः ॥६३॥

अयमभरतखण्डवल्लीग्रामाम्बरीषवयवैन्यनहुषसगरभा( भ )गीरथपुरुषमारालर्कदिलीपपरपुरुषमुतपः सन्तः नृपतयः यद्वनान्तं वनमध्यं गताः ययुः तेषां रम्यं रमणीयं हर्म्यतलं श्रेष्ठः प्रासादः किं वसतये निवासाय न अभवदिति शेषः । तथा तेषां गेया किं गाननर्तनादिकं वस्तु श्रव्यं श्रोतुं योग्यं न किं आसीत् । अपि तु आसी-

दित्यर्थः । वा अथ वा प्राणसमासमागमसुखं प्राणैः असुभिः समा प्राणसमा अङ्गना तस्याः समागमः संभोगः तेन सुखं अधिकं सविशेषं यथा स्यात्तथा प्रीतये आनन्दाय किं नाभवत् । अपि त्वभवत् । ते किल रम्यप्रासादेष्ववसन् गेयादिकमशृण्वन् स्त्रीभिर्विलासानकुर्वंश्चेत्यर्थः । तत्कथं वनान्तं गताः इति चेत्तत्राह । किं कृत्वा तु पुनः सकलं विश्वं उद्भ्रान्तपतत्पतंगपवनव्यालोलदीपाङ्कुरच्छायाचञ्चलं उद्भूतः उत् अतिशयेन भ्रमंश्चासौ पतन् पतनशीलश्चासौ पतंगः पक्षी शलभश्च तस्य पवनः तस्य पक्षाहत्या जातः समीरणः तेन व्यालोलः विशेषेण आलोलश्चासौ दीपाङ्कुरश्च प्रदीपकलिका च तस्य छाया आतपप्रत्यनीका तद्वत् चपलं चञ्चलम् । नश्वरमित्यर्थः । आकलय्य ज्ञात्वा वेगवत्पतंगपक्षाहतिपवनप्रचलप्रदीपप्ररोहच्छायावत् चञ्चलं विनाशशीलं विश्वं परिज्ञाय सत्पुरुषाः वनान्तं तपश्चरणाय जग्मुरिति तात्पर्यम् । एतेन तैस्तपोव्यतिरेकेण न किंचित्सदनभार्याभोगादि समीचीनं ज्ञातमिति भावः ॥ ६३ ॥

किं कन्दाः कन्दरेभ्यः प्रलयमुपगता निर्झरा वा गिरिभ्यः
प्रध्वस्ता वा तरुभ्यः सरसफलभृतो वल्कलिन्यश्च शाखाः ।
वीक्ष्यन्ते यन्मुखानि प्रसभमुपगतप्रश्रयाणां खलानां
दुःखोपात्ताल्पवित्तस्मयवशपवनानर्तितभ्रूलतानि ॥ ६४ ॥

[ १ रा. टी. ' °मपगत° ' ]

कन्दा वृक्षवल्ल्याद्यङ्कुरा जटिलमूलानि कन्दरेभ्यः गह्वरप्रदेशेभ्यः किं किमु प्रलयं विनाशं उपगताः प्राप्ताः । कन्दरेषु कन्दाः किमु न सन्तीति भावः । वा अथ वा गिरिभ्यः पर्वतेभ्यः निर्झराः सरित्प्रवाहाः किं प्रलयमुपगताः । विनष्टा इत्यर्थः । वा अथ वा तरुभ्यो वृक्षेभ्यः शाखाः पत्रपुष्पफलाधाराः दीर्घप्रकाण्डाः प्रध्वस्ताः पतिताः किंलक्षणाः शाखाः सरसफलभृतः सरसानि मधुरतररसवन्ति फलानि बीजाधारप्रसवान्बिभ्रति धारयन्ति तास्तथा ताः पुनः किंलक्षणाः शाखाः । च पुनः वल्कलिन्यः वल्कलानि श्लक्ष्णाः त्वचो विद्यन्ते यासां तास्तथा । एतेन वनेषु कन्दमूलफलनिर्झरजलतरुवल्कलैः अन्नपानवस्त्रतानां सिद्धिरित्यर्थः । यत् यस्मात्कारणात् साधुभिः खलानां दुर्जनानां मुखानि वदनानि ईक्ष्यन्ते सादरं दृश्यन्ते । किंलक्षणानां खलानां प्रसभं स्वभावहठात् अपगतप्रश्रयाणां अपगतो विनष्टः प्रश्रयो विनयो येषां ते तथा तेषाम् । उच्छृङ्खलानामित्यर्थः । किंलक्षणानि मुखानि दुःखोपात्ताल्पवित्तस्मयवशपवनानर्तितभ्रूलतानि । दुःखेन क्लेशेन उपात्तं लब्धं यदल्पं स्तोकं वित्तं द्रविणं तेन स्मयो गर्वः तस्य वश आयत्तता स एव पवनः समीरणः तेन आनर्तिते आसमन्ताद्भावेन नर्तिते भ्रामिते भ्रूलते भृकुटिपल्ल्यौ येषु तानि तथा

तानि । क्षुद्रशलभस्तोकधनाहंकारेण यानि याचतो दृष्ट्वा भ्रुकुटीं नर्तयन्तीत्यर्थः । पक्षेन हि लता नृत्यन्तीति श्लेषः ॥ ६४ ॥

समारम्भा भग्नाः कति न कति वारांस्तव पशो
पिपासोस्तुच्छेऽस्मिन्द्रविणमृगतृष्णार्णवजले ।
तथापि प्रत्याशा विरमति न तेऽद्यापि शतधा
न दीर्णं यच्चेतो नियतमशनिग्रावघटितम् ॥ ६५ ॥

हे पशो अविवेकिन् हे आत्मन् तव समारम्भाः गृहव्यापाराः । गृहस्थाश्रमा इत्यर्थः । कति कतिवारान् कतिकृत्वः न भग्नाः न विनष्टाः । अपि तु बहुवारान् विनष्टा इत्यर्थः । किंलक्षणस्य तव अस्मिन् दुःखदानृत्वेन अतिप्रसिद्धे तुच्छे निःसारे द्रविणमृगतृष्णार्णवजले । द्रविणं धनमेव मृगतृष्णा मरुमरीचिका सा एवार्णवः समुद्रः तस्य जलं पानीयं तस्मिन् पिपासोः पातुमिच्छोः । तृषितस्येत्यर्थः । तृषितो हि मृगतृष्णाजलं पिपासति यथा तत्पातुं न शक्यते तथा अलभ्यधनं लब्धुं न शक्यते इत्यर्थः । तथापि एवं सत्यपि ते तव प्रत्याशा गृहविषयाभिलाषः न विरमति न शान्ता भवति कथं न विरमति अद्यापि अद्यप्रभृति एवं दशामनुभवतोऽपीत्यर्थः । यत्ते तव चेतः चित्तं अविदीर्णं न स्फुटितं तत् नियतं निश्चितं अशनिग्रावघटितं अशनिर्वज्रं ग्रावाणः पाषाणाश्च तैः घटितं निर्मितं वज्रपाषाणैर्घटितं न स्यात्तर्हि विदीर्येतेति भावः ॥ ६५ ॥

एकाकी निःस्पृहः शान्तः पाणिपात्रो दिगम्बरः ।
कदा शंभो भविष्यामि कर्मनिर्मूलनक्षमः ॥ ६६ ॥

हे शंभो शं सुखं भवत्यस्मादिति शंभुः तस्य संबोधने तथा । हे भगवन् शिव अहं कदा कस्मिन्समये कर्मनिर्मूलनक्षमः कर्मणां धर्माधर्ममूलकविधेयानां निर्मूलने उत्पाटने नाशने इत्यर्थः । क्षमः समर्थः योग्यो वा भविष्यामि । कदा कर्माणि क्षयं प्रापयिष्ये इत्यर्थः । पुनः यतः किंलक्षणोऽहं एकाकी एकः केवलः सन् अकति गच्छतीति एकाकी एकचर इत्यर्थः । पुनः किंलक्षणोऽहं निःस्पृहः निर्गता स्पृहा कुतश्चिदपि वस्तुप्राप्तिमनोरथो यस्मात्स तथा । पुनः किंलक्षणोऽहं शान्तः शमगुणयुक्तः अथ वा शस्य सुखस्य अन्तः समाप्तिः परिपूर्णता यस्मिन्यस्येति वा स शान्तः पूर्णाभिलाष इत्यर्थः । पुनः किंलक्षणोऽहं पाणिपात्रः पाणिः कर एव भोजनाय पात्रं अमत्रं यस्य स तथा । अपरिग्रहत्वात् करूपपात्रेण भुञ्जानित्यर्थः । पुनः किंलक्षणोऽहं दिगम्बरः गलिताहंकारत्वेन दिक् एव अम्बरं परिधानवस्त्रं यस्य स तथा । नग्नः इत्यर्थः । एतैर्विपक्षणो योगी ब्रह्म संपद्यते इति भावः ॥ ६६ ॥

प्राप्ताः श्रियः सकलकामदुघास्ततः किं
कल्पं स्थितं तनुभृतां तनुभिस्ततः किम् ।
न्यस्तं पदं शिरसि विद्विषतां ततः किं
संमानिताः प्रणयिनो विभवैस्ततः किम् ॥ ६७ ॥

यदि सकलकामदुघाः सकलानां निखिलानां कामानां मनोरथानां दुघाः पूरयित्र्यः श्रियः समृद्धयः धनवसनाद्यन्नाप्रभृतयः ततः किं तर्हि किं क उपयोगः । परेषामनुपकारित्वेनानुपयोगित्वादित्यर्थः । यदि तनुभृतां शरीरिणां तनुभिः शरीरैः कल्पं यावत् कल्पान्तपर्यन्तं स्थितं चिरं जीवितमित्यर्थः । ततोऽपि तर्हि किं क उपयोगः तपःसंयमदानव्रयाचारित्रायनुशीलनेन निरर्थकः गतत्वादिति भावः । यदि विद्विषतां शत्रूणां शिरसि मूर्धनि पदं चरणं न्यस्तं आरोपितं निर्जित्य यदि विद्विषश्चरणे पातिता इत्यर्थः । ततः तर्हि किं परिणामे मरिष्यमाणत्वेन बहुजीवोपतापकत्वात् तस्य कर्मणो नरकपातमूलत्वादित्यर्थः । पुनः यदि विभवैः समृद्धिभिः कृत्वा प्रणयिनो वल्लभाः सगीना इत्यर्थः । संमानिताः पूजिताः संतोषिता वा ततस्तर्हि किं क उपयोगो जात इत्यर्थः । स्वयं निःस्पृहः धर्माढ्यः । करुणेन तेषां नरकादिदुःखेभ्योऽरक्षितृत्वादित्यर्थः । एतेन श्रियाः देहस्य च पराक्रमस्य च विनयकरणस्य च परोपकारेणैव सफलत्वमिति भावः ॥ ६७ ॥

भक्तिर्भवे मरणजन्मभयं हृदिस्थं
स्नेहो न बन्धुषु न मन्मथजा विकाराः ।
संसर्गदोषरहिता विजना वनान्ता
वैराग्यमस्ति किमतः परमर्थनीयम् ॥ ६८ ॥

यदि एतद्दृश्यमाणं वस्तु अस्ति वर्तते तर्हि अतः परं एतस्माद्वस्तुनः परं अधिकं किमर्थनीयं किमभिलषणीयं । न किमपीत्यर्थः । एतत्किं भवे श्रीमहादेवे भक्तिः श्रद्धातिरेकेण भजनं यत् तथा मरणजन्मभयं हृदिस्थं वर्तते । मरणजन्मभ्यां मृत्युजननाभ्यां भयं भीतिः हृदि तिष्ठतीति हृदिस्थं अहं मरिष्यामि यत्र कुत्रापि कर्मानुसारेणावतरिष्यामीति सदा बिभ्यत्तिष्ठतीत्यर्थः । एतेन तद्भयं न किंचिदपि पातकं नाचरतीति भावः । तथा पुनः किंयत् बन्धुषु स्वजनेषु पुत्रकलत्रमित्रादिषु न स्नेहः इमे मदीयाः मां विना कथं जीविष्यन्तीति अभिनिवेशराहित्यं इत्यर्थः । स्नेहमूलानि दुःखानीति स्नेहासक्त्या दुःखं भवतीति स्नेहानासक्तिरिति भावः । पुनः यत् मन्मथजाः कामजनिता विकाराः विक्रियाः स्वभावत्यागा इत्यर्थः । तथा विजना विविक्ताः पूता इत्यर्थः । वनान्ताः वनमध्यदेशाः लभ्यन्त इति शेषः । किंलक्षणाः वनान्ताः संसर्गदोषरहिताः संसर्गो जनसंपर्क एव दोषः उपद्रवः तेन रहिताः वर्जिताः । यत्र तपोविघातको जनसंपर्को नास्तीत्यर्थः । पुनरेवं सति वैराग्यं विरक्तिभावोऽस्ति अतः परं किमपिलि( भिल )षणीयं । एतेन कृतार्थो भवतीति भावः ॥ ६८ ॥

तस्मादनन्तमजरं परमं विकाशि
तद्ब्रह्म चिन्तय किमेभिरसद्विकल्पैः ।
यस्यानुषङ्गिण इमे भुवनाधिपत्य-
भोगादयः कृपणलोकमता भवन्ति ॥ ६९ ॥

हे सखे तस्मात्कारणात् तद्ब्रह्म तं प्रसिद्धं परमेश्वरं चिन्तय स्मर । मननेनायत्ती-कुर्वित्यर्थः । एभिः प्रसिद्धैः असद्विकल्पैः असन्तो मिथ्याभूताश्च ते विकल्पन्ते स्मर्यन्ते विकल्पाः विषयाः स्रक्चन्दनान्नवनितादयः तैः किं क उपयोगो भवेदित्यर्थः । किंलक्षणं ब्रह्म । अनन्तं न विद्यते अन्तः समाप्तिः देशतः कालतश्च यस्य तदनन्तम् । सर्वत्र देशेषु सदैव वर्तमानमित्यर्थः । एतेन सुखभजनीयतोक्ता । पुनः किंलक्षणं ब्रह्म । अजरं । न विद्यते जरा कालकृतो वयःपरिणामो यस्य तत्तथा । पुनः किंलक्षणं ब्रह्म । परमं परा उत्कृष्टा माशब्देन मायाख्या शक्तिर्यस्य तत्तथा अथ वा परा उत्कृष्टा मा शोभा यस्य तत्तथा । यद्-पेक्ष्यान्यस्य महत्त्वं नास्तीत्यर्थः । एतेनातिसेव्यमिति भावः । पुनः किंलक्षणं ब्रह्म विकाशि विकाशः सदा उदयो विद्यते यस्य तत् विकाशि नित्योदितमित्यर्थः । एतेन सुखसेव्यमिति भावः । तत्किं यस्य ब्रह्मणः अनुषङ्गिणः अनुषङ्गः प्रसङ्गो विद्यते येषां ते तथोक्ताः । इमे अत्यभिलषणीयत्वेनातिप्रसिद्धाः भुवनाधिपत्यभोगादयः भुवनानां जगतामाधिपत्यं स्वामित्वं तथा भोगः विषयानुभवः आदिर्येषां ते तथोक्ताः पदार्थाः भवन्ति स्युः । अनुषङ्गिणः प्रसंगवतः पुरुषस्येव षष्ठी (?)वा यत्प्रसङ्गवतो जनस्य भुवनाधिपत्यभोगाद्याः पदार्थाः भव-न्तीत्यर्थः । तर्हि ते उत्कृष्टा भविष्यन्तीति । नेत्याह । किंलक्षणास्ते भोगादयः कृपणलो-कमताः कृपणानां कृपाविषयाणां वराकाणामित्यर्थः । लोकानां जनानां मताः अभीष्टाः । अथ वा तैर्मताः पूजिताः कृपणजना एव भोगान्स्तुवन्तीत्यर्थः । एतेन यस्यानुषङ्गापेक्षया साम्राज्यादिभोगादिसुखानि अत्यल्पानि भवन्तीति भावः ॥ ६९ ॥

रात्रिः सैव पुनः स एव दिवसो मत्वाबुधा जन्तवो
धावन्त्युद्यमिनस्तथैव निभृतप्रारब्धतत्तत्क्रियाः ।
व्यापारैः पुनरुक्तभुक्तविषयैरेवंविधेनामुना
संसारेण कदर्थिताः कथमहो मोहान्न लज्जामहे ॥७०॥

अहो इति आश्चर्ये । वयं एवंविधेन एवंलक्षणेन अमुना दुःखरूपत्वेन अतिप्रसिद्धेन संसारेण जन्मपरंपरोत्पादकभवेन कदर्थिताः अतिक्लेशिताः सन्तः मोहादज्ञानात् न लज्जामहे न जिह्रीमः । यत्र संसारे अबुधाः अविवेकिनो जन्तवः जनाः उद्यमिनः सोद्यमाः सन्तः तथैव तेनैव प्रकारेण धावन्ति उद्यच्छन्ति । किं कृत्वा रात्रिः रजनी सैव असौ एव या पूर्वं अन्धज्योत्स्नाद्युपलक्षितेत्यर्थः । पुनः

भूयोऽपि भवति कथं तथैव पूर्वमनुभूतैव तथारूपेत्यर्थः ! तथा दिवसः वासरोऽपि स एव प्रकाशधर्मशीतजनकत्वेन प्रसिद्धः । असौ एव पूर्वानुभूत इव भवतीति मत्वा ज्ञात्वा किंलक्षणाः जन्तवः निभृतप्रारब्धतत्तत्क्रियाः । निभृतं पूर्णं यथा भवति तथा प्रारब्धाः कर्तुमिषिताः ताः ताः नित्यमेव क्रियमाणाः क्रियाः कर्माणि यैस्ते तथा याः याः क्रियाः पूर्वरात्रिदिवसेषु अकुर्वन् तास्ताः प्रत्यहं कुर्वन्तीत्यर्थः । कैः व्यापारैः व्यवसायैः किंलक्षणैर्व्यापारैः पुनरुक्तभुक्तविषयैः । पुनरुक्तं वारं वारं भुक्ता अनुभूता विषयाः सुखदुःखादयो येषां ते तथा तैः । एतेन कृतस्य करणं भुक्तस्य भोजनमित्यादिव्यापारस्य प्रत्यहमनुशीलनात् पिष्टपेषणन्यायेन निरर्थककरणत्वात् अबुधत्वमित्यर्थः । वयमिति जानन्तोऽपि तथाकरणाज्जिर्लज्जा इति भावः ॥ ७० ॥

महीं शक्ता शय्या विपुलमुपधानं भुजलता
वितानं चाकाशं व्यजनमनुकूलोऽयमनिलः।
स्फुरद्दीपश्चन्द्रो विरतिवनितासङ्गमुदितः
सुखं शान्तः शेते मुनिरतनुभूतिर्नृप इव ॥ ७१ ॥

[१ रा. मू. 'शय्या शक्ता'। २ अ. 'शान्तं']

मुनिर्मननशीलो योगी शान्तः शमगुणयुक्तः सन् सुखं सानन्दं यथा भवति तथा शेते स्वपिति । निश्चिन्तो वर्तते इत्यर्थः । किंलक्षणो मुनिः अतनुभूतिः अतनुः महती परमानन्दरूपा भूतिः समृद्धिर्यस्य स तथा यतः कारणात् मही अवनिः शक्ता समर्था शय्या पर्यङ्को भवति मह्यां शेते इत्यर्थः । तथा भुजलता बाहुवल्ली विपुलं महत् उपधानं उच्छीर्षकं भवति । भुजलतामुपधाय शेते इत्यर्थः । च पुनः यस्य मुनेः आकाशं अन्तरिक्षं वितानं उल्लोचो भवति । अनाच्छादिते वेश्मे शेते इत्यर्थः । तथा अयं अनुकूलः सुखस्पर्शः अनिलो वायुः व्यजनं प्रकीर्णकं तालवृन्तकं वा । तथा यस्य मुनेः चन्द्रः शशधरः स्फुरद्दीपः स्फुरंश्चासौ दीपश्च तथा । ज्वलत्प्रदीपः यस्य शयने चन्द्रमा एव दीपक इत्यर्थः । पुनः किंलक्षणो मुनिः विरतिवनितासङ्गमुदितः विरतिः विरक्तिरेव वनिता अनुरागवती स्त्री तस्याः आसङ्गः संगतिः तेन मुदितः आनन्दितः वैराग्यानन्दमा( वा )नित्यर्थः । क इव शेते । अतनुभूतिः महासमृद्धिर्नृप इव । यथा महाविभूतिः नृपः सुखं शेते तस्यापि शय्या शक्ता रत्नादिनिर्मिता बहुमूल्या दृढा च भवति तथा विपुलं कोमलं महच्च उपधानं भवति तथा आकाशवन्निर्मलं वितानं उल्लोचो भवति। तथा सुखवातप्रवर्तकं व्यजनं तालवृन्तो भवति । तथा स्फुरद्दीपो भवति, तथा सोऽपि वनितासङ्गमुदितो भवतीति सर्वं निरवद्यम्। एतेन योगिसम्राजो निश्चिन्तत्वे साम्यमिति भावः ॥ ७१ ॥

किं वेदैः स्मृतिभिः पुराणपठनैः शास्त्रैर्महाविस्तरैः
स्वर्गग्रामकुटीनिवासफलदैः कर्मक्रियाविभ्रमैः ।
मुक्त्वैकं भवभारदुःखरचनाविध्वंसकालानलं
स्वात्मानन्दपदप्रवेशकलनं शेषा वणिग्वृत्तयः ॥ ७२ ॥

एकं केवलं स्वात्मानन्दपदप्रवेशकलनं मुक्त्वा स्वात्मानन्द एव परमानन्द एव पदं वस्तु तत्र प्रवेशकलनं अनुभवधारणं मुक्त्वा विहाय। केवलं परब्रह्मानन्दानुभवं वर्जयित्वेत्यर्थः। किंलक्षणं स्वात्मानन्दपदप्रवेशकलनं । भवभारदुःखरचनाविध्वंसकालानलं। भवे संसारे भारभूतानि दुर्वहानि यानि दुःखानि तेषां रचना प्राप्तिः तस्या विध्वंसाय नाशाय कालानलं कल्पान्तानलतुल्यं एवंविधं तत्तत् मुक्त्वा वेदैः ऋक्प्रभृतिभिश्चतुर्भिः किं क उपयोगः। वेदेष्वभ्यस्तेषु यदि परमात्मपदप्रवेशो न भवति तदा वेदैः पठितैः किं जातं। अपि तु न किंचित्। तथा स्मृतिभिः स्मर्यन्ते ताः स्मृतयः मन्वादिधर्मशास्त्राणि ताभिः किं तथा पुराणानां ब्राह्म १ पद्म २ वैष्णव ३ शैव ४ भागवत ५ नारदीय ६ मार्कण्डेय ७ ब्रह्मवैवर्त ८ लिङ्ग ९ ग्नेय १० वायवीय ११ मात्स्य १२ कौर्म १३ वाराह १४ नारसिंह १५ वामन १६ भविष्योत्तर १७ ब्रह्माण्डा १८ ख्यानां अष्टादशानां पठनान्यध्ययनानि तैः किं क उपयोगः। यदात्मज्ञानं न भवति तदा तत्पठने श्रम इत्यर्थः। तथा महाविस्तरैः अतिविस्मृ(स्तृ)तैः शास्त्रैः वेदान्तमीमांसान्यायप्रभृतिभिः बह्वर्थशासनैः किं क उपयोगः जात इत्यर्थः। तथा कर्मक्रियाविभ्रमैः कर्मणां यज्ञादीनां क्रियाः का(क)रणानि तासां विभ्रमाः विलासाः तैः। नानाकर्मभिरित्यर्थः। किंलक्षणैः कर्मक्रियाविभ्रमैः स्वर्गग्रामकुटीनिवासफलदैः। स्वर्ग एव ग्रामः जनसंनिवासः तत्र कुटी एकं गृहं तत्र निवासः निवसनं तमे(दे)व फलं नान्यदिति भावः। ननु अन्ये केऽपि श्रुतिस्मृतिपुराणशास्त्राणि पठित्वा तत्त्वानि व्याकुर्वन्तो दृश्यन्ते श्रूयन्ते च तत्कथं तैरनुपयोग इति चेत्तत्राह। शेषाः अध्ययनव्याख्यानादिरूपाः वृत्तयः वणिग्वृत्तयः वणिजानां नैगमानां व्यवहारकराणां वृत्तयः व्यापारा इव। वणिजो हि यथा व्यवहारेण जीविकायै अन्नवसनादिवस्तूनि धृत्वा विक्रीणन्ति न तु परेषामर्त्त्या(?)तथा तेऽपि विद्वांसः जीविकायै श्रुत्यादीनि पठन्ति न तु परमात्मज्ञानायेति सर्वमनवद्यम् ॥ ७२ ॥

आयुः कल्लोललोलं कतिपयदिवसस्थायिनी यौवनश्री-
रर्थाः संकल्पकल्पा घनसमयतडिद्विभ्रमा भोगपूराः ।
कण्ठाश्लेषोपगूढं तदपि न हि चिरं यत्प्रियाभिः प्रणीतं
ब्रह्मण्यासक्तचित्ता भवत भवभयाम्भोधिपारं तरीतुम् ॥७३॥

हे जनाः तस्माद्ब्रह्मणि भगवति परमेश्वरे आसक्तचित्ताः विलग्नचेतसः भवत स्त । किं कर्तुं भवभयाम्भोधिपारं तरीतुं । भवात्संसाराद्यद्भयं जन्ममरणादिजनितं साध्वसं तदेव दुरवगाहत्वात् अम्भोधिः समुद्रः तस्य पारः परतीरमिव अन्तः तं निस्तरीतुं । संसारमुत्क्रम्य परं पदं प्राप्तुमित्यर्थः । यतः आयुः जीवितकालः कल्लोललोलं कल्लोलवत् लोलं चपलं । नश्वरमित्यर्थः । तथा यौवनश्रीः यौवनस्य तारुण्यस्य श्रीः समृद्धिः । सुरूपमित्यर्थः । कतिपयदिवसंस्थायिनी । कतिपयान् कतिसंख्याकान् । अल्पानित्यर्थः । दिवसान् तिष्ठतीत्येवंशीला वर्तते । यौवनमपि अनित्यमित्यर्थः । तथा च अर्थाः धनादिपदार्थाः संकल्पकल्पाः संकल्पः कर्म मानसं संकल्पात् मनोरथात् ईषन्न्यूनाः संकल्पकल्पाः । अर्था अपि अनित्या इत्यर्थः । तथा भोगपूराः भोगानां अन्नपानस्त्र्यादिविषयाणां पूराः अतिशयाः घनसमयतडिद्विभ्रमाः घनसमये वर्षाकाले तडितो विद्युत इव विभ्रमः स्फुरणं येषां ते तथा । घनसमये हि तडिदतिचपला भवतीति भोगाः अत्यनित्या इत्यर्थः । तथा प्रियाभिः प्रेयसीभिः कान्ताभिः यत्प्रणीतं अत्यादरेण विहितं कण्ठाश्लेषोपगूढं कण्ठस्य गलस्याश्लेषः वल्गनं यथा स्यात्तथा उपगूढं आलिङ्गनं आलिङ्गनजातं सुखं तदपि न चिरं तदपि बहुकालं न भवति शब्दबुद्धिकर्मणां त्रिक्षणावस्थायित्वेन तदपि सुखं अतिनश्वरमित्यर्थः ॥ ७३ ॥

ब्रह्माण्डमण्डलीमात्रं किं लाभाय मनस्विनः ।
शफरीस्फुरितेनाब्धेः क्षुब्धता जातु जायते ॥ ७४ ॥

ब्रह्माण्डस्य जगतः मण्डली मण्डलं तदेव इति ब्रह्माण्डमण्डलीमात्रं । अत्यल्पमित्यर्थः । मनस्विनः प्रशस्तमनसः पुरुषस्य किं लाभाय अभीष्टफलाय भवति । अपि तु न भवति । ब्रह्माण्डलाभेन मनस्वी पुमान् लाभं न मनुते इत्यर्थः । अत्रार्थान्तरन्यासेनोक्तमर्थं द्रढयति । शफरीस्फुरितेन शफर्याः प्रोष्ठ्याः स्फुरितेन चलनेन अब्धेः समुद्रस्य जातु कदाचिदपि क्षुब्धता उत्कल्लोलत्वं । सकम्पत्वमित्यर्थः । न जायते न संपद्यते यथा शफर्युच्चलनेनाब्धिर्न क्षुभ्यति तथा ब्रह्माण्डलाभेऽपि मनस्वी न हृष्यतीति भावः ॥ ७४ ॥

यदासीदज्ञानं स्मरतिमिरसंस्कारजनितं
तदा दृष्टं नारीमयमिदमशेषं जगदपि ।
इदानीमस्माकं पटुतरविवेकाञ्जनजुषां
समीभूता दृष्टिस्त्रिभुवनमपि ब्रह्म मनुते ॥ ७५ ॥

हे सखे यदा अज्ञानं आसीत् अविवेको बभूव । किंलक्षणं अज्ञानं स्मरतिमिरसंस्कारजनितं । स्मर एव काम एव तिमिरं मोहरूपं अन्धकारं तस्य संस्कारः वेगः तेन जनितं उत्पादितं । तदा इदं अशेषं समग्रं जगदपि विश्वमपि नारीमयं स्त्रीमयं । स्त्रीभिर्व्याप्तमित्यर्थः । दृष्टं विलोकितं ज्ञातमित्यर्थः । इदानीं तु अस्माकं दृष्टिः 'दृष्टिर्ज्ञानेऽक्षिदर्शने' इत्युक्तत्वात् दृष्टिर्ज्ञानं मन इत्यर्थः । समीभूता सती असमा समा भूता इति समीभूता ।

पर( रि )हतवैषम्या सती निर्विकल्पेत्यर्थः । त्रिभुवनमपि जगत्त्रितयमपि ब्रह्म परमात्मानं मनुते जानाति । किंलक्षणानां अस्माकं । पटुतरविवेकाञ्जनजुषां पटुतरः शास्त्रादिपरिज्ञानेन अतिस्पष्टः यः विवेकः तत्त्वज्ञानं स एव अञ्जनं नयनागदं जुषन्ते सेवन्ते ते पटुतरविवेकाञ्जनजुषस्तेषां । यथा पटुतरजनसेविनां नृणां दृष्टिर्नेत्रं गतकाचकामलादिदोषत्वेन समीभूतस्वभावं प्राप्ता सती सर्वमपि वस्तु सम्यक् पश्यति तथा विवेकसेवनेन मनसि परिहृतवैषम्ये सति ब्रह्मज्ञानं भवतीति भावः ॥ ७५ ॥

रम्याश्चन्द्रमरीचयस्तृणवती रम्या वनान्तस्थली
रम्यं साधुसुहृत्समागमसुखं काव्येषु रम्याः कथाः ।
कोपोपाहितवाष्पाविन्दुतरलं रम्यं प्रियाया मुखं
सर्वं रम्यमरम्यतामुपगते चित्ते न किंचित्पुनः ॥७६॥

[१ रा. टी. °मनित्यता°]

चन्द्रमरीचयः चन्द्रस्य चन्द्रमसो मरीचयः किरणाः रम्याः मनोहराः तापापहारित्वेन कामजनका इत्यर्थः । तथा तृणवती हरितग्रासवती दूर्वाङ्कुराकुलेत्यर्थः । वनान्तस्थली वनान्तस्य वनमध्यदेशस्य स्थली भूमिः रम्या मनोहारिणी तत्स्वरूपदर्शनकामोत्पादिकेत्यर्थः । तथा साधुसुहृत्समागमसुखं रम्यं । साधवः सज्जनाः सुहृदो मित्राणि च तेषां समागमः मिलनं तेन यत्सुखं आनन्दः तद्रम्यं । परमप्रीतिजनकत्वेन निवृत्तिदायीत्यर्थः । तथा काव्येषु कविप्रणीतप्रबन्धेषु रम्याः मनोहराः कथाः वार्ताः आख्यायिका इत्यर्थः । तथा प्रियायाः प्रेयस्याः मुखं वदनं रम्यं मनोहरं । किंलक्षणं मुखं कोपोपाहितपाष्पाविन्दुतरलं कोपेन प्रणयकलहेन उपाहितं उत्पादितं च यद्वाष्पं अश्रु च तस्य विन्दवः कणाः तरलाश्चपला यस्मिंस्तत्तथा । एतदुक्तं सर्वं सकलं वस्तुजातं रम्यमपि अनित्यतां अनित्यत्वं उपगते मन्यमाने चित्ते अन्तःकरणे सति पुनः कदाचिदपि न किंचित् । किंचिदपि रम्यं न भवतीत्यर्थः । एतेन परिज्ञाततत्त्वस्य पुंसः न किंचिदपि रमणीयं वस्तु मनः आकर्षतीति भावः ॥ ७६ ॥

भिक्षाशी जनसङ्गमध्यरहितः स्वायत्तचेष्टः सदा
हीनादानविविक्तमार्गनिरतः कश्चित्तपस्वी स्थितः ।
रम्याक्षीणविशीर्णकीर्णवसनप्रान्तोत्थकन्यासखो
निर्मानो निरहंकृतिः शमसुखाभोगकबद्धस्पृहः ॥७७॥

[१ अ. °दानादान°]

एवंभूतः कश्चिदनिर्दिष्टचरित्रः तपस्वी तापसः स्थितः प्रसिद्धः एवंभूतो भवति स तपस्वीत्यर्थः । किंलक्षणः भिक्षाशी भिक्षां याच्ञयाप्तं अन्नं अश्नाति भुनक्तीति तथा । पुनः किंलक्षणः तपस्वी जनसंगमध्यरहितः । जनानां लोकानां संगः कुतश्चिन्मिलनं तथा

तेषां मध्यं मध्ये वासः ताभ्यां रहितः वर्जितः । न केषांचित्संगं कुर्वीत न लोकेषु वसेत्येत्यर्थः । पुनः किंलक्षणः तपस्वी सदा निरन्तरमेव स्वायत्तचेष्टः स्वायत्ता स्वाधीना चेष्टा व्यापारो यस्य स तथा । न कदाचित्पराधीन इत्यर्थः । पुनः किंलक्षणः तपस्वी हानादानविविक्तमार्गनिरतः । हानं त्यजनं आदानं ग्रहणं ताभ्यां विविक्तः रहितः पूतो वा यो मार्गः पद्धतिः तत्र रतः तत्परः । न किंचिज्जहाति न च किंचित्त्यजति इत्यर्थः । पुनः किंलक्षणः तपस्वी रथ्याक्षीणविशीर्णकीर्णवसनप्रान्तोत्थकन्थासखः । रथ्यासु राजमार्गेषु क्षीणानि त्रुटितानि तथा विशीर्णानि जीर्णानि च तथा कीर्णानि विक्षिप्तानि च तानि वसनानि वस्त्राणि च तेषां प्रान्ताः शकलानि तैः कृत्वा उत्था उदिता निष्पन्नेत्यर्थः । या कन्था शकठसज्ज्ञा परिधानकञ्चुकः । स सखा सहचरो यस्य स तथा । स्वयं सज्जितकन्थां परिदधदित्यर्थः । पुनः किंलक्षणः तपस्वी । निर्मानः माननं पूजनं मानः निर्गतः मानो यस्मात्स तथा । अवधूत इत्यर्थः । पुनः किंलक्षणो योगी निरहंकृतिः निर्गता अहंकृतिः अहमिति गर्वो यस्मात्स तथा । अत एव पुनः किंलक्षणः शमसुखाभोगैकबद्धस्पृहः शमसुखं शमरूपो य आनन्दः तस्य आभोगः परिपूर्णता तत्र एका केवला बद्धा धृता स्पृहा वाञ्छना येन स तथा । केवलं शममेव रोचयन्नित्यर्थः । कश्चित्तपस्वीत्यनेन एवंभूतस्तपस्वी विरल इति भावः ॥ ७७ ॥

मातर्मेदिनि तात मारुत सखे ज्योतिः सुबन्धो जल
भ्रातर्व्योम निबद्ध एष भवतामन्त्यः प्रणामाञ्जलिः ।
युष्मत्सङ्गवशोपजातसुकृतोद्रेकस्फुरन्निर्मल-
ज्ञानापास्तसमस्तमोहमहिमा लीये परे ब्रह्मणि ॥७८॥

हे मातः जननि हे मेदिनि हे पृथिवि । हे तात हे पूज्य हे मारुत हे वायो । हे सखे मित्र हे ज्योतिः हे तेजः । तथा हे सुबन्धो बन्धित्र जल पानीय । हे भ्रातः सोदर हे व्योम हे आकाश । भवतां युष्माकं एष अन्त्यः अन्तभवः प्रणामाञ्जलिः प्रणामाय अञ्जलिः करसंपुटबद्धः कृतः । युष्मानापृच्छे इत्यर्थः । अहं परे ब्रह्मणि परमेश्वरे लीये लयं प्राप्नोमि किंलक्षणोऽहं युष्मत्संगवशोपजातसुकृतोद्रेकस्फुरन्निर्मलज्ञानापास्तसमस्तमोहमहिमा । युष्माकं भवतां संगवशेन संबन्धेन उपजातः संपन्नश्चासौ सुकृतोद्रेकः पुण्यातिशयश्च तेन स्फुरत् प्रकाशत् यन्निर्मलं निरुपाधिकं ज्ञानं तेन अपास्तः त्यक्तः मोहमहिमा अज्ञानातिशयो यस्य स तथा । भवत्संबन्धेन शरीरम( व )त्वे परमज्ञानत्वं प्राप्य मुक्तो भवेयमिति भावः ॥ ७८ ॥

यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महा-
न्संदीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥७९॥

यावत् यत्कालपर्यन्तं इदं शरीरं कलेवरं स्वस्थं सुखावस्थं तथा अरुजं गतरोगं वर्तते तथा यावत् जरा वृद्धत्वं दूरतः दूरे वर्तते च पुनः यावत् इन्द्रियशक्तिः इन्द्रियाणां चक्षुःश्रोत्रादीनां शक्तिः समर्थता अप्रतिहता अस्खलिता भवति। यावदिन्द्रियाणि पटूनि भवन्तीत्यर्थः। पुनश्च यावत् आयुषः जीवितकालस्य क्षयो नाशो न भवति। यावदायुरनुभूयते इत्यर्थः। तावत्तस्मिन्नेव काले विदुषा विचक्षणेन पुरुषेण आत्मश्रेयसि आत्मनः स्वस्य श्रेयः कल्याणं तस्मिन्निमित्ते। स्वश्रेयोनिमित्तमित्यर्थः। महान् समर्थः प्रयत्नः उद्यमः कार्यः कर्तव्यः। ननु तावदेवेत्याग्रहेण उद्यमः कथं कर्तव्यः इत्यपेक्षायां अर्थान्तरं न्यस्यति। यतः भवने गृहे संदीप्ते संप्रज्वलति सति कूपखननं कूपस्य प्रहेः खननं निष्पादनं प्रति उद्यमः उद्योगः कीदृशः क इव भवति। गृहे प्रज्वलति सति अहो जलानयनाय कूपं खनध्वं इत्युद्यमे विहितेऽपि प्रज्वलन्नग्निर्न शाम्यति तथा देहादिस्वास्थ्ये(स्थ्ये) आयुःसत्त्वे च सति आत्मनः श्रेयोर्थं उद्यमितव्यमिति भावः ॥ ७९ ॥

गङ्गातरङ्गकणशीकरशीतलानि
विद्याधराध्युषितचारुशिलातलानि।
स्थानानि किं हिमवतः प्रलयं गतानि
यत्सावमानपरपिण्डरता मनुष्याः ॥ ८० ॥

किमिति वितर्के। हिमवतः हिमाचलस्य संबन्धीनि स्थानानि स्थीयन्ते आस्यन्ते येषु तानि स्थानानि प्रदेशा इत्यर्थः। प्रलयं गतानि नाशं प्राप्तानि। किंलक्षणानि गिरिस्थानानि गङ्गातरङ्गकणशीकरशीतलानि। गङ्गायाः देवसरितः तरङ्गाः कल्लोलाः तेषां कणाः लवाः तेषामपि शीकराः अत्यल्पकणाः तैः शीतलानि अतिशीतानीत्यर्थः। एतेन प्रदेशानां अतिपवित्रत्वं सुखकारित्वं चोक्तं। पुनः किंलक्षणानि स्थानानि। विद्याधराध्युषितचारुशिलातलानि। विद्याधरैर्देव विशेषैः अध्युषितानि आश्रितानि चारूणि मनोहराणि शिलातलानि शिला एव पट्टाः येषु तानि तथा। एतेन तेषां अतिमनोहरत्वं चोक्तम्। तत्कथमिति चेत्तत्राह। यत्यस्मात्कारणात् मनुष्याः मानवाः सावमानपरपिण्डरता भवन्ति अवमानेन अवगणनया सह वर्तमानाः सावमानाः एवंविधाश्च ये परपिण्डाः परेषां अन्येषां पिण्डाः जीवनायान्नकवलाः तेषु रता आसक्ताः स्युः। एतेनोक्तगुणानि हिमगिरिस्थानानि गत्वा चेद्भवेयुस्तदा मानवाः अवमन्तॄणां खलानां जीवनायोपास्तिं विदध्युरिति भावः ॥ ८० ॥

यदा मेरुः श्रीमान्निपतति युगान्ताग्निनिहतः
समुद्राः शुष्यन्ति प्रचुरमकरग्राहनिलयाः।
धरा गच्छत्यन्तं धरणिधरपादैरपि धृता
शरीरे का वार्ता करिकलभकर्णाग्रचपले ॥८१॥

यदा श्रीमान् कनकरत्नमयः मेरुः सुमेरुगिरिः निपतति निपतिष्यति। अत्र भविष्यत्यर्थे भूत्। किंलक्षणो मेरुः युगान्ताग्निनिहतः युगान्ताग्निना युगान्तकृता संवर्तकेपा वैश्वानरेण निहतः दग्धितः। भस्मीकृत इत्यर्थः। तथा समुद्राः क्षारोदेक्षुरसोदसुरोदघृतोददधिमण्डोदक्षीरोदशुद्धोदाः सप्त जलधयः शुष्यन्ति शोषं प्राप्स्यन्ति। निर्जला भविष्यन्तीत्यर्थः। किंलक्षणाः समुद्राः प्रचुरमकरग्राहनिलयाः प्रचुराः बहुतराः मकराः मत्स्यगुराः ग्राहाः तिम्यादयो दुष्टा जलचराः तेषां निलयाः। आवासाः येष्वनेके तिमितिमिंगिलराघवादयो जलचरा वसन्तीत्यर्थः। तथा धरा धरति विश्वानि बिभर्तीति तथा। पृथिवी। अन्तं रसातलं गच्छति किंलक्षणा धरा। धरणिधरपादैरपि धृता धरणिधरस्य शेषनागस्य पादा इव चरणा इव प्रतीयमाना ये हस्ताः तैर्धृतापि अथ वा धरणिधराणां पर्वतानां पादैर्धृतापि तर्हि शरीरे शीर्यते नश्यतीति नाम्ना निर्ब्यूढे देहे करिकलभकर्णाग्रचपले करिणः गजस्य कलभः शावकः तस्य कर्णाग्रं तद्वत् चपलं चञ्चलं। नश्वरमित्यर्थः। तस्मिञ्जेवंभूते सति का वार्ता का कथा। कथनीयेति शेषः। इदं तु न युज्यते इति भावः ॥ ८१ ॥

पातालमाविशसि यासि नभो विलङ्घ्य
दिग्मण्डलं भ्रमसि मानस चापलेन।
भ्रान्त्यापि जातु विमलं कथमात्मनीनं
तद्ब्रह्म न स्मरसि निर्वृतिमेषि येन ॥ ८२ ॥

हे मानस हे मनः त्वं चापलेन चपलत्वेन पातालं आविशति। पातालमित्युपलक्षणं तलातितलसुतलतलातलमहातलरसातलपातालानीत्यर्थः। आविशसि प्रविशसि। तत्र गच्छसीत्यर्थः। अथ वा पातालमित्युक्त्वा नीचवस्तुषु गच्छसि। तथा त्वं नभोऽन्तरिक्षं विलङ्घ्य उत्क्रम्य यासि गच्छसि। स्वर्गादिलोकेषु गच्छसीत्यर्थः। अथ वा नभ इति उच्चत्वोपलक्षणार्थं उच्चवस्तुषु गच्छसीत्यर्थः। तथा दिग्मण्डलं दिशां ककुभां मण्डलं चक्रवालं भ्रमसि चलसि। सकलदिक्षु गच्छसीत्यर्थः। परं तु जातु कदाचिदपि भ्रान्त्याऽपि केनापि कथाप्रसङ्गेनापि तद्ब्रह्म परमात्मानं श्रीपरमेश्वरं न स्मरसि न ध्यायसि। किंलक्षणं ब्रह्म विमलं विगतः मलः अविद्यारूपोपाधिर्यस्मात्तत्। निरञ्जनमित्यर्थः। तत् किं ब्रह्म येन ब्रह्मस्मरणेन निर्वृतिं परमानन्दं एषि प्राप्नोषि। एतेन त्वं ब्रह्म कथं विस्मरसीति भावः ॥ ८२ ॥

अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा
मणौ वा लोष्टे वा कुसुमशयने वा दृषदि वा ।
तृणे वा स्त्रैणे वा मम समदृशो यान्तु दिवसाः
क्वचित्पुण्येऽरण्ये शिव शिव शिवेति प्रलपतः ॥८३॥

मम दिवसाः वासराः क्वचित् कस्मिंश्चित्पुण्ये पवित्रे अरण्ये वने इति प्रलपतः इति ब्रुवतः सतः यान्तु गच्छन्तु इति किं प्रलपतः शिव शिव शिवेति । शिव शिवेति वीप्सया अहर्निशं तदेव ब्रुवत इत्यर्थः। किंलक्षणस्य मम एतेषु वक्ष्यमाणेषु वस्तुषु समदृशः समानदृष्टेः। तुल्यत्वेन मन्यमानस्येत्यर्थः । एतेषु केषु अहौ सर्पे विषधरे वा अथ वा हारे एकावल्यादौ कण्ठोरुके समदृशः पुनः क्व बलवति सबले रिपौ शत्रौ दुःखकारिणि वा । अथ वा सुहृदि मित्रे हितकर्तरि पुनः क्व मणौ रत्ने बहुमूल्ये अथ वा लोष्टे कर्करशकले पुनः क्व कुसुमशयने पुष्पराचितशय्यायां । अथ वा दृषदि पाषाणे अतिकठिने वा पुनः क्व तृणे वा अतिनिःसारे घासे वा अथ वा स्त्रैणे स्त्रीणां समूहः स्त्रैणं कामिनीवृन्दं तत्र वा अतिमनोहरे समदृशः । एतेन निरस्तभेदस्य श्रीभगवच्चिन्तनपरस्य च मुक्तिर्भविष्यतीति भावः ॥ ८३ ॥

त्रैलोक्याधिपतित्वमेव विरसं यस्मिन्महाशासने
तल्लुब्ध्वाशनवस्त्रमानघटने भोगे रतिं मा कृथाः ।
भोगः कोऽपि स एक एव परमो नित्योदितो जृम्भते
यत्स्वादाद्विरसा भवन्ति विभवास्त्रैलोक्यराज्यादयः ॥८४॥

[१ रा. टी. 'तल्लब्धाशन' ]

यस्मिन्महाशासने परमात्मज्ञाने स्फुरति सति त्रैलोक्याधिपतित्वमेव त्रिभुवनस्वामित्वमेव विरसं गतास्वादं अतिफल्गु इत्यर्थः । तत् तस्मात्कारणात् भोगे स्त्र्यादिसुखे रतिं प्रीतिं मा कृथाः न कुरु । किंलक्षणे भोगे । लब्धाशनवस्त्रमानघटने लब्धानि कृतधित्राणानि च तानि अशनं भोजनं वस्त्रं परिधानं मानं प्रतिष्ठा तेषां घटना योजना यस्मिन्स तथा तस्मिन् । अतश्च सः प्रसिद्धः कोऽपि अनिर्वचनीयः भोगः सुखरूपः जृम्भते प्रसरीसर्ति सदा जागर्तीत्यर्थः । किंलक्षणो भोगः नित्योदितः नित्यं उदितः सदा प्रकाशमा(वा!) न परमात्मज्ञानरूपं इत्यर्थः । स कः यत्स्वादात् यस्य स्वादः अनुभवस्तस्मात् त्रैलोक्यराज्यादयः त्रिभुवनप्रभुत्वप्रभृतयो विभवाः समृद्धयः सुखानि वा विरसाः निःसाराः । अतितुच्छा इत्यथः । भवन्ति संपद्यन्ते । एतेन त्रिभुवनप्रभुत्वादयोऽपि विभवाः परमात्मरूपज्ञानसुखलेशमपि नार्हन्तीति भावः ॥ ८४ ॥

नाभ्यस्ता भुवि वादिवृन्ददमनी विद्या विनीतोचिता
खड्गाग्रैः करिकुम्भकूटदलनैर्नार्कं न नीतं यशः ।

कान्ताकोमलपल्लवाधररसः पीतो न चन्द्रोदये
तारुण्यं गतमेव निःफलमहो शून्यालये दीपवत् ॥८५॥

अहो आश्चर्ये खेदे वा। अस्माकं तारुण्यं यौवनं निःफलमेव अप्रयोजनमेव गतं अतिक्रान्तं । किंवत् शून्यालये शून्ये निर्मनुष्ये आलये गृहे दीपवत् प्रदीप इव स यथा शून्यगृहे निःप्रयोजनत्वात् निःफलो भवति कुतः यतः कारणात् विद्या शब्दशास्त्रतर्कशास्त्रप्रभृतिका न अभ्यस्ता न शिक्षया आयत्तीकृता । किंलक्षणा विद्या विनीतानां विनयवतां उचिता योग्या । पुनः किंलक्षणा विद्या भुवि पृथिव्यां सकलायामिति शेषः वादिवृन्ददमनी वादिनां प्रवक्तॄणां वृन्दानि समूहाः तानि दमयति उपशमयति । जयतीत्यर्थः । तथा यया वादिवृन्दानि जीयन्त इत्यर्थः । तथा अस्माभिः खड्गाग्रैः खड्गानां कौक्षेयकाणां अग्राणि फलकानि तैः कृत्वा यशः कीर्तिः प्रशस्यं नाम इत्यर्थः । नाकं स्वर्गं न नीतं न प्रापितं तत्र स्व( सु )र्यशो न गीतं इत्यर्थः । किंलक्षणैः खड्गाग्रैः करिकुम्भकूटदलनैः करिणां हस्ती( स्ति )नां कुम्भाः शिरःपिण्डाः तेषां कूटानि पीठानि दलयन्ति छिन्दन्ति तानि करिकुम्भकूटदलनानि तैः । एतेन विद्याभ्यासस्य शौर्यस्य च पुरुषार्थतोक्ता । तथा चन्द्रोदये उदिते चन्द्रमसि सति कान्ताकोमलपल्लवाधररसः न पीतः । कान्तायाः सुन्दर्याः कोमलो मृदुः पल्लव इव किशलय इव यः अधरः ओष्ठः स एव रसः ऐक्षवादिरस इव रसः न आस्वादितः तथाविधकामभोगस्यापि पुरुषार्थत्वात् तदनुसेवनेन तारुण्यस्य गतत्वान्निःफलत्वमिति ॥८५॥

जीर्णा एव मनोरथाः स्वहृदये यातं जरां यौवनं
हन्ताङ्गेषु गुणाश्च वन्ध्यफलतां याता गुणज्ञैर्विना ।
किं युक्तं सहसाभ्युपैति बलवान्कालः कृतान्तोऽक्षमी
र्ण्यां ज्ञातं मधुसूदनाङ्घ्रिकमलं मुक्त्वास्ति नाऱ्या गतिः॥८६॥

[१ रा. टी. 'विन्ध्य' २ रा. टी. 'आ ज्ञातं']

इदं कृतं इदं करिष्यामि पश्चादिदं प्राप्स्यामि तदनु कृतार्था भविष्यामीत्याद्याः मनोरथाः अभिलाषाः स्वहृदये आत्ममनसि जीर्णाः वृद्धाः अभवन् । परं तु न किंचित्प्राप्तमित्यर्थः । तथा यौवनमपि तारुण्यमपि जरां वृद्धत्वं जरठत्वमित्यर्थः । यातं प्राप्तमित्यर्थः। तथा हन्त इति खेदे। च पुनः अस्माकं गुणाश्च वि(व)न्ध्यफलतां वन्ध्यस्य गिरेः फलानि तेषां भावस्तत्ता तां विन्ध्याचलफलतुल्यत्वं याताः प्राप्ताः विन्ध्याचलस्य हि अतिगहनत्वेन मनुष्याणां दुःसंचरत्वात् अनेकानि फलानि अनुपभोग्यान्यविरूढानि भवन्ति । तथा अस्माकं गुणा वैदग्ध्यौदार्यशौर्यचातुर्यसौन्दर्यादयः

निरर्थका पभूवुरित्यर्थः । कथं पभूवुरित्याह । गुणज्ञैर्गुणवेदिभिर्विना कृते न केऽपि गुणवन्तो भवन्तीति भावः । तथा बलवान्महाबलः सर्वत्राप्रतिविद्धप्रसर इत्यर्थः । कालः सहसा वेगेन अभ्युपैति जगदाक्रामति तथा कृतान्तः यमः अक्षमी अक्षमावान् । मृत्युर्न प्रतीक्षते इत्यर्थः । अहो एवं सति किं युक्तं किं उपयोगि घटते इति चेत्तत्राह । आः इति क्रोधे आश्चर्ये वा ज्ञातं विदितं मधुसूदनाङ्घ्रिकमलं मुक्त्वा मधुसूदनस्य श्रीनारायणस्याङ्घ्रियुगलं चरणद्वन्द्वं त्यक्त्वा तच्चरणकमलसेवां विहायेत्यर्थः । एवं आपद्व्याप्तस्य पुरुषस्य अन्या गतिः अन्यच्च शरणं न अस्ति । एतेन श्रीभगवत्सेवक एव सुखेन संसारं तरति नान्य इति भावः । त्रिपुरान्तकाङ्घ्रियुगलं मुक्त्वेति वा पाठः तत्र त्रिपुरान्तकः श्रीमहादेवः तस्याङ्घ्रियुगलं त्यक्त्वेत्यादि ॥ ८६ ॥

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि
क्षुधार्तः सञ्शालीन्कवलयति शाकादिवलितान् ।
प्रदीप्ते रागाग्नौ सुदृढतरमाश्लिष्यति वधूं
प्रतीकारे व्याधेः सुखमिति विपर्यस्यति जनः ॥ ८७ ॥

जनो मनुष्यः व्याधेः रोगस्य प्रतीकारे नाशोपाये सविधमाने सति सुखमिति इदं कल्याणमिति मन्यमानः सन् इति शेषः । विपर्यस्यति विपर्यासं प्राप्नोति । विपरीतं मन्यते इत्यर्थः । इतीति किं यतः तृषा तृष्णया आस्ये मुखे शुष्यति शोषं प्राप्नुवति सति सलिलं पानीयं पिबति धयति । किंलक्षणं सलिलं स्वादु मधुरं पुनः किंलक्षणं सुरभि सुगन्धद्रव्यवासितं । एतेन तृष्णाक्रान्तो जलं पीत्वा सुखी भवतीत्यर्थः । तथा क्षुधा बुभुक्षया आर्तः पीडितः सन् शालीन् तन्दु(ण्डु)लानोदनान्कवलयति भक्षयति किंचलक्षणान्शालीन् शाकादिवलितान् शाकाः पत्रफलादयः ते आदयो येषां दधिदुग्धघृतकादीनां तैः वलिताः मिश्रिताः तान् एतेन बुभुक्षितः सन्नन्नादि भुक्त्वा पीत्वा च सुखितः स्यादिति भावः । तथा रागाग्नौ रञ्जयति हर्षयतीति रागो मन्मथः स एव अग्निर्वैश्वानरः तस्मिन् प्रदीप्ते प्रवृद्धे सति जनः सुदृढतरं सुतरां अतिशयेन दृढतरं गाढं यथा भवति तथा वधूं वल्लभां संभोगातिशयं प्रापयति । सा वधूः कान्ता तां आश्लिष्यति आलिङ्गति । एतेन कामार्तः सन् वधूं सह संभोगं विधाय सुखितः स्यादिति भावः ॥ ८७ ॥

स्नात्वा गाङ्गैः पयोभिः शुचिकुसुमफलैरर्चयित्वा विभो त्वां
ध्यायन्निर्विश्य पश्यन्निति धरकुहरग्रावपर्यङ्कमूले ।
आत्मारामः फलाशी गुरुवचनरतस्त्वत्प्रसादात्स्मरारे
दुःखं मोक्ष्ये कदाहं समकरचरणे पुंसि सेवासमुत्थम् ॥८८॥

हे स्मरारे कामशत्रो हे श्रीमहादेव अहं त्वत्प्रसादात् भवत्कृपया दुःखं अशम कदा कस्मिन्नवसरे मोक्ष्ये त्यक्ष्यामि। किंलक्षणं दुःखं समकरचरणे पुंसि समौ समानौ करौ हस्तौ चरणौ पादौ यस्य स तथा तस्मिन्। समकरचरणो हि पुमान् धनवान्भवतीति सामुद्रिके प्रसिद्धम्। अथ वा समकरचरणे सह मकरेण मत्स्येन वर्तमानौ समकरौ तथाविधौ चरणौ पादौ यस्य स तथा। मत्स्याङ्कितचरणो हि पुमान्धनवान्भवतीत्यपि। तस्मिन्पुंसि पुरुषे विषये सेवासमुत्थं सेवा सेवनं तेन समुत्थं उत्पन्नं धनवत्पुरुषसेवयोत्थमित्यर्थः। किंलक्षणोऽहं गाङ्गैः गङ्गासंबन्धिभिः पयोभिरुदकैः स्नात्वा स्नपनं विधाय हे विभो स्वामिन् त्वां भवन्तं ध्यायन्स्मरन्। किं कृत्वा शुचिकुसुमफलैः शुचीनि पवित्राणि कुसुमसहितानि फलानि तैः त्वां अर्चयित्वा पूजयित्वा। पुनः किं कृत्वा स्मरन् क्षितिधरकुहरग्रावपर्यङ्कमूले निर्विश्य क्षितिधरस्य पर्वतस्य हिमालयादेः कुहरं गह्वरं तत्र यो ग्रावा पाषाणः स एव पर्यङ्कः तल्पः तस्य मूले अधोभागे निर्विश्य उपविश्य। अन्योऽपि गृहस्थः पर्यङ्कमूले उपविश्य ध्यायति। किंलक्षणोऽहं आत्मारामः आत्मनि ब्रह्मणि त्वयि आसमन्ताद्भावेन रामः क्रीडा यस्य स तथा। स्वात्मानुभवसंपन्न इत्यर्थः। पुनः किंलक्षणोऽहं तथापि देहधारणाय फलानि वन्यानि अश्नातीति तथा। अथ वा फले मोक्षलक्षणे साध्ये आशा वाञ्छा विद्यते यस्य स तथा पुनः किंलक्षणोऽहं गुरुवचनरतः गुरोरुपदेष्टुराचार्यस्य वचनं उपदेशः तत्र रतः तत्परः तदुक्तं सर्वं संपादयन्नित्यर्थः। एतेनैवंविधोऽहं भूत्वा च तत्स्वरूपं कदा प्राप्स्यामीति भावः॥ ८८॥

महेश्वरे वा जगतां महेश्वरे जनार्दने वा जगदन्तरात्मनि।
न भेदहेतुः प्रतिपत्तिरस्ति मे तथापि भक्तिस्तरुणेन्दुशेखरे॥८९॥

जगतां भुवनानां महेश्वरे स्वामिनि महेश्वरे श्रीमहादेवे वा निश्चितं जगदन्तरात्मनि जगतां स्थावरजङ्गमानां अन्तरात्मनि अन्तर्यामिणि जनार्दने श्रीनारायणे मे मम भेदहेतुः भेदनिमित्ता प्रतिपत्तिः युक्तिरासक्तिर्वा नास्ति। तथापि यद्यप्येवं भेदो नास्ति मम भक्तिः मत्संबन्धिनी मत्कर्तृका भक्तिः तरुणेन्दुशेखरे तरुणः इन्दुः बालचन्द्रः शेखरे मुकुटे यस्य स तथा। चन्द्रचूडे इत्यर्थः। श्रीमहादेवे भक्तिरस्तु॥ ८९॥

रे कन्दर्प करं कदर्थयसि किं कोदण्डटङ्कारवै
रे रे कोकिल कोमलैः कलरवैः किं त्वं वृथा वल्गसि।
मुग्धे स्निग्धविदग्धमुग्धमधुराक्षेपैः कटाक्षैरलं
चेतश्चुम्बति चन्द्रचूडचरणध्यानामृतं संप्रति॥९०॥

रे इति नीचसंबोधने हे कन्दर्प रे मन्मथ त्वं कोदण्डटङ्कारवैः इमं जेष्यामीति कोदण्डस्य धनुषः टङ्कारवैः विस्फारैः कृत्वा करं हस्तं किं कदर्थयसि क्लिश्नासि। त्वं मां जेतुं न प्रभुरसीत्यर्थः। तथा रे रे कोकिल हे परपुष्ट त्वं कोमलैः मृदुभिः कलरवैः

मनोहरशब्दैः कृत्वा वृथा निरर्थकं किं वल्गसि किं व्याप्रियसे । त्वद्वृथ्वनिभिः श्रुतैरहं न मुह्यामीत्यर्थः । तथा हे मुग्धे सुन्दरि कटाक्षैः अपाङ्गदर्शनैः अलं पूर्यतां कटाक्षैर्न विलोकनीयोऽस्मीत्यर्थः । किंलक्षणैः कटाक्षैः स्निग्धविदग्धमुग्धमधुराक्षेपैः स्निग्धानां स्नेहवतां तथा विदग्धानां अतिचतुराणां तथा मुग्धानां सुरूपतरुणानां मधुरा मनोहराः आक्षेपाः निःक्षेपाः आकुञ्चनानि च येषु ते तथा तैः तत्कथमित्यपेक्षायामाह यतः संप्रति इदानीमस्माकं चेतः मनः चन्द्रचूढचरणध्यानामृतं चन्द्रचूढस्य चन्द्रमौलेः श्रीमहादेवस्य चरणौ पदे तयोर्ध्यानं स्मरणं तदेव अमृतं पीयूषं चुम्बति पिबति अतितृषितः पानासक्तः सन् न किंचित्परुषतीति भावः । एतेनेदानीं चन्द्रचूढचरणस्मरणामृतं पिबतो मे युष्माभिः प्रयोजनं नास्तीति तात्पर्यम् ॥ ९० ॥

भोगा भङ्गुरवृत्तयो बहुविधास्तैरेव चायं भव-
स्तत्कस्येह कृते परिभ्रमत रे लोकाः कृतं चेष्टितैः ।
आशापाशशतोपशान्तिविशदं चेतः समाधीयतां
कामोच्छित्तिवशे स्वधामनि यदि श्रद्धेयमस्मद्वचः ॥९१॥

रे लोकाः हे जनाः बहुविधाः अनेकप्रकाराः भोगाः स्रक्चन्दनवनितादयः भङ्गुरवृत्तयः भज्यते आमर्द्यते इति भङ्गुरा नश्वरा वृत्तिः वर्तनं (अ?)स्त्येत्यर्थः । येषां ते तथा विनाशशीला इत्यर्थः । तैरेव विषयैः च अन्यत् अयं भवः संसारः भवति भोगसेवयैव तदाश(स)क्त्या संसारे जनोऽवतरतीति भावः । तत्तस्मात्कारणात् रे जना यूयं कस्य कृते कस्य अर्थसीद्धर्थं परिभ्रमत पर्यटत अतः चेष्टितैः वल्गितैः व्यापारैरित्यर्थः । कृतं अलं यदि चेदस्मद्वचः अस्माकं वचनं श्रद्धेयं श्रद्धातुं योग्यं मानार्हमित्यर्थः । तर्हि चेतः अन्तःकरणं स्वधामनि स्वस्थानके हृदये एकाग्रतायामित्यर्थः । समाधीयतां आरोप्यतां । चेतः एकाग्रतया स्वस्थं क्रियतामित्यर्थः । किंलक्षणे स्वधामनि कामोच्छित्तिवशे कामोच्छित्त्या विषयभोगत्यागेन वशं अधीनं तस्मिन् मुक्तविषयत्वेन स्वायत्ते । किंलक्षणं चेतः आशापाशशतोपशान्तिविशदं । आशा नाम आयता तृष्णाः ता एव पाशाः बन्धनरज्जवः तेषां शतानि तेषां उपशान्तिः शमनं त्यजनमित्यर्थः । तया विशदं निर्मलं मनः समाधीयतां स्थाप्यतां । एतेन नैकानामाशानां त्यागेन मनः स्वधाम नीत्वा विषयभोगाश्चस्वरांश्च विदित्वा संसारभयं च मनसिकृत्य सुखं तिष्ठतेति भावः ॥ ९१ ॥

धन्यानां गिरिकन्दरे निवसतां ज्योतिः परं ध्यायता-
मानन्दाश्रुजलं पिबन्ति शकुना निःशङ्कमङ्केशयाः ।
अस्माकं तु मनोरथोपरचितप्रासादवापीतट-
क्रीडाकाननकेलिकौतुकजुषामायुः परं क्षीयते ॥ ९२ ॥

धन्यानां भाग्यवतां सुकृतिनामित्यर्थः । आनन्दाश्रुजलं आनन्देन अश्रु यत् तदेव जलं उदकं हर्षाश्रुजलं शकुनाः पक्षिणः चटकायाः निःशङ्कं स्थावरोऽयं कश्चिन्नविष्यतीति मत्वा निर्भयं यथा स्यात्तथा पिबन्ति धयन्ति । किंलक्षणाः शकुनाः अलक्केशया जटके उत्सङ्गे शेरते स्वपन्ति ते । तथा उत्सङ्गे वसन्त इत्यर्थः । किंलक्षणानां धन्यानां पुरुषाणां गिरिकन्दरे निवसतां गिरेः हिमाद्र्याद्रेः कन्दरं गह्वरं तस्मिन्निवसतां वर्तमानानां । पुनः किंलक्षणानां तेषां परं ज्योतिः परं ब्रह्मस्वरूपं ध्यायतां चिन्तयतां । एवंभूतास्ते कृतार्था इत्यर्थः । तु पुनः अस्माकं आयुर्जीवितकालः परं केवलं क्षीयते नश्यति न ब्रह्मध्यानं नापि विषयोपभोगश्च । तेन निरर्थकं व्रजतीत्यर्थः । यतः किंलक्षणानां अस्माकं मनोरथैरेव रचितप्रासादवापीतटक्रीडाकाननकेलिकौतुकजुषां । मनोरथेन मानससंकल्पेन उपरचिताः परिनिर्मिताः ये प्रासादाः श्रेष्ठहर्म्याणि तेषु वाप्यः सरस्यस्तासां तटानि तीराणि तेषु यानि क्रीडाकाननानि क्रीडावनानि तेषु केलिः क्रीडा तस्यां कौतुकं कुतूहलं जुषन्ति सेवन्ते ते तथा तेषाम् ॥ ९२ ॥

आघ्रातं मरणेन जन्म जरयाप्यत्युज्ज्वलं यौवनं
संतोषो धनलिप्सया शमसुखं प्रौढाङ्गनाविभ्रमैः ।
लोकैर्मत्सरिभिर्गुणा वनभुवो व्यालैर्नृपा दुर्जनै-
रस्थैर्येण विभूतिरप्यपहृता ग्रस्तं न किं केन वा ॥ ९३ ॥

[ रा. मू. 'लोके म०' रा. टी. लोके इत्यपि (१). ]

मरणेन मृत्युना जन्म जननं आघ्रातं शिङ्घितं ग्रस्तमित्यर्थः । एतेन यत्र जन्म तत्र मरणमिति भावः । तथा जरयापि वार्धक्येनापि उज्ज्वलं शोभमानं यौवनं तारुण्यं ग्रस्तं एतेन यत्र यौवनं तत्र जरा भविष्यतीति भावः । तथा धनलिप्सया धनलोभेन संतोषः संतुष्टिः ग्रस्तः एतेन यत्र धनलोभः तत्र न संतोषो भवतीत्यर्थः । तथा शमसुखं शान्तिसुखं प्रौढाङ्गनाविभ्रमैः प्रौढानां महतीनां चतुरीणामित्यर्थः । अङ्गनानां विलासवतीनां विभ्रमाः विलासास्तैः । एतेन यत्र विलासिनीविभ्रमा भवन्ति तत्र शमसुखं नास्तीत्यर्थः । तथा लोकैः भुवनविषये जनविषये मत्सरिभिः ईर्ष्यावद्भिः दुर्गुणैरित्यर्थः । गुणा वैदुष्यनैपुण्यादयः ग्रस्ताः । तथा वनभुवः अरण्यभूमयः अतिरम्या अपि व्यालैः हिंस्रैरजगरव्याघ्रादिभिः ग्रस्ताः नाशिताः प्रायाः कृता इत्यर्थः । तथा नृपा राजानः दुर्जनैः खलैर्ग्रस्ताः । एतेन यत्र दुर्जनास्तत्र राजानः अकिंचित्करा इत्यर्थः । तथा विभूतिः समृद्धिरपि अस्थैर्येण नश्वरत्वेन अपहृता ग्रस्ता । एतेन यत्र यत्र विभूतयस्तत्र नश्वरत्वमित्यर्थः । वा इति आश्चर्ये । इह लोके केन पदार्थेन किं न ग्रस्तं अपि तु सर्वेण सर्वं विनाशितमित्यर्थः ॥ ९३ ॥

आधिव्याधिशतैर्जनस्य विविधैरारोग्यमुन्मूल्यते
लक्ष्मीर्यत्र पतन्ति तत्र विवृतद्वारा इव व्यापदः ।

जातं जातमवश्यमाशु विवशं मृत्युः करोत्यात्मसा-
त्तत्किं नाम निरङ्कुशेन विधिना यन्निर्मितं सुस्थितम्॥९४॥

नाम इति निश्चितं। तत्किं वस्तु पदार्थः स कः। यद्वस्तु निरङ्कुशेन निःशङ्केन स्वेच्छाचारिणेत्यर्थः। विधिना विधात्रा सुस्थितं नित्यं अनश्वरमित्यर्थः। निर्मितं विरचितं कृतमित्यर्थः। यतः विविधैर्महदल्पादिभेदेन अनेकप्रकारैः आधिव्याधिशतैः आधयः पुत्र-कलत्रधनाद्यनुपलब्ध्या मानस्यो व्यथाः। तथा व्याधयोऽष्टोत्तरशतं ज्वरातिसारादयः तेषां शतानि सहस्राणि तैः कर्तृभिर्जनस्य जन्तोः आरोग्यं अरोगत्वं सुखमित्यर्थः। उन्मूल्यते नि-कृन्त्यते नाश्यते इत्यर्थः। तथा यत्र लक्ष्मीः समृद्धिर्भवति तत्र व्यापदो व्यसनानि पतन्ति आगच्छन्ति। राजदण्डाद्युपद्रवा भवन्तीत्यर्थः। किंलक्षणाः व्यापदः विवृतद्वारा इव विवृतं प्रकाशितं द्वारं आगमनमार्गो यासां तास्तथा अतिपश्यमाना इव आगच्छन्तीत्यर्थः। तथा जातं जातं उत्पन्नं उत्पन्नं जातं प्राणिसमूहं अवश्यं निश्चितं आशु शीघ्रं मृत्युर्मरणं आत्मसात् आत्माधीनं करोति मारयतीत्यर्थः। किंलक्षणं जीवजातं विवशं अस्वतन्त्रं। तदधीनमित्यर्थः॥ ९४॥

कृच्छ्रेणामेध्यमध्ये नियमिततनुभिः स्थीयते गर्भगर्ते
कान्ताविश्लेषदुःखव्यतिकरविषमे यौवने विप्रयोगः।
नारीणामप्यवज्ञा विलसति नियतं वृद्धभावेऽप्यसाधुः
संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किंचित्॥९५॥

रे इति नीचसंबोधने। मनुष्याः हे मानवाः यूयं वदत ब्रूत। यदि चेत्संसारे भवेत् अल्पमपि स्तोकमपि किंचित्सुखं शर्म अस्ति विद्यते। कुतः यतः युष्माभिः कृच्छ्रेण कष्टेन नियमिततनुभिः नियमिता बद्धा तनुः शरीरं येषां ते तथा तैः एवंभूतैः सद्भिः गर्भगर्ते गर्भ एव गर्तः विवरं तस्मिन् मातुरुदरे इत्यर्थः। स्थीयते स्थानमाप्यते। किंलक्षणे गर्भगर्ते विण्मूत्रामेध्यमध्ये (इति पाठे?) विण्मूत्रैः विष्टाप्रस्रावैः अमेध्यं उच्छिष्टं मध्यं अन्तरं यस्य स तथा तस्मिन् विष्टोच्चारैः अतिकुत्सिते इत्यर्थः। तथा यौवने तारुण्ये विप्रयोगः विरहः कष्टः अर्थात्प्राणप्रेयसीभिः स्त्रीभिः। किंलक्षणे यौवने कान्ताविश्लेषदुःखव्यतिक-रविषमे। कान्तायाः प्रेयस्याः विश्लेषो विरहः तेन दुःखस्य अशर्मणः व्यतिकरः संपर्कः तेन विषमं असहनीयं दुःखदमित्यर्थः। एतेन यौवनेऽतिक्रान्ते रूपवत्प्रेयसीविरहेण न किंचित् भवतीत्यर्थः। तथा नियतं निश्चितं वृद्धभावेऽपि स्थविरत्वेऽपि नारीणामपि दुःकुल-स्त्रीणां अवज्ञा अवगणना विलसति भवति तत्र स्त्रियोऽप्यवमन्यन्ते इत्यर्थः। किंभूता अवज्ञा असाधुः दुःखरूपा यथा तस्य वृद्धस्य महद्दुःखं भवतीत्यर्थः। एतेनास्मिन्संसारे न क्वापि कस्यचिदवस्थासु सुखमस्तीति भावः॥ ९५॥

आयुर्वर्षशतं नृणां परिमितं रात्रौ तदर्धं गतं
तस्यार्धस्य परस्य चार्धमपरं बालत्ववृद्धत्वयोः।
शेषं व्याधिवियोगदुःखसहितं क्लेशादिभिर्नीयते
जीवे वारितरङ्गचञ्चलतरे सौख्यं कुतः प्राणिनाम् ॥ ९६ ॥

[ १ रा. टी. ' °बहुलं ' २ रा. टी. ' °ङ्गबुद्बुदचले ' ]

नृणां पुरुषाणां आयुः जीवितकालः वर्षशतं वर्षाणां शतं संवत्सराणां शतं यावत्परिमितं परिगणितं निर्मितमित्यर्थः। तदर्धं तस्य वर्षशतस्यार्धं अर्धभागः पञ्चाशद्वर्षाणि इत्यर्थः। आयुर्निद्रया रात्रौ रजन्यां गतं अतिक्रान्तं क्षीणमित्यर्थः। तस्य अर्धस्य पञ्चाशद्वर्षाणां परस्य अर्धस्य पञ्चविंशतिवर्षाणामित्यर्थः। अर्धं सार्धद्वादश वर्षाणि पुनः सार्धद्वादश वर्षाणीत्यर्थः। आयुः बालत्ववृद्धत्वयोः गतं। बालत्वं बाल्यं अविवेकेनेत्यर्थः। तथा वृद्धत्वं स्थविरत्वं कार्यास( श )क्त्या अवगणनयेत्यर्थः। एतेन बालत्ववार्धक्ययोर्दायुस्तन्निरर्थकं गतमित्यर्थः। पुनः शेषं उर्वरितं आयुः पञ्चविंशतिपरिमितवर्षमित्यर्थः। कुटुम्बजीविकायै सेवादिभिः परिपरिचरणादिक्लेशैः नीयते क्षयं प्राप्यते किंलक्षणं आयुः व्याधिवियोगदुःखसहितं। व्याधयो ज्वरातिसारग्रहणीप्रभृतयः तथा वियोगाः अभीष्टकलत्रपुत्रमित्रादिविरहाः तेषां एव वा दुःखं बहुलं प्रचुरं यस्मिंस्तत्तथा। अतः जीवे जीव्य( व )ति श्वसितीति जीवो देहः तस्मिन् प्राणिनां जीवानां सौख्यं सुखस्य शर्मणः समाहारः सौख्यं कुतः कस्मात्पदार्थाद्भवति। अपि तु न कस्मादित्यर्थः। यतः किंलक्षणे जीवे वारितरङ्गबुद्बुदचले। वारिणः उदकस्य तरङ्गाः कल्लोलाश्च तथा बुद्बुदाः महाद्विण्टिरफुल्लनानि च तद्वत् चले चपले। क्षणध्वंसिनि अतिनश्वरे इत्यर्थः। एवं देहस्थितिं परिज्ञाय स्वश्रेयमाचरणीयमिति भावः ॥ ९६ ॥

अभिमतमहामानग्रन्थिप्रभेदपटीयसी
गुरुतरगुणग्रामाम्भोजस्फुटोज्ज्वलचन्द्रिका।
विपुलविलसल्लज्जावल्लीविदारकुठारिका
जठरपिठरी दुःपूरेयं करोति विडम्बनाम् ॥ ९७ ॥

इयं जठरपिठरी जठरमुदरमेव पिठरी मृद्भाण्डी विडम्बनां दुरुपद्रवं करोति। पराभवतीत्यर्थः। किंलक्षणा दुःपूरा दुःखेन महायासेन पूर्यते इति दुःपूरा दुर्भरेत्यर्थः। यतः पुनः किंलक्षणा जठरपिठरी अभिमतमहामानग्रन्थिप्रभेदपटीयसी। अभिमतः अत्यभीष्टो यो मानः गर्वः स एव दुःश्लाघत्वात् ग्रन्थिरिव ग्रन्थिः दुर्भेदः तन्तुगुणसंश्लेषः तस्य प्रभेदः उच्छोटनं तत्र पटीयसी पटुतरा अतिसमर्थेत्यर्थः। यद्यपि

मानो मुच्यते इत्यर्थः । पुनः किंलक्षणा जठरपिठरी गुरुतरगुणग्रामाम्भोजस्फुटो-ज्ज्वलचन्द्रिका । गुरुतरा अतिमहान्तो ये गुणाः वैदुष्यशौर्यादयः तेषां गणाः समूहाः त एवाम्भोजानि पद्मानि तेषां स्फुटनं स्फुटः विकाशः तत्र संकोचाय उज्ज्वलचान्द्रका इव उज्ज्वलचन्द्रिका निर्मलज्योत्स्नेत्यर्थः । यथा निर्मलज्योत्स्नया हि पद्मानि संकोच्यन्ते तथा जठरपिठर्या गुणा इति भावः । पुनः किंलक्षणा जठरपिठरी विपुलविलसद्वज्जा-वल्लीविदारकुठारिका । विपुला अतिमहती विलसती शोभमाना या लज्जा व्रीडा सा एव वल्ली लता तस्या विदारणं विदारः छेदः तत्र कुठारिका वृश्चनपत्रं पर-शुरित्यर्थः । यथा कुठारिकया वल्ली छिद्यते तथा जठरपिठर्या लज्जेत्यर्थः । एतेन उदरार्थं पुरुषो लज्जां जहातीति भावः ॥ ९७ ॥

ब्रह्मज्ञानविवेकिनोऽमलधियः कुर्वन्त्यहो दुःकरं
यन्मुञ्चन्त्युपभोगभाञ्ज्यपि धनान्येकान्ततो निःस्पृहाः ।
नो प्राप्तानि पुरा न संप्रति न च प्राप्तौ दृढः प्रत्ययो
वाञ्छामात्रपरिग्रहाण्यपि परं त्यक्तुं न शक्ता वयम् ॥९८॥

अहो इत्याश्चर्ये अमलधियः निर्मलमतयः पुरुषाः दुःकरं दुःखेन कर्तुमशक्यं तत्कर्म कुर्वन्ति विदधति । किंलक्षणाः ब्रह्मज्ञानविवेकिनः ब्रह्मज्ञानेन आत्मसाक्षात्कारेण विवेकः विशदं स्फुटमित्यर्थः । ज्ञानं येषां ते तथा परमार्थज्ञानिन इत्यर्थः । तत्किं कुर्वन्तीत्याह । यत् एकान्ततः निश्चयात् निःस्पृहाः निर्गता स्पृहा इच्छा येषां ते तथा । गताभिलाषा इत्यर्थः । तथाभूताः सन्तः धनानि गजरथतुरगवसनान्नकान्तातनयादीनि द्रविणानि स्वयं मुञ्चन्ति त्यजन्ति । ननु तर्हि अकिंचित्कराणि भविष्यन्तीति नेत्याह । किंलक्षणानि धनानि उपभोगभाञ्ज्यपि उपभोगं उपयोगं भजन्ते इत्येवंशीलानि अपि । पटुतरोपयोगेन भोग्यत्वं भजन्ति अपि । एतेन भोगेन सार्थकत्वं भजन्त्यपि त्यजन्तीत्यर्थः। वयं तु परं केवलं वाञ्छा-मात्रपरिग्रहाण्यपि वाञ्छामात्रेण मनोरथमात्रेण परिग्रहः स्वीकारो येषां तानि न तु कदा-चिदनुभूतभोगानीत्यर्थः । धनानि असन्त्यपीति भावः । त्यक्तुं उज्झितुं न शक्ताः न समर्थाः स्म । तत्कथमिति चेत्तत्राह । यतस्तानि धनानि पुरा पूर्वं न प्राप्तानि न लब्धा-न्यभवन् । च पुनः संप्रति इदानीं तानि न विद्यन्ते च पुनः प्राप्तौ धनानां लब्धौ दृढः निश्चितः प्रत्ययः न विश्वासो न भवति । धनानि प्राप्स्यामि एवेति नेति वा विश्वासो नास्ती-त्यर्थः । एतेन कालत्रयेऽपि निर्धना एवापि वयं मनोरथेन संकल्पितानि अपि धनानि त्यक्तुं न शक्नुमः । प्राप्तुमिच्छाम इत्यर्थः । अतो मन्दा इति भावः ॥ ९८ ॥

व्याघ्रीव तिष्ठति जरा परितर्जयन्ती
रोगाश्च शत्रव इव प्रहरन्ति देहम् ।
आयुः परिस्रवति भिन्नघटादिवाम्भो
लोकस्तथाप्यहितमाचरतीति चित्रम् ॥ ९९ ॥

अहो इत्याश्चर्ये । इति चित्रं महदाश्चर्यं इतीति किं । लोको जनः तथापि एवं सत्यपि अहितं अनात्मी(त्म)नीनं आचरति करोति तथा कथं सतीत्याह । यतः जरा विद्यसा वृद्धत्वमित्यर्थः । परितर्जयन्ती भीषयन्ती सती तिष्ठति सावधाना विद्यते । क्रेव व्याघ्रीव मृगादनेव । यथा व्याघ्री परितर्जयन्ती सती ग्रसितुं सावधाना भवेत् । च पुनः रोगाः ज्वरातिसाराद्याः देहं शरीरं प्रहरन्ति प्रहारं विदधति देहे पतन्तीत्यर्थः । के इव शत्रवो वैरयन्त इव । यथा शत्रवो वैरिणः देहे प्रहरन्ति तथा आयुः जीवितकालः परिस्रवति क्षरति क्षीयते इत्यर्थः । किमिव परिस्रवतीत्याह । भिन्नघटात् भग्नकुम्भात् अम्भ इव पानीयमिव तथया प्रतिक्षणं प्रस्रवति तथा आयुरपि प्रतिक्षणं क्षीयते इत्यर्थः ॥ ९९ ॥

भव्यं भक्तं ततः किं कदशितमथ वा वासरान्ते ततः किं
कौपीनं वा ततः किं किमथ सितमहच्चाम्बरं वा ततः किम् ।
एका भार्या ततः किं शतगुणगणिता कोटिरेका ततः किं
त्वेको भ्रान्तस्ततः किं करितुरगशतैर्वेष्टितो वा ततः किम् ॥ १०० ॥

[ १ रा. द्वी. ' °हत्स्वम्बरं । २ अ. ' गुणिता ']

चेत् भव्यं श्रेष्ठं स्वादु इत्यर्थः । भक्तं अन्नं अशितं भुक्तं ततः तर्हि किं किमभूदित्यर्थः । अथ वा वासरान्ते दिवसावसाने सति कदु कुत्सितं अस्वादु इत्यर्थः । अशितं भुक्तं ततः किं किमभूत् । आहारस्य गिलितस्यैकरूपत्वादित्यर्थः । वा निश्चितं गैरिकारक्तचेलखण्ड परिहितमिति शेषः । ततः किं । वा अथ वा सितमहत्स्वम्बरं वा सितं श्वेतं निर्मलं महद्बहुमूल्यं सुशोभनं अम्बरं वस्त्रं परिहितं ततः किं देहाच्छादनस्यैकरूपत्वादित्यर्थः । यदि एका भार्या सहचारिणी ततः किं अथ वा एका शतगुणगणिता कोटिः शतगुणं शतकृत्वः गणिता आवृत्ता कोटिः शतलक्षसंख्याका स्त्रीणां भवति ततः किं भोगस्यैकरूपत्वाद्वधाने विरसत्वाच्चेत्यर्थः । पुनः एको केवलो भ्रान्तः अटितो भवति ततः किं । वा अथवा करितुरगशतैः करिणश्च तुरगाश्च तैः वेष्टितः परिवृतो भ्रान्तस्ततोऽपि किं । न किंचिदित्यर्थः । एतेन देहस्य नश्वरत्वे एकत्वानेकत्वभ्रमणे को विशेषः । न कोऽपीत्यर्थः । एतेन दृश्यस्पर्शादयः पदार्थाः सर्वेऽप्यनित्या इति भावः ॥ १०० ॥

भोगास्तुङ्गतरङ्गभङ्गचपलाः प्राणाः क्षणध्वंसिनः
स्तोकान्येव दिनानि यौवनसुखं प्रीतिः प्रियेष्वस्थिरा ।
तत्संसारमसारमेव निखिलं मत्वा बुधा यौवने
लोकानुग्रहपेशलेन मनसा यत्नः समाधीयताम् ॥ १०१ ॥

हे बुधाः हे विद्वांसो जनाः तत्तस्मात्कारणान्निखिलं संसारं संसारे प्राप्तं भोगादिवस्तु असारं साररहितं अतितुच्छमित्यर्थः । बद्ध्वा विदित्वा यौवने तारुण्येऽपि मनसा चित्तेन यत्नः प्रयत्नः महोयम इत्यर्थः । समाधीयतां क्रियतां किंछ्रूपेण मनसा लोकानुग्रहपेशलेन लोक्यन्ते दृश्यन्ते विचार्यन्ते ते लोकाः अतिसूक्ष्माः महा

प्रौढाश्च ये स्थावरजङ्गमाः लोकाः प्राणिनः तेषामनुग्रहो हितकरणं रक्षणदानादि तत्र पेशलं अतिसावधानं तेन । एतेन परोपकारैकतत्परेणेत्यर्थः । तत्कृतः यतः भोगाः भुञ्जन्ते ते विषयसुखानि ते तुङ्गतरङ्गभङ्गचपलाः । तुङ्गा महान्तो ये तरङ्गाः कल्लोलाः तेषां भङ्गशननं तद्वत् चपलाः चपलाः महान्तो हि कल्लोलाः शीघ्रं नश्यन्तीति भावः । तथा प्राणाः आशवः ( असवः ) क्षणध्वंसिनः वर्तन्ते क्षणेनापि ध्वंसो विनाशो येषां ते तथा । अतिनश्वरा इत्यर्थः । तथा यौवनसुखं यौवनमेव सुखं तारुण्यानन्दः स्तोकान्येव अतिवरिमितान्येव दिनानि वासराणि भवन्ति । यौवनमपि बहुकालं न तिष्ठतीत्यर्थः । तथा प्रियेषु वल्लभेषु स्त्रीपुत्राद्विष्वपि वस्तुषु प्रीतिः प्रियता अस्थिरा । अतिप्रेयांसोऽपि कदाचित् कार्यवशेन स्वार्थासंपादनादप्रिया भवन्तीति भावः ॥ १०१ ॥

**सृजति तावदशेषगुणाकरं पुरुषरत्नमलंकरणं भुवः ।**
**तदपि तत्क्षणभङ्गि करोति चेदहह कष्टमपण्डितता विधेः ॥१०२॥**

विधिर्ब्रह्मा तावत्प्रथमं पुरुषरत्नं पुरुषेषु रत्नं श्रेष्ठं उत्तमपुरुषमित्यर्थः । सृजति उत्पादयति । जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते । किंलक्षणं पुरुषरत्नं अशेषगुणाकरं अशेषाणां समग्राणां शूरत्वोदारत्वविनयित्वविद्वत्त्वपरोपकारित्वरूपवत्त्वसुशीलत्वादीनां गुणानां आकरं खनिं । यस्मादनेके गुणा उद्भवन्ति अन्ये च यस्मादुणान् शिक्षयन्तीति भावः । पुनः किंलक्षणं पुरुषरत्नं । अतएव भुवः पृथिव्याः अलंकरणं शृङ्गारभूतं अह हेत्युद्धते । कष्टमिति खेदे । विधिः तदपि पुरुषरत्नं चेत् यदि तत्क्षणभङ्गि तत्क्षणं सद्य एव भङ्गो विनाशो यस्य तत्तथा क्षणध्वंसि करोति विदधाति तर्हि कष्टमिति महाखेदे । विधेः ब्रह्मणः अपण्डितता अपण्डितत्वं मूर्खत्वमित्यर्थः । यो हि समीचीनं वस्तु विधाय पश्चात्स्वयमेव भनक्ति स महामूर्ख इत्यर्थः ॥ १०२ ॥

**जातः कूर्मः स एकः पृथुभुवनभरायार्पितं येन पृष्ठं**
**श्लाघ्यं जन्म ध्रुवस्य भ्रमति नियमितं यत्र तेजस्विचक्रम् ।**
**संजातव्यर्थपक्षाः परहितकरणे नोपरिष्टान्न चाधो**
**ब्रह्माण्डोदुम्बरान्तर्मशकवदपरे जन्तवो जातनष्टाः ॥१०३॥**

सः भूभारोद्धारेण अतिप्रसिद्धः स कूर्मः कच्छपः श्रीनारायणांशः जातः उत्पन्नः सफलजन्मेत्यर्थः । स कः येन कूर्मेण पृथुभुवनभराय पृथ्वै आर्पितं वर्तते पृथूनि विशालानि च तानि भुवनानि लोकाः तेषां भरः धारणं तस्मै पृथ्वै देहपार्श्वात्स्वभागः आर्पितं दत्तमस्ति तथा ध्रुवस्य उत्तानपादनृपतितनयस्य अवतारः श्लाघ्यं स्तुत्यं । स ध्रुवः धन्यजन्मा इत्यर्थः । यत्र ध्रुवनियमितं बद्धं तेजस्विचक्रं श्रीसूर्यचन्द्रप्रभृतिग्रहाणां आश्विन्यादिनक्षत्राणां सप्तर्षिप्रभृतीनां तारकाणां च चक्रं मण्डलं भ्रमति परिचलति शिशुमारचक्रस्थिता हि सूर्यादिग्रहतारा ध्रुवं प्रदक्षिणं कुर्वन्तीति सर्वागमसिद्धान्तः । अपरे ताभ्यां श्रीकूर्मध्रुवाभ्यां अन्ये जन्तवः प्राणिनः जातनष्टाः जाताश्च ते नष्टाश्च जातनष्टाः उत्पन्नमात्रा मृतमात्रा इत्यर्थः । निरर्थकावतारा इति भावः । किंलक्षणाः जन्तवः परहितकरणे परेभ्यः अन्येभ्यो हितस्य अभीष्टस्य करणं विधानं तस्मिन् न उपरिष्टान्न अत्युच्चाः तथा च पुनः न अधः नातिनीचा

नात्युपकारान्कुर्वन्ति न चापि उपकारान् कर्तुं विरमन्तीत्यर्थः । अत एव पुनः किंलक्षणाः संजातव्यर्थपक्षाः संजाताः उत्पन्नाश्च ते व्यर्थाः प्रयोजनशून्याश्च ते संजातव्यर्थाः तैस्तुल्यास्ते तथा । अथ वा संजाताः तथा विगतः अर्थपक्षोऽर्थ एव साध्यं येषां ते तथा । अत एव किंभूताः ब्रह्माण्डोदुम्बरान्तर्मशकवत् ब्रह्माण्डमेव विश्वमेवाण्डं तदेव उदुम्बरं उदुम्बरफलं तस्यान्तर्मध्ये मशकवत् क्षुद्रजन्तुवत् । अत एव ब्रह्माण्डे ते मशकतुल्या इत्यर्थः । यथोदुम्बरफले अल्पायुषो मरणायैव निरर्थकं मक्षिका उत्पद्यन्ते तद्वदित्यर्थः ॥ १०३ ॥

क्षणं बालो भूत्वा क्षणमपि *च युवा कामरसिकः
क्षणं वित्तैर्हीनः क्षणमपि च संपूर्णविभवः ।
जराजीर्णैरङ्गैर्नट इव वलीमण्डिततनु-
र्नरः संसाराङ्के विशति यमधानीजवनिकाम् ॥ १०४ ॥

[ १ अ. ' दिशति । ( *चकारः छन्दोविरुद्धः ) ]

नरो जनः संसाराङ्के संसारोत्सङ्गे यमराजधानीजवनिका यमस्य धर्मराजस्य राजधानिरिव राजधानी पृथिवी सैव चवनिका तिरस्का(स्क)रिणी तां विशति प्रविशति आगच्छति अवतरति इत्यर्थः । क इव नट इव नटति नृत्यतीति नटः नाट्यकर्ता स इव स यथाभिनेतुं जवनिकां विशति किं कृत्वा क्षणं क्षणमात्रं किंचित्कालमित्यर्थः । बालः पृथुकः भूत्वा संपद्य कंचित्कालं बाल्यमनुभूयेत्यर्थः । नटोऽपि क्षणं बालाभिनयेन बालो भवति पुनः किं कृत्वा क्षणमपि कंचित्कालं युवा तरुणो भूत्वा तारुण्यमनुभूयेत्यर्थः । किंलक्षणः युवा कामरसिकः कामेषु काम्यन्ते ते कामाः विषयाः तेषु रसिकः रसेनासक्तिमान् । कामान्सेवमान इत्यर्थः । नटोऽपि कामं सेवमानस्तरुणः कदाचिद्भवति । पुनः किं कृत्वा क्षणं कंचित्कालं वित्तैर्धनैर्हीनः रहितः भूत्वा कंचित्कालं निर्धनत्वं अनुभूय नटोऽपि अभिनयेन निर्धनं(नत्वं) अनुसरति । पुनः किं कृत्वा क्षणमपि च पुनः संपूर्णविभवः संपूर्णा विभवाः धनादयो यस्य स तथा पुनः भूत्वा कदाचित्संपूर्णसमृद्धित्वमनुभूयेत्यर्थः । नटोऽप्यभिनयेन संपूर्णधनं पुरुषमनुसरति । पुनः किं कृत्वा क्षणं वलीमण्डिततनुः भूत्वा वलिभिः व्याप्ताः श्लथत्वग्भिः मण्डिता व्याप्ता तनुः मूर्तिर्यस्य स तथा । किंलक्षणः जराजीर्णैः उपलक्षितः जरसा वृद्धत्वेन जीर्णानि शीर्णानि तैः अङ्गैः हस्तपादादिर(य)वयवैः कदाचिद्वार्धक्यमनुभूयेत्यर्थः । यथा नटोऽपि नानारूपाणि विभ्रद्विहाय च अङ्गै रङ्गे प्रविशति ॥ १०४ ॥

संमोहयन्ति मदयन्ति विडम्बयन्ति
निर्भर्त्सयन्ति रमयन्ति विषादयन्ति ।
एताः प्रविश्य सदयं हृदयं नराणां
किं नाम वामनयनाः न समाचरन्ति ॥ १०५ ॥

नाम निश्चितं । एताः वामनयनाः सुन्दरनेत्राः स्त्रियः नराणां सदयं दयायुक्तं हृदयं चित्तं प्रविश्य अपहृत्वा किं न समाचरन्ति अपि तु सर्वमेव कुर्वन्तीति । यतस्ताः संमोहयन्ति मोहं जनयन्ति मदयन्ति मदं जनयन्ति च विडम्बयन्ति अनुकुर्वन्ति तथा निर्भर्त्सयन्ति

निन्दयन्ति तथा रमयन्ति क्रीडयन्ति च तथा ताः पुरुषं विषादयन्ति विषण्णं कुर्वन्तीति। एतेन ताः स्त्रियः भावैः पुमांसं विवशं दध्युरिति भावः ॥ १०५ ॥

यां चिन्तयामि सततं मयि सा न रक्ता
सा चान्यमिच्छति जनं स जनोऽन्यसक्तः।
अस्मत्कृतेऽपि परितुष्यति काचिदन्या
धिक्तां च तं च मदनं च इमां च मां च ॥ १०६ ॥

अहो अहं सततं निरन्तरं यां चिन्तयामि स्मरामि सा स्त्री मयि विषये न रक्ता न अनुरागवती विरक्तेति यावत्। च अन्यत् सा मद्विरक्ता स्त्री अन्यं इतरं जनं नरं इच्छति अभिलषति। स जनः तदिष्टो नरः अन्यसक्तः अन्यस्मिञ्जने स्त्र्यन्तरे सक्तः। तत्परवश इत्यर्थः। तथा काचिदन्या अस्मत्कृते अपि अस्मदर्थेऽपि परितुष्यति समानन्दति। अस्मात्सेवानुरक्ता अस्मानेवाभिलषतीत्यर्थः। अतश्च या सततं मच्चिन्तनविष्यत्वेऽपि मयि नानुरागवती तां धिगस्तु सा निन्द्या भवतु। च पुनः तदभिलषितं जनं च धिगस्तु। सोऽपि निन्द्यो भवत्वित्यर्थः। तयोः कामाकुलितत्वेन गतविवेकत्वादित्यर्थः। च अन्यत् मदनं कन्दर्पं धिक् स निन्द्योऽस्तु। सर्वेषामाकुलत्वकरणेन महापातकित्वादित्यर्थः। च अन्यत् इमां मदभिलषितां च धिक् च पुनः तथा पुंश्चल्या अभिलषितं मामपि धिगस्तु। एतेन कामकामिनां मोहकमोहितत्वेन निन्द्यत्वमिति भावः ॥ १०६ ।

× सिंहो बली द्विरदशूकरमांसभोजी
संवत्सरेण रतिमेति किलैकवारम्।
पारापतः खरशिलाकणमात्रभोजी
कामी भवत्यनुदिनं वद कोऽत्र हेतुः ॥ १०७ ॥

[× अ. कोशे नास्ति श्लोकोऽयम्। रा. टीकापि नास्ति.]

+ इति श्रीवैराग्यशतकम्। तत्समाप्तौ समाप्तो ग्रन्थः। भर्तृहरिणा कृतः लि। यु। श्रीमुक्तिसौभाग्य ग। भिः शिष्य-कल्याण सौभाग्य। पठनकृते सं० १८५३ वर्ष्ये व ६ रवौ श्रीशान्तिजिनप्र। श्रीमुन्भाईवंदी। अन्तर्व-सति मांजारी श्वानी वा राजमंदिरे। अध-स्ताच्चे गजेन्द्राणां क्रीडादलितवि-द्विषां ॥ १ ॥

* रा. कोशे मूले पुष्पिका नास्ति।

चक्रे भर्तृहरिकृतेर्यथामति सविस्तरम्। रामर्षिर्विवृतिं व्यस्यन् विदां चित्तप्रसत्तये ॥१०७॥

इति श्रीमहामुनीन्द्रभर्तृहरिकृतौ वैराग्यशतकस्य टीका समाप्ता।

भर्तृहरिकाव्यवृत्तिः सूत्रान्विता ३७५० ग्रन्थमाना॥

श्रीरस्तु ॥ श्री ॥

## ॥ शतकत्रयस्थपद्यानामकारादिक्रमेणानुक्रमणिका ॥


| पद्यानि | वृत्तम् | पुटे |
|---|---|---|
| अकरुणस्य | द्रुत | २९ |
| अग्रे गीतं | मन्दा. | ११३ |
| अच्छाच्छचन्दन | वसन्त | ५४ |
| अजानन्दाहा | शिख | ९३ |
| अज्ञः सुख | अनु | १ |
| अदर्शने दर्शन | उपजाति | ६४ |
| अधिगतपर | मालिनी | ६ |
| अनावर्ती कालो | शिख | ९९ |
| अपसर सखे | हरिणी | ७० |
| अप्रियवचन | आर्या | ३१ |
| अभिमतमहा | हरिणी | १३५ |
| अभिमुखनिह | आर्या | ३९ |
| अभुक्तायां यस्यां | शिख | २५ |
| अमीषां प्राणानां | " | ९९ |
| अम्भोजिनीवन | वसन्त | १९ |
| अर्थानामीशिषे | स्रग्धरा | ९७ |
| अर्धं नीत्वा निशा | " | ७८ |
| अवश्यं यातारः | शिख | ९० |
| अशीमहि वयं | अनु | ९६ |
| असाराः सन्त्येते | शिख | ४५ |
| असितात्मा सुतं | अनु | ६८ |
| असूचीसंचारे | शिख | ७४ |
| अहौ वा हारे वा | " | १२८ |
| आघ्रातं मरणेन | शार्दूल | १३३ |
| आज्ञा कीर्तिः | मालिनी | ३३ |
| आदित्यस्य गता | शार्दूल | ८६ |
| आधिव्याधिशतै | " | १३३ |
| आयुर्वर्षशतं | " | १३५ |
| आयुः कल्लोललो | स्रग्धरा | १२२ |
| आरम्भगुर्वी | उपजाति | ३० |
| आलस्यं हि | अनु | २६ |
| आवर्तः संश | स्रग्धरा | ५१ |
| आवासः किल | शार्दूल | ७३ |
| आवासः क्रिय | अनु | ७४ |
| आशा नाम नदी | शार्दूल | १०४ |
| आसंसारं त्रिभु | मन्दा | १०५ |
| आसारेण न हर्म्यं | शार्दूल | ७७ |
| इतः स्वपिति | पृथ्वी | ८ |
| इतो विद्युद्वल्ली | शिख | ७२ |
| इदमनुचितमक्र | पुष्पि | ६९ |
| इमे तारुण्यश्री | शिख | ७२ |
| इह हि मधुरगीतं | मालिनी | ५५ |
| उत्खातं निधि | शार्दूल | ८४ |
| उदन्वच्छन्ना भूः | शिख | ८ |
| उद्भासिताखिल | वसन्त | ३४ |
| उद्वृत्तः स्तनभार | शार्दूल | ६३ |
| उन्मत्तप्रेम | अनु | ६१ |
| उन्मीलत्त्रिवली | शार्दूल | ५५ |
| उपरि घनं घन | आर्या | ४७ |
| उरसि निपति | मालिनी | ६५ |

| पद्यानि | वृत्तम् | पुटे |
|---|---|---|
| एकाकी निःस्पृहः | अनु | ११८ |
| एकेनापि हि | " | ३२ |
| एको रागिषु | शार्दूल | ६८ |
| एतस्माद्विरमे | " | ११९ |
| एताश्चलद्वलय | वसन्त | ४३ |
| एते सत्पुरुषाः | शार्दूल | २० |
| ऐश्वर्यस्य विभू | " | २० |
| कदर्थितस्यापि | उपजाति | ३१ |
| करे श्लाघ्यस्त्यागः | शिख | ३६ |
| कर्मायत्तं फलं | अनु | २५ |
| कस्तुम्बति कुल | आर्या | ५८ |
| कान्ताकटाक्षवि | वसन्त | ३० |
| कान्तेत्युत्पलला | शार्दूल | ४८ |
| कामिनीकाय | अनु | ५६ |
| किं कन्दाः कन्दरे | स्रग्धरा | ११७ |
| किं कूर्मस्य भर | शार्दूल | ३८ |
| किं गतेन यदि | रथो | ६५ |
| किं वेदैः स्मृतिभिः | शार्दूल | १२२ |
| किमिह बहुभि | मालिनी | ४६ |
| कुङ्कुमपङ्कचर्चित | दोधक | ६२ |
| कुसुमस्तवक | अनु | १७ |
| कृच्छ्रेणामेध्यमध्ये | स्रग्धरा | १३४ |
| कृमिकुलचित | हरिणी | १६ |
| कृशः काणः खञ्जः | शिख | ९१ |
| केयूरा न विभू | शार्दूल | ३९ |
| केशानाकुलयन् | " | ८० |
| केशाः संयमिनः | " | ७५ |
| कोचित्तद्भ्रूभङ्गैः | शिख | ४८ |

| पद्यानि | वृत्तम् | पुटे |
|---|---|---|
| क्वचिद्भूमौ शय्या | शिख | ९ |
| क्षणं बालो भूत्वा | " | १३९ |
| क्षान्तं न क्षमया | शार्दूल | ८९ |
| क्षीरेणात्मगतो | " | १४ |
| क्षुत्क्षामोऽपि जरा | " | ७ |
| खलोल्लापाः सोढाः | शिख | ८५ |
| खल्वाटो दिवसे | शार्दूल | १९ |
| गङ्गातरङ्गकण | वसन्त | १२६ |
| गङ्गातीरे हिम | मन्दा | १०२ |
| गात्रैर्गिरा च | वसन्त | ८५ |
| गुरुणा स्तनभारेण | अनु | ६७ |
| चण्डालः किमयं | शार्दूल | १११ |
| चुम्बन्तो गण्ड | स्रग्धरा | ८० |
| चूडोत्तंसितचारु | शार्दूल | १,४१ |
| छिन्नोऽपि रोहति | आर्या | ३१ |
| जल्पन्ति सार्ध | अनु | ६४ |
| जयन्ति ते सुकृतिनो | अनु | २७ |
| जाड्यं धियो हरति | वसन्त | २१ |
| जाड्यं ह्रीमति | शार्दूल | ११ |
| जातः कूर्मः स एकः | स्रग्धरा | १३८ |
| जातिर्यातु रसातलं | शार्दूल | १२ |
| जात्यन्धाय च दुर्मु | " | ५८ |
| जीर्णा एव मनोर | " | १२९ |
| तपस्यन्तः सन्तः | शिख | १०२ |
| तरुणी सैषा दी | उपजाति | ७७ |
| तस्मादनन्तमजरं | वसन्त | १२० |
| तस्याः स्तनौ यदि | " | ७१ |
| तावदेव कृतिना | रथो | ४१ |

| पद्यानि | वृत्तम् | पुटे |
|---|---|---|
| तावदेवामृतमयी | अनु | ६६ |
| तावन्महत्वं | ” | ५९ |
| तृषा शुष्यत्यास्ये | शिख | १३० |
| तृष्णां छिन्धि भज | शार्दूल | २२ |
| त्रैलोक्याधिपतित्व | ” | १२८ |
| त्वं राजा वयमप्यु | ” | ९४ |
| दाक्षिण्यं स्वजने | ” | ३५ |
| दानं भोगो नाश | आर्या | २६ |
| दिक्कालाद्यनव | अनु | ८३ |
| दिश वनहरिणी | मालिनी | ४५ |
| दीना दीनमुखैः | शार्दूल | ८६ |
| दुराराध्यः स्वामी | शिख | १०९ |
| दुर्ग्राह्यं हृदयं | शार्दूल | २२ |
| दुर्जनः परिहर्तं | अनु | १४ |
| दूरादर्थं घट | मन्दा | ३८ |
| दैवेन प्रभुणा | शार्दूल | ३९ |
| दौर्मन्त्र्यान्नृपतिः | ” | ११ |
| द्रष्टव्येषु किमुत्तमं | ” | ५७ |
| धन्यानां गिरि | ” | १३२ |
| धन्यास्त एव | वसन्त | ४२ |
| धिक्तस्य मन्द | ” | ६३ |
| न कश्चिच्चण्ड | अनु | २९ |
| न गम्यो मन्त्राणां | शिख | ६६ |
| न ध्यातं पदमी | शार्दूल | ८८ |
| न नटा न विटा | वियोगिनी | ९५ |
| नमस्यामो देवान् | शिख | १० |
| नम्रत्वेनोन्नमन्तः | स्रग्धरा | १८ |
| न संसारोत्पन्नं | शिख | ८३ |
| नाम्यस्ता भुवि | शार्दूल | १२९ |
| नामृतं न विषं | अनु | ४९ |
| निन्दन्तु नीति | वसन्त | ५ |
| निवृत्ता भोगेच्छा | शिख | ८७ |
| नूनं हि ते कवि | वसन्त | ६२ |
| नूनमाज्ञाकर | अनु | ६७ |
| नेता यस्य बृह | शार्दूल | २५ |
| नैवाकृतिः फलति | वसन्त | २० |
| नो सत्येन | शार्दूल | ५१ |
| पञ्चाननं परि | वसन्त | ६९ |
| पद्माकरं दिनकरो | ” | ३२ |
| परिक्षीणः कश्चि | शिख | ४ |
| परिमलभृतो | हरिणी | ५३ |
| परिवर्तिनि | अनु | ३७ |
| परेषां चेतांसि | शिख | ९८ |
| पाणिः पात्रं पवित्रं | स्रग्धरा | १०८ |
| पातालमाविशसि | वसन्त | १२७ |
| पातितोऽपि करा | अनु | १३ |
| पान्थस्त्रीविरहा | शार्दूल | ७१ |
| पापान्निवारयति | वसन्त | १७ |
| पुण्ये ग्रामे वने | स्रग्धरा | ११० |
| पुण्यैर्मूलफलैः | शार्दूल | ११२ |
| प्रणयमधुराः | हरिणी | ६१ |
| प्रदानं प्रच्छन्नं | शिख | ३० |
| प्रसह्य मणि | पृथ्वी | २ |
| प्राक्पाप्तेति | शार्दूल | ६५ |
| प्राण्याघातान्निवृत्तिः | स्रग्धरा | ११४ |
| प्राप्ताः श्रियः सकल | वसन्त | ११९ |

| पद्यादि | वृत्तम् | पृष्ठे |
|---|---|---|
| ग्रामः कन्दुक | अनु | १३ |
| घिये मणय | आर्या | ७५ |
| घीणावि वः | वसन्त | १४ |
| घोयत्थोऽभि | सग्धरा | ७८ |
| कलमलणवणाय | मालिनी | ९३ |
| घोत्तारो मत्तर | अनु | ८३ |
| मलज्ञानविवेक | शार्दूल | १३६ |
| ब्रह्माण्डमण्डली | अनु | १२३ |
| ब्रजा येन | शार्दूल | १० |
| भक्तिर्भवे मरण | वसन्त | ११९ |
| भग्नाशस्य कर | शार्दुल | ११ |
| भवन्ति नमा | पंचस्य | ३१ |
| भव्यं भक्तं ततः | सग्धरा | १३७ |
| भिक्षाशनं यदपि | वसन्त | ९२ |
| भिक्षाणी जन | शार्दूल | १२४ |
| भीमं वनं भय | वसन्त | २४ |
| भोगा न भुक्ता | उपजाति | ८९ |
| भोगा भङ्गुरयूचयो | शार्दूल | १३२ |
| भोगा मेघविवान | " | ११६ |
| भोगास्तुङ्गतरङ्ग | " | १३७ |
| भ्रान्तः कष्टमहो | " | १०० |
| भ्रान्त्वा देशमनेक | " | ८४ |
| भूचापुपांत्कु | शालिनी | ५० |
| मत्तत्मम्भसि | शार्दूल | २४ |
| मणिः शाणोल्लीढः | शिख | ३ |
| मत्तेभकुम्भदलने | वसन्त | ४३ |
| मत्तेभकुम्भपरि | " | ४६ |
| मधुरसं मधुरैरपि | द्रुत | ५९ |

| पद्यादि | वृत्तम् | पृष्ठे |
|---|---|---|
| मनसि वपसि | मालिनी | ८ |
| मही शका शय्या | शिख | १२१ |
| महेश्वरे वा जग | पंचस्य | १३१ |
| मातर्मेदिनि | शार्दूल | १२५ |
| मातर्रुद्धिम | " | ११५ |
| मात्सर्यमुत्सार्य | उपजाति | ४५ |
| माने म्लायिनि | शार्दूल | ९८ |
| मालवी शिरसि | रथोद्धता | ६२ |
| मुखेन चन्द्र | अनु | ६७ |
| मुग्धे धानुष्कता | " | ६८ |
| मृगमीनसज्ज | आर्या | १५ |
| मृतिण्डो जल | शार्दूल | ९५ |
| मोहं मार्जय | " | ११६ |
| मौनान्मूकः पवचन | मन्दा | १८ |
| यद्यभेकाः क्वचिद | " | १०१ |
| यदचेतनोऽपि | आर्या | ३१ |
| यदा किंचिज्ञोऽहं | शिख | ९७ |
| यदा मेरुः शीमा | " | १२७ |
| यदासीदज्ञानं | " | १२३ |
| यदि न्याम देव | आर्या | ४० |
| यदेवत्पूर्णेन्दु | शिख | ५२ |
| यदेवत्स्वाच्छन्द्यं | " | १०८ |
| यद्धाता निज | शार्दूल | २७ |
| यद्यस्य नाभिरुचिरं | आर्या | ८१ |
| यज्ञागा मदवारि | शार्दूल | २४ |
| यस्यास्ति वित्तं | उपजाति | २६ |
| यां चिन्तयामि | वसन्त | १४० |

| पद्यानि | वृत्तम् | पुटे |
|---|---|---|
| यावत्स्वस्थमिदं | शार्दूल | १२६ |
| या साधूंश्च | ” | १५ |
| यूयं वयं वयं | अनु | ११६ |
| येनैवाम्बर | ” | ९० |
| ये वर्तन्ते धन | मन्दा | १०६ |
| ये संतोषनिर | शार्दूल | ५ |
| रत्नैर्महार्हैः | उपजाति | २६ |
| रम्यं हर्म्यतलं | शार्दूल | ११६ |
| रम्याश्चन्द्रमरी | ” | १२४ |
| रागस्यागारमेकं | स्रग्धरा | ५७ |
| राजंस्तृष्णाम्बु | ” | ४७ |
| राजते राज | अनु | ८१ |
| राजन्दुधुक्षसि | वसन्त | २८ |
| रात्रिः सैव पुनः | शार्दूल | १२० |
| रे कन्दर्प करं | ” | १३१ |
| लज्जां गुणौघ | वसन्त | ३७ |
| लभेत सिकतासु | पृथ्वी | २ |
| लाङ्गूलचालन | वसन्त | २८ |
| लीलावतीनां | उपजाति | ४४ |
| लोभश्चेदगुणेन | शार्दूल | १७ |
| वक्त्रं चन्द्रविला | ” | ४९ |
| वचसि भवति | मालिनी | ४२ |
| वने रणे शत्रु | उपजाति | २३ |
| वयं येभ्यो जाताः | शिख | १०० |
| वयमिह परि | मालिनी | १०७ |
| वरं प्राणच्छेदः | शिख | २५ |
| वरं भृङ्गीत्तुङ्गात् | ” | ३२ |
| वलीभिर्मुखमा | अनु | ९० |

| पद्यानि | वृत्तम् | पुटे |
|---|---|---|
| वहति भुवन | हरिणी | ३६ |
| वाह्निस्तस्य जला | शार्दूल | ३३ |
| वाञ्छा सज्जन | ” | २१ |
| विनीर्णे सर्वस्वे | शिख | १०७ |
| विद्या नाधिगता | शार्दूल | १०६ |
| विद्या नाम नर | ” | ३५ |
| विपदि धैर्यमथा | मुत | ५ |
| विपद्युच्चैः स्थेयं | शिख | ७ |
| विपुलहृदये | हरिणी | ९४ |
| वियदुपचिव | मालिनी | ७६ |
| विरमत बुधा | हरिणी | ११४ |
| विरम विरसा | ” | २९ |
| विरहोऽपि संगमः | आर्या | ७० |
| विश्रम्य विश्रम्य | उपजाति | ६४ |
| विस्तारितं मकर | वसन्त | ६० |
| वेश्यासौ मदन | अनु | ५९ |
| वैराग्यं संश्रय | ” | ८१ |
| व्याघ्रीव तिष्ठति | वसन्त | १३६ |
| व्यादीर्घेण चलेन | शार्दूल | ६९ |
| व्यालं बालमृणाल | ” | ३४ |
| शंभुस्वयंभु | वसन्त | ५९ |
| शशी दिवस | पृथ्वी | ३ |
| शास्त्रज्ञोऽपि प्रभु | मन्दा | ५४ |
| शास्त्रोपस्कृत | शार्दूल | ४ |
| शिरः शार्वं स्व | शिख | १०४ |
| शुभ्रं सद्म सवि | शार्दूल | ४१ |
| शृङ्गारवृक्ष | ” | ५६ |
| श्रोत्रं श्रुतेनैव | उपजाति | २७ |

| पद्यानि | वृत्तम् | पृष्ठे |
|---|---|---|
| संयमापिरह | आर्या | ७० |
| संवधायसि | शार्दूल | १५ |
| संपरतु महतां | अनु | १४ |
| संमोहयन्ति | वसन्त | १४० |
| संसार वप प | अनु | ५६ |
| संसारेऽस्मिन्नसारे कु | स्रग्धरा | ५३ |
| " " परि | " | ४७ |
| सगुणमपगुणं | मालिनी | २३ |
| स जातः कोऽप्या | शिख | ९६ |
| सवि प्रदीपे | अनु | ६७ |
| सत्यं जना वच्मि | उपजाति | ४४ |
| सत्यानृता च | वसन्त | २८ |
| सदा योगाभ्यास | शिख | ४२ |
| सन्त्यन्येऽपि वृह | शार्दूल | २६ |
| सन्मार्गे तावदा | स्रग्धरा | ५२ |
| समारम्भा भग्नाः | शिख | ११८ |
| सहकारकुसुम | आर्या | ७६ |
| सिंहः शिशुरपि | " | ३७ |
| सिंहो बली द्विरद | वसन्त | १४० |
| सिद्धाध्यासित | शार्दूल | ४४ |
| सुधाशुभ्रं धाम | शिख | ७३ |
| सृजति तावद् | द्रुत | १३८ |
| स्तनौ मांसग्रन्थी | शिख | ९२ |
| स्त्रीमुद्रां कुसुमा | शार्दूल | ६० |
| स्थाल्यां वैदूर्य | स्रग्धरा | २३ |
| स्नात्वा गाङ्गैः पयो | " | १३० |
| स्पृहयति भुजयो | आर्या | ३६ |
| स्फुरत्स्फारज्योत्स्ना | शिख | १०३ |
| स्मितं किंचिद्वक्त्रं | " | ५० |
| स्मितेन भावेन | वंशस्थ | ४३ |
| स्मृता भवति तापा | अनु | ५० |
| स्वजो ह्यामोधा | शिख | ७६ |
| स्वपरमतारको | आर्या | ६४ |
| स्वल्पं स्नायु | शार्दूल | १६ |
| स्वायत्तमेकान्त | उपजाति | ३४ |
| हर्तुर्याति न गोच | शार्दूल | ६ |
| हिंसाशून्यमय | " | ८८ |
| हेमन्ते दधि | " | ७९ |

# शुद्धिपत्रिका।

( * मूलश्लोकानां केवलं मुद्रणदोषा अत्र प्रदर्शिताः )।

| पृष्ठे | श्लोके | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ९ | १८ | दिव्याम्बधरो | दिव्याम्बरधरो |
| १५ | ३२ | वृर्तानाम् | वृत्तीनाम् |
| १६ | ३५ | प्रीत्या स्वादन् | प्रीत्या-स्वादन् |
| २० | ४६ | समान्यास्तु | सामान्यास्तु |
| २२ | ५० | न्कीर्ति | न्कीर्ति |
| २६ | ६३ | निाश्चिनार्था | निाश्चितार्था |
| २६ | ६४ | संभाविता | संभाविताः |
| ३२ | ८२ | शूरणे | शूरेण |
| ३३ | ८४ | कुरुङ्गायते | कुरङ्गायते |
| ३६ | ९३ | क्रीडाधीनं | क्रोडाधीनं |
| ४३ | ७ | मत्तेमकुम्भ | मत्तेभकुम्भ |
| ४३ | ८ | पचोभि | वचोभि |
| ४४ | १२ | सिद्धाध्यासित | सिद्धाध्या-सित |
| ५० | २७ | दृष्टा | दृष्टा |
| ,, | ,, | स्पृष्ठा | स्पृष्टा |
| ५१ | २९ | लोघनतां | लोचनतां |
| ६५ | ६३ | किं गतेन | किं गतेन |
| ६५ | ६४ | जाताभिलाषं | जाताभिलाषं |
| ६७ | ६७ | नूनमाज्ञा | नूनमाज्ञा |
| ६८ | ७१ | समाष्विक्षत | समाविक्षत |
| ६८ | ७३ | स्मरवाण | स्मरबाण |
| ७३ | ८३ | केषां चित्सु | केषांचित्सु |
| ७४ | ८६ | असूची संचारं | असूची-संचारे |
| ७६ | ८९ | मधुरमधुरविधुर | मधुरमधु-विधुर |
| ७७ | ९३ | शीतोत्कम्प | शीतोत्कम्प |
| ७८ | ९४ | विविक्के | विविक्के |
| ८० | ९७ | पुलकोद्भेद | पुलकोद्भेद |
| ८० | १०१ | मनोज्ञेपि | मनोज्ञेऽपि |
| ८४ | ४ | सेवकृता | सेवा कृता |
| ९० | १७ | यातारश्चितर | यातारश्चिरतर |
| ,, | ,, | विषया | विषया |
| ९२ | २० | स्पर्धिजघनं | स्पर्धि जघनं |
| ९७ | ३१ | मुर्खोऽस्मीति | मूर्खोऽस्मीति |
| ९९ | ३४ | संपातविधुराः | संतापविधुराः |
| १०४ | ४२ | स्तोकमथवा | स्तोकमथ वा |
| १०५ | ४४ | क्षीवस्यान्तः | क्षीवस्यान्तः |